Digitized by Arya Samaj Foundation Chennai and eGangotri

SANSKRIT SAHITYA PRISHAT
VOL 8 1926
G. K. U.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

150779

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

१८४९

Jan

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

१८४७ शकाब्दे पौषे
Reg. No. C. 1073.
८म वर्षस्य ९म संख्या
January, 1926
Vol. VIII. No. 9

संस्कृतसाहित्यपरिषत्

संस्कृतसाहित्यपरिषदो मासिकं मुखपत्रम्

भारते भातु भारती

सम्पादकः—श्रीकालीपदतर्काचार्य्यः

सहसम्पादकः—श्रीदुर्गामोहनभट्टाचार्य्य एम. ए.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पण्डिताग्रणी-वैयाकरणशिरोमणि-
श्रीयुक्तहरलालस्मृतिरत्नमहोदयविरचितटीकयान्वितम्

सारस्वत-व्याकरणम्।

वङ्ग-विहार-वाराणसी-पञ्चनदादिप्रदेशप्रवर्त्तितराजकीयसंस्कृतपरीक्षायाः पाठ्यरूपेण निर्दिष्टम्

बालानामाशुबोधकतया परमुपयुक्तेऽस्मिन् व्याकरणे विभिन्न-प्रदेशप्रचलितपाठान्तराणां समन्वयेन प्रसादगुणालङ्कृता संयोजिता बालसरला नाम टीका। सरलसंस्कृतभाषया व्याख्या, पद-साधनम्, पारिभाषिकलक्षणनिर्म्माणादिकम्, विचारवितर्कादिना गूढ़सन्देहमीमांसा, असंख्यानां परिकल्पितपूर्वपक्षाणां विभिन्नदिशा प्रदर्शितान्युत्तराणि—इत्येवमादिकं व्याकरणाध्यायिनामपेक्षितं सर्व-मेवात्र सन्निवेशितम्। सम्पादकस्य 'निवेदने' च व्याकरणविषयकं विविधगवेषणामयमालोचनं विद्यते।

मूल्यम्—पूर्व्वार्द्धम् ३) रूपकत्रयमात्रम्। उत्तरार्द्धम् ३) रूपक त्रयम्। ये तु पूर्वोत्तरार्द्धे एकदा ग्रहीष्यन्ति, तेषां कृते ५) रूपक-पञ्चकमात्रम्।

प्राप्तिस्थानम्—श्रीकृष्णदासमिश्रव्याकरणतीर्थः
घटुला सारस्वतचतुष्पाठी, पोः मिरगोदा, मेदिनीपुर।
तथा—संस्कृतबुकडिपो, २८।१ कर्णओयालिसष्ट्रीट, कलिकाता।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृतसाहित्यपरिषत्

(श्यामबाजार, कलिकाता)

(Registered under Act XXI of 1860)

समितिरियं संस्कृतभाषायास्तन्मूलकप्राकृतादीनाञ्च सम्यगालोचनया यथावत् प्रसारप्रतिपादनाय प्रतिष्ठापिता (१) प्रतिमासं सभाद्यनुष्ठानेन (२) मुद्रापितानां हस्तलिखितानाञ्च ग्रन्थराशीनां परिषद्ग्रन्थागारे नियतसञ्चयनेन (३) स्वकीये महाविद्यालये विद्यार्थिनामध्यापनेन (४) अमुद्रापितसंस्कृतग्रन्थानां प्रकाशनेन (५) अन्तरान्तरा रङ्गेषु संस्कृतरूपकाणां प्रयोगेण (६) यथानियमं मासिकपत्रिकाप्रचारेण विविधैरुपायान्तरैश्च स्वसमुद्देश्यमनुकूलयति। सदस्या मूल्यं विनैव प्रतिमासं संस्कृतपत्रिकां लभेरन्, परिषत्प्रकाशिता ग्रन्थमालाश्च तेषां सुलभतराः स्युः, निखिलेष्वेव परिषत्कृत्येषु ते लब्धाधिकारा भवेयुः। अवाप्तिः ३३१

संस्कृतसाहित्यपरिषत्पत्रिका

संस्कृतसाहित्यपरिषन्नाम तदभिधानायाः परिषदो मासिकी मुखपत्रिकेयमतिगभीरार्था दार्शनिकनिबन्धेषु परमकोमला काव्यचिन्तासु धर्म्योपचारा स्मृतिपुराणेतिहासादिषु सूक्ष्मतत्त्वावेदिका विज्ञानविभवेषु संस्कृतोन्नतिमूलप्रवृत्तिप्रचारपरा पारिपार्श्विकवृत्तेषु यथार्थगुणदोषविचारचतुरा ग्रन्थादिसमालोचनेषु गीर्वाणवाणीप्रणयिनामत्युपादेयतया वरीवर्त्ति।

अस्याः प्रतिखण्डमूल्यम् ।० चतुरानकम्, वार्षिकमूल्यम् ३) रूप्यकत्रयम्।

पत्रिकामूल्यादिकं परिषत्कार्य्याध्यक्षसविधे निबन्धादिकञ्च पत्रिकासम्पादकसविधे अधोलिखितसङ्केतानुसारेण प्रेषणीयम्।

'संस्कृतसाहित्यपरिषत्'

श्यामबाजार, कलिकाता।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृतसाहित्यपरिषद्ग्रन्थमाला

	मूल्यम् साधारणानाम्	सदस्यानाम्
कालीतन्त्रम्—सटीकानुवादम्	॥/०	॥०
शङ्करीसङ्गीतम्—	।/०	।०
मुक्तिवादः—गदाधरभट्टाचार्य्यविरचितः सटीकाद्वय-भाष्यानुवादसहितः	२)	१॥०
दुर्गोत्सवतत्त्वम्—रघुनन्दनभट्टाचार्य्यकृतम् शारदीयदुर्गोत्सवप्रमाणप्रयोगतत्त्वरूपम्	२)	१॥०
पितृदयिता—अनिरुद्धभट्टकृता सामवेदीय-सन्ध्याश्राद्धादिपद्धतिरूपा	१।०	१)
दुर्गोत्सवनिबन्धकदम्बम्—दुर्गोत्सवविवेकादिग्रन्थ-पञ्चकात्मकम्	॥०	।/०
कारकोल्लासः—भरतमल्लिककृतः सोदाहरणकारकनिर्णयरूपः	/०	/०
ऋग्वेदभाष्योपक्रमणिका—सायणकृता आङ्गलभाषाटिप्पणसमेता	॥।०	॥/०
ग्रहयागतत्त्वम्—रघुनन्दनभट्टाचार्य्यकृतम्	।/०	।/०

मुद्राप्यमाणग्रन्थाः—

१। प्रशस्तपादभाष्यम्—जगदीशसूक्तिसहितम्, सूक्तिदीपिकया भाषाभाष्येण च समलङ्कृतम्।

२। प्रभाकरविजयः—नन्दीश्वरविरचितः प्रभाकरसम्प्रदायानुसारिमीमांसाग्रन्थः।

मुद्रापणार्थं गृहीता ग्रन्थाः—

१। यात्रातत्त्वम्—रघुनन्दनभट्टाचार्य्यविरचितम्॥

२। तीर्थतत्त्वम्—रघुनन्दनभट्टाचार्य्यविरचितम्।

३। छान्दोग्यमन्त्रभाष्यम्—गुणविष्णुकृतम्।

४। आनन्दलतिका—सपत्नीक-कृष्णनाथविरचितं काव्यम्।

५। पवनदूतम्—धोयीकविकृतम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Calcutta Oriental Series

1. युक्तिकल्पतरुः—भोजराजप्रणीतः। अत्र राजनीतिः, नगरादिनिर्म्माणरूपा वास्तुविद्या, छत्रचामरखड्गादिनानाविधोपकरणलक्षणम्, रत्नपरीक्षा, अस्त्रयुक्तिः, गवाश्व-गजादिपशुपरीक्षा, नावादिविविधयानलक्षणम् इत्येवमादयो विषया निर्णीताः Rs. 2-8

2. चाणक्यराजनीतिशास्त्रम्—(pp. xxxi+82) with a Foreword by Johan van Manen, Secretary, Asiatic Society of Bengal 0-14-0.

4. Inter-state Relations in Ancient India, Part I by Dr. Narendra Nath Law, M. A., B. L., P. R. S., Ph. D. Rs. 2

5. मुक्ताफलम्—वोपदेवकृतम्, हेमाद्रिकृतटीकया समलङ्कृतम्, खण्डद्वयात्मकम्। अपूर्व्वोऽयं वैष्णवग्रन्थः। (With a Foreward by Dr. N. Law, M. A., Ph. D. (pp. xlvii+361) Rs. 6

6. चाणक्यकथा—रविनर्त्तकप्रणीता बङ्गानुवादसहिता Re. 1

9. वक्रोक्तिजीवितम्—राजानककुन्तकविरचितम् ग्रन्थकृत्प्रणीतटीकासहितमलङ्कारशास्त्रम् (Edited with Critical Notes Introduction by S. K. De, M. A., D. Lit.) Rs. 2

13. Economic Life and Progress in Ancient India by Narayan Chandra Banerjee, M. A., Lecturer, Calcutta University. (Demy 8 vo. 325+xvi pp.) Rs. 6

14. Early History of the Spread of Buddhism and the Buddhist Schools by Dr. Nalinaksha Dutt, M. A., B. L., P. R. S., Ph. D., Lecturer, Calcutta University. (Demy 8 vo. 314+xi pp.) Rs. 7-8

15. ব্রহ্মসূত্রম্—'ভাগবতভাষ্য-সহিতম্—শ্রীহরিদাসবিদ্যাবাগীশ-ভাগবতাচার্য্যসঙ্কলিতম্। প্রত্যেকটি সূত্রের সহিত শ্রীমদ্ভাগবতের শ্লোক উদ্ধৃত করিয়া দেখান হইয়াছে যে শ্রীমদ্ভাগবত ব্রহ্মসূত্রের ভাষ্য (277 pp.) Rs. 2-8

13. Foundation of Indian Poetry (being a survey of the origin and development of theories of Indian Poetics from the earliest period) by Dr. J. Nobel of Berlin (188 pp.) Rs. 5

17. Padma Purana by Prof. H. Sarma M. A. It shows that Kalidasa has drawn materials for his a Sakuntala and Raghuvamsa from the portion of the Padmapurana edited here. (Demy 8vo. lii+100 pp.) Rs. 2

18. Studies in Indian History and Culture by Dr. Narendra Nath Law M. A., B. L., Ph. D. (Demy 8vo. 430 pp.) Rs. 8

THE INDIAN HISTORICAL QUARTERLY
(A HIGH CLASS ORIENTAL JOURNAL)

Each issue 200 pp. Super-Royal Octavo. Edited by Dr. Narendra Nath Law, M. A., B. L., P. R. S., Ph. D. containing contributions from the foremost oriental scholars of India, England, France, Germany.

Annual Subscription Rs. 6 (exclusive of postage 0—12—0)

The Calcutta Oriental Press, 107, Mechuabazar Street, Calcutta.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भारतवर्षस्य श्रेष्ठानाम् औषधालयानां चिकित्सालयानां च अन्यतमः

"आर्, सि, सेन एण्ड कों लिमिटेड्"

(यथाशास्त्रं निर्मितानि विशुद्धानि औषधानि सर्व्वदा लभ्यन्ते)

१। **च्यवनप्राशस्य** प्रतिविंशतितोलकं मूल्यं रूप्यकद्वयं २) प्रेषणादिव्ययः ।/० आणकषट्कम् ।

२। **वृहच्चन्द्रोदयमकरध्वजस्य** सप्ताहार्थं मूल्यं २) रूप्यकद्वयम्, प्रेषणादिव्ययः ।/० आनकपञ्चकम् ।

३। **तुषारविन्दुतैलस्य** प्रतिदशतोलकम् मूल्यं २) रूप्यकद्वयम्, प्रेषणादिव्ययः ।/० आनकषट्कम् ।

(सर्वेषाम् औषधानां मूल्यादिविषयक-विवरणपूर्णं पुस्तकं मूल्यं विनैव प्रेष्यते

कविराजः राखालचन्द्रसेनः एल् एम् एस्

,, श्रीसुधीरकुमार सेनः

२५९ नं अपारचितपुररोड्, कलिकाता

सर्व्वत्र भारतवर्षे सुधीजनैः समादृतं,

कविराज-राखालचन्द्र-सेन एल्, एम्, एस्, कृतं

कुन्तलकौमुदीतैलम्

भवत्कुटुम्बमध्यवर्त्तिनीनां महिलानां केशप्रसाधनार्थं

विशुद्धोपादानजातं केशतैलमेतत् क्रीयताम् ।

भवत्-स्वदेशवासिना सुशिक्षितेन भिषजा निर्म्मितमेतत्

तैलम्, अतो भेषजगुणैः श्रेष्ठम् ।

(सर्व्वत्र गान्धिकानामापणेषु प्राप्तव्यम्)

आर् सि सेन एण्ड कों लिमिटेड्

२५९ अपारचितपुररोड्, कलिकाता

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृतसाहित्यपरिषत्



स्वर्गगत-महामहोपाध्याय-राखालदासन्यायरत्नः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृतसाहित्यपरिषत्

इयं संस्कृतसाहित्यपरिषत् प्रतिभा रवेः।
भावालोकैर्मनःपद्मं प्रकाशयतु धीमताम्॥

१८४७ शकीये पौषे, ८म-वर्षस्य ८म-संख्या

मतिमञ्जरी

संस्कृतभाषाविज्ञानापेक्षा—केचिद्वदन्ति किमर्थो फलमार्थ्यवाचा, तस्यास्तु शिक्षणमनर्थमिव प्रतीतम्। भाषानुवादमननेन गतार्थमेतत्, किं व्यर्थमाकुलपरिश्रमसम्प्रसारः? अर्थावबोधविषये खलु मातृभाषाः, सम्यक्तया समुपयोगमसूर्वहन्ति। यत्नेन शिक्षिततया सहसार्थबोधो, भाषान्तरस्य कथमिव सुसम्भवः स्यात्? यस्यास्त्वयत्नसुलभो ननु सम्प्रबोधः, सैवोपयोगसुपयाति नृणां विशेषात्। स्वाभाविको रुचिरुपैति परं प्रकर्षं, यत्नोपपादितरुचेरिति सिद्धमेतत्॥ तस्माद् विचारपटवो विबुधा इदानीं, युञ्जन्ति शिक्षणविधौ निजमातृभाषाम्। त्याज्या ततो बहुलयत्नफलावबोधा, गीर्वाणगीरतितरां निपुणैः सयत्नम्॥ तत्रैव युक्तिममलामिह वाचयिष्ये, या संस्कृतादिप्रदगौरवमेव कर्त्री। दोषान् गुणांश्च सुधियः प्रविवेचयन्ताम्, यज्ञो गुणागुणपरीक्षणमस्ति हिन्नाम्॥ संस्कारो द्विविधः प्रोक्तो लौकिकोऽलौकिकस्तथा। संस्कारो भूरथादीनां लौकिको दृष्टिगोचरः॥ अदृष्टाधानसामर्थ्यं व्रीह्यादौ प्रोक्षणादिजम्। लोकदृष्टिमतिक्रान्तं संस्कारोऽलौकिको मतः॥ संस्कृतं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नाम दैवो वागन्वाख्याता महर्षिभिः। द्वितीयसंस्कारवती संस्कारस्तत्र नादिमः॥ यत्तु शासनयम्यत्वं संस्कारः संस्कृतौ स्मृतः। तत्र सम्यक् चिरं तादृक् संस्कृतस्यावलोकनात्॥ संस्कारस्यास्य केनापि नाद्योत्पत्तिर्विलोकिता। अनादित्वविधावस्या नास्त्यतः प्रतिषेधकम्॥ ईश्वरो वेदकर्त्ता चेन्मास्तामस्या अनादिता। कर्त्तुः प्रामाण्यमेवात्र प्रामाण्यमितये क्षमम्॥ लौकिकालौकिकत्वाभ्यां संस्कृते द्विविधा गतिः। लौकिकत्वं लोकवाचां वेदानां वैदिकी गतिः॥ द्वयोरेवास्ति संस्कारः परमो धर्मसाधनम्। तस्मात् संस्कारकृत्येषु मन्त्रा गीर्वाणवाङ्मयाः। नापभ्रंशमया मन्त्रा विहिताः शास्त्रकोविदैः॥ मन्त्रो हीनो वर्णतो वा स्वरतो वा समुच्चरन्। भूयसे यजमानस्य रिष्टाय परिकल्पते॥ तद्दोषपरिहाराय संस्कृतज्ञानमुत्तमम्। सफला नापरा भाषा शिक्षिता तत्कृतौ क्षमा॥ या च धर्मान्तरस्थानामन्यभाषामयी श्रुतिः। आप्तोपदेशवैधर्म्यात् सा कथं वा प्रमीयताम्॥ भाषान्तरानुवादेन शास्त्रार्थानां विनिर्णयः। कथञ्चिदेव जायेत न तु पूर्वफलं क्वचित्॥ अनुवादकृतो ये स्युर्भ्रमधर्माण एव ते। तेषां पदे पदे भ्रान्तिरन्यथार्थं विनिर्दिशेत्॥ तत्परम्परया नूनं भवेदन्धपरम्परा। मूलानुवृत्त्या भूतार्थः क्वचिद्भायादनन्तरम्॥ स्वमनीषानुरूपेण वचनेनानुवादकाः। विप्लावयन्ति भूतार्थं तत्परैस्तद्भ्रमग्रहः॥ एवं रीत्यानुवादानां भाषान्तरगतिक्रमः। लोकानामुपकाराय मूलं नातो निरर्थकम्॥ एकस्यैव मतिः पूर्वमनुवादं व्यधारयत्। तन्मतौ प्रत्ययः को वा तमोविकलितात्मनः॥ भूतार्थो वा मृषार्थो वा यच्चित्तेन प्रसूयते। नियमाभावतो लोके तत्प्रमाणं कथं चिरम्॥ तस्माद्भूतार्थसन्देहादर्थकारी कथञ्चन। नानुवादो भवेल्लोके मूलं नातो निरर्थकम्॥ किञ्च नानाप्रदेशेषु नानाभाषा व्यवस्थिताः। स्वभावमनुरुन्धानाः प्रचरन्ति सहस्रशः॥ न मद्रजा मारवा वा वङ्गीया वा स्वभाषया। अन्योन्य-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

व्यवहारेण भावं बोधयितुं क्षमाः ॥ नहि सर्वत्र सर्वेषां विषयाणां प्रकृष्टता। प्रकृष्टं यत्र यद्वस्तु ग्राह्यं तस्मात्तदेव हि ॥ किन्तु शिक्षकशिष्याणां परस्परगिरां गतिम्। अविदित्वा कथं सम्यग् व्यवहारसमर्थता ॥ एतदर्थञ्च सर्वासां भाषाणां शिक्षणादिह। संस्कृतस्यैव शिक्षाया अपेक्षा क्रियतां बुधैः ॥ मन्त्राद्यर्थविवेकार्थमवश्यं शिक्षिता हि या। तयैव व्यवहारेण सर्वकृत्यं समञ्जसम् ॥ अतः सर्वप्रदेशार्थमेका संस्कृतभारती। अपेक्षणीया लोकानां मूलं नातो निरर्थकम् ॥ एकतासाधनविधायिका भाषोपयोगिनी। अविदित्वा मनोभावानेकता साध्यतां कथम् ॥ भाषयैव मनोभावः साकल्येन निवेद्यते। विज्ञायते च लोकानां सा चैका सुरभारती ॥ नानाभावमया ग्रन्था नानातत्त्वोपबृंहिताः। निबद्धाः संस्कृतेनैव तेषां संख्यापि दुष्करा ॥ तत्तत्त्वानि विज्ञाय स्फुरितज्ञानलोचनाः। धर्मिणाद्याः कति कति प्राकुर्वन्नद्भुतं भुवि ॥ अर्थतत्त्वं धर्मतत्त्वं यदन्यल्लोकमङ्गलम्। तत् संस्कृतमयग्रन्थनिबद्धमुपलक्ष्यते ॥ कतीनां विज्ञधुर्य्याणां प्रयत्नैः कतिभिर्युगैः। सर्वेषामनुवादः स्यादिति को वा विनिर्णयेत् ॥ सति संस्कृतविज्ञाने यदा यत्तादृशक्रमम्। वस्तु दृष्टिपथं यायात्तदर्थज्ञानतस्तदा ॥ कति नूतनतत्त्वानि मङ्गलस्य कृते भुवः। प्रकाशयितुमर्हन्ति नान्यथा तस्य सम्भवः ॥ संस्कृते बोधशून्यत्वात् सम्प्रत्येव भुवस्तले। दुर्लभाः कति वा ग्रन्था विनश्यन्ति गृहान्तरे ॥ मणिकारमृते को वा मणीनां गुणदोषवित्। भाषान्तरविदां तत्र प्रभुता नास्ति काचन ॥ अतः संस्कृतविज्ञानं लोकानामुपकारकम्। अनुवादान्न तत्सिद्धिर्नातो मूलं निरर्थकम् ॥ अद्यापि कति वा ग्रन्थाः प्राचीना न प्रकाशिताः। यदा प्राकाश्यमेष्यन्ति ते ते दैवाद् यथाक्रमम् ॥ कस्तेषां तत्त्वसन्दोहमस्माकं विवरिष्यति। यदि संस्कृतविज्ञानं तिरोहितमितः क्रमात् ॥ तस्मात् प्रत्येकमेवात्र कर्त्तव्या संस्कृते रतिः। अनुवादान्न तत्सिद्धिर्नातो मूलं निरर्थकम् ॥ देशि-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कीनाञ्च भाषाणामन्यासां न स्थिरा गतिः। युगादीनां विभेदेन भिद्यन्ते भूरिशो हि ताः॥ एकैव या वङ्गभाषा सैव नानाविधक्रमा। वङ्गावान्तरदेशानां विभेदादिति लच्यते॥ श्रीहट्टे कामरूपे वा कुमिल्ला-वरिशालयोः। ढाका-यशोहरादौ च कलिकातादिषु स्थितम्॥ भाषाया विविधं रूपं सर्वा भाषा तु वङ्गजा। ग्रन्थानामनुवादश्चेद् वङ्गभाषामयो भवेत्॥ तत्रत्या कतमा भाषा तत्कृताववलम्ब्यताम्। एकस्या ग्रहणे कृत्यं नान्यभाषाविदां भवेत्॥ देशान्तरगतास्तेन नोपकारमलं गताः। एवं रीत्या देशभाषा येव कृत्ये नियुज्यताम्॥ सैवाकृतार्था सर्वेषां देशानां तत्त्ववेदने। परं देशिकभाषायाः प्रत्यहं सूक्ष्मसूक्ष्मया॥ विधया परिवृत्तिर्यदस्थिरत्वं ततश्चिरम्। शतवत्सरतः पूर्वं देशभाषा हि यादृशी॥ तत्परं तादृशी न स्यादिति प्राप्ता विड़म्बना। तस्मादेवं स्थिते वृत्ते कियत्कालादनन्तरम्॥ नवानुवादनिर्म्माणप्रयासान्मूलसंस्कृते। विज्ञानं सर्वथा श्रेयः समादिशति देहिनाम्॥ सर्वभाषानुवादानां दैवाद् यदि समागमः। किमर्थं व्यर्थयत्नोऽयं स्वल्पायुष्केषु युज्यताम्॥ कदाचिदनुवादेन तत्त्वं स्फुरति वा न वा। अनुवादक आप्तश्चेत्तदा याथार्थ्यसम्भवः॥ एवं स्थिते शास्त्रकृतामनुवादकृतान्तथा। प्रामाण्यज्ञानतस्तत्त्वे प्रामाण्यस्य विनिश्चयः॥ प्रक्रियागौरवं तस्मात् प्रामाण्यस्य विनिर्णये। किमेवं शीर्षवेष्टेन नासिकास्पर्शनभ्रमः॥ जगत्यां का तथा भाषा यस्या माधुर्य्यमीदृशम्। अनुप्रासादिवैचित्र्यादियं सर्वविलक्षणा॥ श्लेषादिविनियोगेन रहस्यार्थप्रवेदने। कस्यां वापरभाषायाः सामर्थ्यं दृश्यतेतराम्॥ सत्त्वशुद्धिकृती शक्ता यथा संस्कृतभारती। काचिदन्या तथा नास्ते स्वभावोऽस्या विलक्षणः॥ प्रश्नस्तत्र कथन्तायाः सुतरां निष्प्रयोजनः। ईदृशी फलसंसिद्धिः कारणानुमितिक्षमा॥ पारिभाषिकशब्दा ये शास्त्रेषु परितः स्थिताः। अपेक्षमाणा व्युत्पत्तिं विवृतिं वा सहस्रशः॥ शास्त्रापेक्षितयान्यत्र भाषायामपि योजिताः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वातन्त्र्यरहिता यस्मान्नातो मूलं निरर्थकम्॥ स्वल्पैरक्षरसङ्घातैः प्रभूतार्थनिवेदने। सामर्थ्यं देवभाषाया भाषान्तरविलक्षणम्। तच्च शिक्षार्थिनां पक्षे शिक्षासौकर्य्यहेतवे। स्वल्पायासेन कृत्यञ्चेद् बह्वायासं नु कः श्रयेत्॥ नानालङ्कारसुभगा स्वल्पाक्षरनिबन्धना। पद्यादिविहितोत्कर्षा प्रथिता सुरभारती॥ तदन्या नेदृशगुणा नातो मूलं निरर्थकम्। सर्व्वेभ्यो विदितोत्कर्षा देवा यां वाचमाश्रयन्॥ सा प्रकृष्टेति विज्ञेषु नोक्तमप्युपतिष्ठते। अद्यत्वे संस्कृतविदां नानादेशनिवासिनाम्॥ यत् परस्परसंवादान्मनोभावनिवेदनम्। यच्चान्योन्यानुभूतार्थसारविज्ञापनक्रमः॥ ते नूनं संस्कृतामेव भारतीमुपजीवतः। साक्षाद् विचारणाशैली प्रश्नोत्तरनिरन्तरा॥ पर्य्याप्ता विषयोद्धारे न लेखादिविवेचना। सा चेयं संस्कृतामेव भारतीमवलम्बते॥ सर्व्वेषां व्यवहाराय नान्या भाषा कदाप्यलम्। गाढ़व्युत्पत्तिमप्राप्ता ये वा संस्कृतवाङ्मये॥ प्राक्तनादेव संस्कारात्तेषां भारतवासिनाम्। संस्कृतार्थस्य विज्ञानं सम्भाव्यमवलोक्यते॥ बहूनां देशभाषाणां दृश्यते संस्कृतान्वयः। संस्कृतज्ञानराहित्ये व्युत्पत्तिस्तत्र नो दृढ़ा॥ तस्माद्देशीयभाषासु दृढ़व्युत्पत्तिसिद्धिदम्। साध्यं संस्कृतविज्ञानं नातो मूलं निरर्थकम्॥ एकः शब्दः सुप्रयुक्तः सम्यग् ज्ञातश्च संस्कृते। ऐहिकामुष्मिकक्षेमसम्पादनफलः श्रुतः॥ तस्मात् सम्यक्तया ज्ञानं संस्कृतानामपेक्षितम्। सम्यगुच्चारणञ्चापि नातो मूलं निरर्थकम्॥ यत्तु संस्कृतभाषाया धनदानासमर्थता। तत एव तदभ्यासे व्यर्थः कालक्षयो नृणाम्॥ देहरक्षार्थसापेक्षा देहः सर्व्वार्थसाधनम्। यया देहः स रक्ष्येत सैव भाषेष्यतामिति॥ तत्रेदमनुसन्धेयं यथा संस्कृतभारती। ऐहिकार्थस्य सम्पत्तिं कथं साधयितुं क्षमा॥ आदौ तावच्चिकित्सायाः शास्त्रमेव समीक्ष्यताम्। येनाश्रितेन लोकेऽस्मिन् प्रभूतधनसम्भवः॥ जीवाः प्रायेण पीड्यन्ते सर्व्वे नानाविधामयैः। तेषामारोग्यलाभार्थमायुर्व्वेदव्यपेक्षणम्॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

जीवनं सङ्कटापन्नमवेच्यार्थव्ययक्रमे। को वा पराङ्मुखो लोके धनं तेनेव लभ्यताम्॥ सूर्य्याचन्द्रमसोर्यत्र साचिता ज्योतिषे चिरम्। धनानामर्जने तच्च ज्योतिषं चमसोच्यताम्॥ भूत-भावि-भवद्वृत्त-ज्ञानार्थं कस्य देहिनः। प्रवृत्तिर्नास्ति लोकेऽस्मिन्नर्थानां व्ययसाधने॥ शास्त्रसारं समुद्धृत्य कृते तदनुसारतः। कृत्ये लोकेष्टलाभश्चेत् का चिन्ता धनसंग्रहे॥ शान्तिस्वस्त्ययनादीनां विधीनां विधिपूर्व्वकम्। विधानात् फलनिष्पत्त्या लब्धव्या भूरिदक्षिणाः॥ वञ्चनाबुद्धिमुत्सृज्य शुद्धिपूर्व्वं कृता क्रिया। समृद्धिं यावदादध्यात्तावदेव धनागमः॥ अस्ति प्राचीनशास्त्रेषु तत्तत्तत्त्वं निगूहितम्। एकान्तप्रणिधानेन तदूह्यं शास्त्रवेदिभिः॥ स्वानिष्टविनिवृत्त्यर्थमद्याप्यस्ति नृणां स्पृहा। फलादर्शनतः सेयं न नियुङ्क्ते क्रियाविधौ॥ अतः प्राचीनसाम्येन तत्त्वानामनुशीलनैः। सामर्थ्ये सति संसिद्धौ श्रद्धां लोके गमिष्यथ॥ असत्यपि ब्रह्मचर्य्ये शिष्याणां भैच्यसंग्रहे। वित्तव्ययेन लोकानामस्ति विद्योपसंग्रहः॥ भृतकाध्यापकस्तेन संवृत्तोऽर्थमवाप्नुयात्। क्षत्रियो राजनीत्याद्यैः सप्रयत्नमुपाश्रितैः॥ रीतिं पूर्वसमां लब्ध्वा समर्थो भूमिपालने। वैश्याः संस्कृतशास्त्रेषु निबद्धकृषिविद्यया॥ वाणिज्याद्यैश्च सम्पत्तिं सम्पादयितुमीशते। शिल्पविद्यासमुत्कर्षो यावान् संस्कृतवाङ्मये॥ तेनाश्रितेन शूद्राणां समृद्धिः सम्भवेदलम्। किमिवं तत्त्वमस्त्यत्र यन्न संस्कृतवाङ्मये॥ ततो लेशेन लेशेन वस्तुसंग्रहकारिणाम्। भाषान्तरानुवादेन यशो भूयः प्रवृत्स्यते॥ तदन्यत्रापि सत्तानामिदं संस्कृतवाङ्मयम्। प्रभूतायोपकाराय नातो मूलं निरर्थकम्॥ अन्योन्यतुलनामूलभाषातत्त्वविवेचना। संस्कृतालोचनोद्भूता व्यतरन्नवपद्धतिम्॥ अद्य यो यो नवो भावः प्रत्नतत्त्वादिपद्धतौ। स सर्वः संस्कृतादेव प्रसूत इति सम्मतम्॥ तन्मूलज्ञानसम्पत्तौ सुकरं सर्व्वमेव तत्। उत्कर्षश्चापकर्षश्च प्रमितौ तत्र भाविनौ॥ अन्यथा पातदर्शिन्या बुद्ध्या तत्त्वविवेचने। प्रमितार्थः सुदुर्बोधस्तत्त्वोन्मादो

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भवेत्ततः ॥ इत्थमालोच्यमानेषु तत्त्वेषु स्थितमीदृशम्। अनुवादान्न सत्यं स्यात् मूलज्ञानमपेक्षितम् ॥

शारीरकभाष्यीयप्रश्नः

प्रष्टा—श्रीरामस्वामी (दाक्षिणात्यः)।

अयि प्रियविद्वन्महोदयाः ! प्रार्थ्यते वेदान्तस्तम्भभूते बहुलपठनपाठनप्रचरद्रूपे शारीरकभाष्ये मुद्रितोपलभ्यमानपुस्तकैकरूप्येण परिदृश्यमानान् कतिचित् पाठानधिकृत्य विहितमत्रालोचनं सुनिपुणं विचार्य्य स्वाभिप्रायो महार्घः प्रकटीक्रियतामिति।

शारीरकभाष्ये १ अध्याये १ पादे १० सूत्रे—"ततः कदाचित् प्रधानकारणवादानुरोधेनापि ईक्षत्यादिश्रवणम् अकल्पयिष्यत्"—अत्र 'अकल्पयिष्यत्' इत्ययं पाठो न साधुः प्रतीयते ; 'कृप कल्पने' इति चौरादिकधातोः कर्त्तरि 'लृङ्'-प्रत्ययेन निष्पन्नस्यास्य पदस्य 'श्रवणम्' इति पदेन कर्त्तृतया कर्मतया वा सम्बन्धासम्भवात्। अतोऽत्र 'अकल्पयिष्यत' इति कर्मणि प्रत्यये कृते, 'श्रवण'-पदेन कर्मतयाऽन्वयः स्यात्। अपि च—'कृपू सामर्थ्ये (योग्यतायाञ्च)' इति धातोः कर्मणि 'लृङ्'-प्रत्ययं विधाय 'अकल्पिष्यत' इत्यस्मिन् पाठे परिगृह्यते साधुतरं भवेदिति मन्यते। (अकल्पिष्यत—योग्यमभविष्यदित्यर्थः)। कोऽत्र निर्णयः ?

१अ० २पा० १९सू०—"अन्यतरपरिग्रहे तु युक्तं 'ब्रह्म पुच्छं प्रतिष्ठा' इत्यत्रैव ब्रह्मनिर्देश आश्रयितुम्"—अत्र 'युक्तम्' इति पदस्य 'ब्रह्मनिर्देशः' इत्येतत्पुंलिङ्गपदान्वयित्वात् पुंलिङ्गान्तत्वं न्याय्यम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

१अ० १पा० १९सू०—"या त्वानन्दमयसन्निधाने 'सोऽकामयत बहु स्यां प्रजायेयेति' इयं श्रुतिरुदाहृता"—अत्र 'प्रजायेयेति' इत्यस्मादनन्तरं द्वितीयम् 'इति' पदं लेखकप्रमादात् पतितम्, 'प्रजायेयेति' इत्यस्मिन् स्थितस्य 'इति' पदस्य श्रुतिवचनाङ्गत्वात्।

१अ० २पा० २३सू०—"भूतयोने रूपमुपन्यसेत् ?"—अत्र 'उपन्यसेत्' इत्यस्मिन् दैवादिकस्य 'असु क्षेपणे' इति धातोः प्रयोगः सर्वसम्मतः। एवं सति, 'उपन्यस्येत्' इत्यनेनैव भाव्यम्। ग्रन्थान्तरेऽपि बहुषु स्थलेषु 'अभ्यसेत्' इत्येवं प्रयोगो दृश्यते। काऽत्रोपपत्तिः ?

१अ० ३पा० १९सू०—"तदविलयनेन तद्विपरीतमपहृतपाप्मत्वादिगुणकं पारमेश्वरं स्वरूपं विद्यया प्रतिपाद्यते, सर्पादिविलयनेनेव रज्ज्वादीन्"—अत्र 'प्रतिपाद्यते' इत्यनेन दार्ष्टान्तिकगतकर्मवाच्यक्रियापदेनान्वयरक्षणार्थं दृष्टान्तेऽपि 'रज्ज्वादीन्' इति द्वितीयानिरासेन 'रज्ज्वादयः' इत्येवमुक्तकर्मणि प्रथमैव विधेया।

१अ० ३पा० २८सू०—"ततश्च राजसूयादिचोदनोपरुन्ध्यात्"—अत्र 'उपरुन्ध्यात्' इत्ययं पाठो न सम्यक्, सकर्मकात् 'रुधिर् आवरणे' इति धातोः कर्त्तृवाच्यनिष्पन्नस्यास्य क्रियापदस्य कर्त्तृत्वेन चोदनान्वयासम्भवात्। अतः 'उपरुध्येत' इत्येवं कर्मणि प्रत्ययोऽत्र कार्य्यः—उपरुद्धा स्यादित्यर्थः।

१अ० ४पा० ३सू०—"अस्यैव जगतः प्रागवस्थायाः प्रधानत्वेनाभ्युपगमात्"—अत्र 'अस्यैव' इत्यस्मिन् 'इदम्'-शब्दस्य 'प्रागवस्थायाः' इत्येतत्पदविशेषणत्वौचित्यात् 'अस्याः' इत्येवं स्त्रीलिङ्गत्वं विधेयम्।

१अ० ४पा० १०सू०—"किन्तु बन्धमोक्षप्रतिपिपादयिषा त्वेषा"—अत्र 'त्वेषा' इत्यस्मिन् 'तु' शब्दः पुनरुक्तः। अत एवं पठनीयम्—"प्रतिपिपादयिषा ह्येषा" इति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

१अ० ४पा० १४सू०—"तथा 'इदं सर्वमसृजत यदिदं किञ्च' इति समस्तजगत्सृष्टिनिर्देशेन प्राक् सृष्टेरद्वितीयं स्रष्टारमाचष्टे"—अत्र प्राक्तनसन्दर्भालोचनेन 'आचष्टे' इति 'लट्'-स्थाने पूर्ववत् 'लङ्'-प्रयोग एव न्याय्यो मन्यते।

२अ० १पा० १सू०—"परतन्त्रप्रज्ञास्तु प्रायेण जनाः स्वातन्त्र्येण श्रुत्यर्थमवधारयितुमशक्नुवन्तः प्रख्यातप्रणेतृकासु स्मृतिष्ववलम्बेरन्"—अत्र 'अवलम्बेरन्' इत्यस्य कर्मापेक्षत्वात् 'स्मृतिषु' इति सप्तमी-स्थले द्वितीयैव युज्यते।

२अ० १पा० ३सू०—"तान्यपि तर्कोपपत्तिभ्यां तत्त्वज्ञानायोपकुर्वन्ति"—अत्र 'उपकुर्वन्ति' इत्येतत्क्रियायोगेन 'तत्त्वज्ञानाय' इति चतुर्थीस्थाने षष्ठीप्रयोगो युक्तः; 'सा लक्ष्मीरुपकुरुते यया परेषाम्' (भारविः ७, २८), 'आत्मनश्चोपकर्त्तुम्' (मेघदूते १०१) 'साधूनामुपकर्त्तुं लक्ष्मीं द्रष्टुं विहायसा गन्तुम्। न कुतूहलि कस्य मनश्चरितञ्च महात्मनां श्रोतुम् ?' (श्रीहर्षः) इत्यादिष्वेवं दर्शनात्।

२अ० १पा० ४सू०—"अनवगम्यमानमेव हीदं लोके समस्तस्य वस्तुनश्चेतनत्वं चेतनप्रकृतिकत्वश्रवणाच्छब्दशरणतया केवलयोत्प्रेचेत"—अत्र 'उत्प्रेचेत' इत्यस्य स्थाने 'उत्प्रेच्येत' इत्येवं कर्मणि प्रत्ययो विधेयः।

२अ० १पा० १४सू०—"न तु स्वतन्त्रं फलाय कल्पयते"—अत्र 'कल्पयते' इत्यस्य स्थाने 'कल्पते' इत्ययं पाठ आदर्त्तव्यो न वा ?

३अ० १पा० १७सू०—"अवरोहाभ्युपगमादसम्पूर्णोपपत्तिः"—अत्र 'असम्पूरणोपपत्तिः' इत्यनेनैव भाव्यम्।

३अ० १पा० २६सू०—"कथमिवानुपचरितं तद्भावमद्यमानान्नानुगतोऽनुशयो प्रतिपद्यते ?"—अत्र 'प्रतिपद्यते' इत्यस्य स्थले 'लिङ्'-प्रयोगः साधीयान् मन्यते न वा ?

३अ० २पा० ३सू०—"क्वचिच्च प्रत्यागसनवर्जितं स्वप्नं श्रावयति

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

—'कुरुष्वहमद्य शयानो निद्रयाऽभिप्लुतः स्वप्ने पञ्चालानभिगतश्चास्मिन् प्रतिबुद्धश्च' इति"—अत्र 'अस्मिन्' इति सर्वनाम्नः 'पञ्चालान्' इति बहुवचनान्तपदपरामर्शित्वाद् बहुवचनान्तत्वमेव युक्तम्।

३अ० २पा० ७सू०—"स्वप्नजागरितयोस्तूपाधिसम्पर्कवशात् पररूपापत्तिमिवापेक्ष्य तदुपशमात् सुषुप्तेः स्वरूपापत्तिर्वक्ष्यते"—अत्र 'सुषुप्ते' इति (७मी) पठनीयम्।

३अ० २पा० ६सू०—"इत्येवमादयः शब्दाः स्वापप्रबोधाधिकारे पठिता नात्मान्तरोत्थाने सामञ्जस्यमीयुः"—अत्र 'ईयुः' इत्येतत् 'लिटः' पदं न समञ्जसम्। अतः 'इयुः' इत्येवं क्रस्वादिः 'लिङ्'-प्रयोगः कार्य्यः।

३अ० २पा० २१सू०—"उत्तरमधिकरणं 'प्रकाशवच्च' एतद्व्यर्थ-मेव भवेत्"—अत्र 'प्रकाशवच्च' इत्यतोऽनन्तरम् 'इति'पदं स्खलितम्।

३अ० २पा० २८सू०—"श्रुत्या चैवंजातीयकानां गुणानामुपा-सनार्थत्वेऽवकल्प्यमाने, न लक्षणया प्रविलयार्थत्वमवकल्पते"—अत्र 'अवकल्प्यमाने' इत्यस्य स्थाने 'अवकल्पमाने' इति पाठो ग्राह्यः।

३अ० २पा० २२सू०—"तच्च परिशिष्यमाणे कस्मिंश्चिद्भावेऽव-कल्प्यते। उभयप्रतिषेधे तु कोऽन्योभावः परिशिष्येत्"—वाक्यद्वये-ऽस्मिन् 'अवकल्प्यते' इत्यत्र 'अवकल्पते'; 'परिशिष्येत्' इत्यत्र च 'परिशिष्येत' इति पठनीयम्।

३अ० २पा० २२सू०—" 'इति'-शब्देन त्वत्र प्रतिषेध्यं किमपि समर्प्यते' नेति नेतीति-परत्वान्नञ्प्रयोगस्य"—अत्र 'नेति नेतीति' इत्यतः परम् अन्यत् 'इति'-पदं च्युतमेव।

३अ० ३पा० १८सू०—"प्राप्तांशपरामर्शस्य नित्यानुवादतयाऽप्यु-पपद्यमानत्वान्न तद्बलेन प्रत्यभिज्ञोपोदितुं शक्यते"—अत्र 'उपो-दितुम्' इत्येतत् पदमसाधु, स्वरूपतश्चार्थतश्चोभयथाऽप्यनुपपद्यमान-त्वात्। लिपिकरप्रमादविचारणायान्तु अक्षररेखासन्निवेशभ्रम-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मूलकत्वप्रतीतिः 'अपोहितुम्' (अप+ऊह्+तुमुन्—अपवदितुम्, अपलपितुम्, अपनोदितुम् इत्यर्थः) इत्येतस्यैव पाठस्य ग्रहणीयत्वं स्वरसतोहृदि स्फुरतीति प्रेक्षावद्भिर्विभावनीयम्।

३अ०३पा०३८सू०—"तत्र ह्यादिमध्यावसानेषु हि कर्मसम्बन्धिचिह्नानि भवन्ति"—अत्र द्वितीयो 'हि'-शब्दोऽधिक एव।

३अ० ४पा० ५१सू०—"साधनवीर्यविशेषात् त्वतीन्द्रिया कस्यचिच्छक्तिराविर्भवति, तत्प्रतिबद्धा परस्य तिष्ठति"—अत्र तच्छब्दस्य 'शक्ति'-पदपरामर्शित्वात् स्त्रीत्वं विधेयम्।

४अ० १पा० ६सू०—यत्तूक्तम्—उद्गीथादिभिरुपास्यमाना आदित्यादयः कर्मभूयं भूत्वा फलं करिष्यन्तीति"—अत्र 'कर्मभूयं गत्वा' इत्यनेनैव भवितव्यम्, "एष दाशरथिभूयमेत्य च" (माघः १४-८१) इत्यादिवत्।

४अ०३पा० १५सू०—" 'अनियमः सर्वासाम्' इत्यत्राविशेषेणैषां विद्यान्तरेष्ववतारिता"—अत्र एतच्छब्देन पूर्ववाक्यस्था 'गतिः' परामृश्यत इत्येतद्व्यक्तमेव ततः 'एषा' इत्येवं पठितुं युक्तम्।

भवभूतिः

लेखकः—सारदारञ्जनराय एम्. ए. विद्याविनोदः

इतः पूर्व्वम् इहैव मया भवभूतेः प्रतिपत्तिम्: अधिकृत्य प्रबन्ध एकः पठितः। यत् यत् तस्मिन् नूतनम् उपन्यस्तम्, यत् यत् च पूर्वोक्तिविरुद्धमुक्तम्, तत्र तत्र विचारोऽपि मया प्रार्थितः। पाठावसाने समालोचनपरेषु सामाजिकेषु एक एव मदुक्तेषु विप्रतिपन्नोऽभूत्। ननु, सन्दिग्धे वा विषये प्रायशो वादप्रतिवादाभ्यामेव निर्णीयते तथ्यम्। तत् सत्यानुसन्धित्सोर्लेखकस्य "प्रतिवादः" इत्येवालं तोषाय।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रबन्धे तस्मिन् प्रधानतो द्वावर्थौ मया निरूपितौ। एकस्तावत्—उत्तरचरितस्य कथमपि नानवद्यं शिल्पम् इति। द्वितीयश्च—न हि कवेः उत्तरचरितं चरमो ग्रन्थ इति।

आद्यमर्थं प्रति मम युक्तयः—प्रस्तावनाया अन्तेऽपि सूत्रधारो नटश्च मञ्चस्थाविव दृश्येते। किञ्च, कठोरगर्भा सीता इति चेत्, बहूनि अनन्तरोक्तानि असङ्गतानि भवन्ति। अपि च, कठोरगर्भतायाः इह प्रसङ्ग एव नास्ति—इत्येवमादयः।

शेषश्चार्थो मया इत्थं समर्थितः—उत्तरचरितस्य कश्चित् शिल्पदोषो मालतीमाधवे परिहृतः। भाषा च मालतीमाधवे मधुरतरा निपुणतरनिबद्धा च। तत् उत्तरचरितात् मालतीमाधवम् अर्वाचीनम्। अपरञ्च, उत्तरचरितस्य अर्वाचीनतां प्रति भरतवाक्यस्थं "परिणतप्रज्ञस्य" इति विशेषणम् आश्रित्य यदपरैरुक्तं तदसङ्गतम्। तत्र "वाल्मीकेः" इत्येव पाठः "तामितां" इत्यपपाठः।

अत्र उभयोरप्यर्थयोर्विवदमानः कश्चन पण्डितवर्य्यः प्राह—प्राचीनो भवभूतिः कथमर्वाचीनैर्विश्वनाथादिभिरुक्तां रीतिमनुसरतु? तत् उत्तरचरिते पात्रप्रवेशात् परमपि सूत्रधारस्य मञ्चे स्थितिः नटस्य च प्रवेशो न शिल्पदोष इति।

नेदं समीचीनम्। आसतामर्वाचीनाः, प्राचीनतरो मुनिर्भरतोऽप्यास्ते। अथवा यातु तत्, इदं तु विचार्य्यम्—सूत्रधारस्य स्थितिरिह युक्ता अयुक्ता वा। यद्ययुक्ता स्वयं भरतेनाप्युक्ता सा हेया एव। अथ युक्ता, प्राचीनमतम् अर्वाचीनमतम् इति नूनम् अनास्था। यत् युक्तं तत् सत्यस्वरूपं नित्यं सच्चिदानन्दस्य ब्रह्मणः अंशविशेषः। कस्तस्य वक्तृवितर्कः, प्राचीनताया अर्वाचीनताया वा को विचारः? उक्तञ्च कविभिः "ननु वक्तृविशेषनिःस्पृहा गुणगृह्या वचने विपश्चितः" "तेजसां न हि वयः समीक्ष्यते" इत्यादि। असति चैतस्मिन् सर्वमुच्छृङ्खलं भवति। "सदा सत्यं ब्रूयात्" इत्यर्वाचीनेन विद्यासाग-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

येणोक्तं कथं प्राचानो राममोहनः अनुसरतु इत्येवमादिकमनिष्ट-मापद्यते ।

प्रस्तुते सूत्रधारस्य स्थितिः अयुक्ता एव । यदेवोक्तम् "आयो-ध्यकोऽस्मि" इति तदेव छापिता तेन सूत्रधारता । तत् कथमुच्यतां सूत्रधारस्य मञ्चे स्थितिरिति ? यो मञ्चे स्थितः नासौ जातु सूत्र-धारः । वस्तुतस्तु सूत्रधारस्य प्रस्थानम्, आयोध्यकरूपेण प्रत्यावर्त्तनञ्च यथा मालतीमाधवे दृश्यते तदेव न्याय्यम् । अन्यथा अपरिहार्य्यः शिल्पदोषः ।

सीतायाः कठोरगर्भत्वे या प्रकरणासङ्गतिः तां प्रति मे प्रति-वादी ब्रूते—कठोरगर्भा इति निषेकाद्दशमे मासि वर्त्तमाना इति नात्र मन्तव्यमिति ।

अत्रोच्यते—कथमन्यथा इह मन्यतां नाम ? पूर्वाह्णे कठोर-गर्भता आख्याता, तदेव चित्रदर्शनम्, अनुपदमेव दुर्मुखागमनं सीताविवासनञ्च, अपराह्णे वाल्मीकितपोवनप्राप्तिः, तदैव सीतायाः प्रसववेदना गङ्गाजले चात्मनिक्षेपः, जले एव कुशलवयोर्जन्म । तथा च सप्तमाङ्के "विश्वम्भरात्मजा देवी राज्ञा त्यक्ता महावने । प्राप्त-प्रसवमात्मानं गङ्गादेव्यां विमुञ्चति ॥" इति "समाश्वसिहि कल्याणि दिष्ट्या वैदेहि वर्द्धसे । अन्तर्जले प्रसूतासि रघुवंशधरौ सुतौ ॥" इति च । तृतीयाङ्केऽपि—"गते लक्ष्मणे सीतादेवी प्राप्तप्रसववेदन-मात्मानं ··· गङ्गाप्रवाहे निक्षिप्तवती तदैव तत्र दारकद्वयं प्रसूता"—इति ।

तत् दशमे मासि एव सीतायाः कठोरगर्भेति निर्देशः, प्रकरणा-सङ्गतिश्च अखण्डिता तिष्ठति, प्राग्वच्च दुःस्थितं शिल्पम् ।

यत् पुनर्मयोक्तं कठोरगर्भतायाः प्रसङ्गो नास्तीति तत्र विप्रति-पन्नः श्रीमान् प्रतिवादी मन्यते—ब्रह्मर्षीणां राजर्षीणाञ्च समा-गमात् अभिषेकोत्सवो दशैव मासान् व्याप्त इति न हि नितरामस्र-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ह्येयम् अनुमानम्। सति च तस्मिन् गर्भस्य पूर्णता अपि सम्भवति—इति।

अत्र ब्रूमः—दश मासान् उत्सव आसीत् इति प्रकरणविरुद्धम्। "अयमभिषेकसमयः" इति यत् सूत्रधारेणोक्तं, तत् अभिषेकात् परं पक्षमात्रस्य कथञ्चित् मासमात्रस्य वा युज्यते वक्तुं नाधिकस्य। यश्च पुनः कालः "अभिषेकसमयः" इति निर्दिष्टः, तत्रैव "प्रेषिता हि स्वगृहान् ··· ब्रह्मर्षयो राजर्षयश्च" इत्युक्तम्। एतेन उत्सवस्य मासाधिकव्याप्तिकल्पना असङ्गता भवति। किञ्च, उत्सवान्ते राजर्षेर्जनकस्य मिथिलाप्रत्यावर्त्तनं समर्थयमानो राम आह—"अनुष्ठाननित्यत्वात्" अयुक्तं तस्येह अयोध्यायां कालातिपात इति। एतेनापि ब्रह्मर्षिभिः राजर्षिभिश्च मासादधिकः कालो न यापितः इत्येव प्रतीयते। अत एवोक्तं कविना "इयतो दिवसान् उत्सव आसीत्" इति न तु "इयतो मासान्" इति। तत् असमर्थिता एव सीतायाः कठोरगर्भता, शिल्पश्च तथैव निरालम्बम्।

यदुक्तं ग्रन्थक्रमं दूषयन् उत्तरचरितस्य च चरमतां व्यवस्थापयिष्यन् श्रीमान् प्रतिवादिप्रवरः प्राह—योऽयम् उत्तरचरिते श्लोकः—"अद्वैतं सुखदुःखयोरनुगुणं सर्वास्ववस्थासु यत्, विश्रामो हृदयस्य यत्र जरसा यस्मिन्नहार्य्यो रसः। कालेनावरणात्ययात् परिणते यत् स्नेहसारे स्थितं, भद्रं प्रेम सुमानुषस्य कथमप्येकं हि तत् प्राप्यते॥" इति,—तरुणः कश्चित् कदापि न तं ब्रूयात्। प्रौढ़स्यैवायं शोभते। तत् कविना नूनं प्रौढ़े वयसि उत्तरचरितं लिखितम्—इति।

अत्रोच्यते—इह विस्मृतं श्रीमता यत् श्लोकोऽयं सप्तविंशवर्षेण युवकेनैव रामचन्द्रेण प्रोक्तः, न हि केनचित् प्रौढ़ेन इति। अपरञ्च, प्रौढ़े वयसि कविना उत्तरचरितं लिखितमिति किमायातमेतेन? प्रौढ़प्रोक्तमुत्तरचरितमिति चेदाग्रहः, प्रौढ़तरप्रोक्तं मालतीमाधवम्

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इत्यपि गृह्यताम्। अन्यत् प्रौढ़प्रोक्तत्वम, अन्यदिदं चरमत्वं नाम। तत् श्लोकोऽयम् उत्तरचरितस्य चरमत्वे हेतुर्भवितुं नार्हति।

भरतवाक्यस्य मदुक्तां व्याख्यां निराकरिष्यन् स विद्वद्वर आह—इह कविं प्रति सामाजिकान् प्रति च किञ्चित् कथनम् आचारः। तत् "शब्दब्रह्मविदः" इति "परिणतप्रज्ञस्य" इति च भवभूतिमेव विशेषयितुमर्हतः—इति।

अत्र पृच्छामः—अथ कीदृशोऽयमाचार उत्तरचरिते प्रार्थ्यते यो वीरचरिते मालतीमाधवे च नाद्रियते? अथवा भवतु आचार एव। मद्रीत्या यदा वाल्मीकिर्विशिष्यते, तदापि "अभिनयैर्विन्यस्तरूपामिमाम्" इति भवभूतेरेव कृतिर्लक्ष्यते। कृतिलक्षणाच्च कर्त्तृलक्षणम् इत्यनुसृत एव आचारः। अधिकन्तु "शब्दब्रह्मविदः" इति परिह्वतं भवभूतेरसङ्गतं विशेषणम्।

अतः परं मदीयाया व्याख्याया मूलोच्छेदमिव कर्त्तुमुक्तम्—"तामिताम्" इत्येवेह पाठः, "वाल्मीकेः" इत्यपपाठः—इति।

अत्रोच्यते—"तामिताम्" इति पाठे एष तावत् श्लोकः—"पाप्मभ्यश्च पुनातु वर्द्धयतु च श्रेयांसि सेयं कथा, मङ्गल्या च मनोहरा च जगतो मातेव गङ्गेव च। तामेतां परिभावयन्त्वभिनयैर्विन्यस्तरूपां बुधाः, शब्दब्रह्मविदः कवेः परिणतप्रज्ञस्य वाणीमिमाम्॥" इति। "सा इयं कथा। ताम् एताम् इमां वाणीं परिभावयन्तु" इति च पदसम्बन्धः। तत्र पूर्वार्द्धे 'सा' इति तच्छब्देन प्रसिद्धं किञ्चिल्लक्ष्यते, तच्च परोक्षम्। "इयम्" इति तदेव परोक्षम् इदमा सन्निधाप्यते। यद्येवम्, उक्ता प्रसिद्धिः, निरस्ता च परोक्षता, तत् उत्तरार्द्धे 'ताम्' इति तच्छब्देन किं क्रियताम्? नूनमिह असङ्गतं 'ताम्' इति। किञ्च इह अन्वादेशपरमुत्तरार्द्धम् इति एनादेशप्रसङ्गात् 'एताम्' इत्यपि दुष्टम्। अपि च "ताम्" "एताम्" "इमाम्" इति युगपत् प्राप्तं दुरन्वयं सुधियामुद्वेगकरं पदत्रयम्। पक्षान्तरे "वाल्मीकेः"

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar.

Digitized by Arya Samaj Foundation Chennai and eGangotri

इति पाठे "सा इयं कथा। इमां वाल्मीकेः वाणीं परिभावयन्तु": इति पदान्वये सुस्थितं सर्वं न सङ्कटं किञ्चित्। एवं सति "वाल्मीकेः" "तामेतां" इत्येतयोः कोऽत्र अपपाठः इति विद्वद्भिः परिचिन्त्यताम्।

अपरञ्च इह "परिणतप्रज्ञस्य" इत्यपि न हि सर्वसम्मतः पाठः। "परिणतां प्राज्ञस्य" इति तु वीरराघवेण पठ्यते। इत्थं पाठ एव चेत् सन्दिग्धः, अशरणं तदाश्रयमनुमानम् इति निर्मूला उत्तरचरितस्य चरमत्वकल्पना।

इदञ्चापरं सामान्यत उक्तं प्रतिवादिना—भक्तोऽहं भवभूतेः अतः पूज्या मम तदुक्तय—इति। अत्रोच्यते—सर्वथा सुखमेधतां भक्तिर्मा च भूत् पूजापरिहाणिः। परं सर्वमिदं तस्य गुणेष्वेव भूयात्। उक्तञ्च कविना "गुणाः पूजास्थानं गुणिषु न च लिङ्गं न च वयः" इति। यस्तु दोषः स वाच्य एव। "शत्रोरपि गुणा वाच्या दोषा वाच्या गुरोरपि"। तत् दोष एवास्तु दोषः, माभूत् दोषेषु पक्षपातनिबन्धना गुणभावना।

अलं बहुना। इहैव वचः संह्रियते। अदोषं सदोषं वा उक्तम् इति विचारयन्तु सन्तः, प्रतिबोधयन्तु च मां कृपया यदि दृश्यते दोषः, तत एव हि मे परितोषः। इति।

वल्लीविलासम्

लेखकः—स्वर्गतः रामसत्यकाव्यव्याकरणवेदान्तदर्शनतीर्थः

सान्ध्यं गन्धं हृतवति चले गन्धवाहे वसन्ते
काचिद्वल्ली व्यथितहृदया भूमिलग्नाङ्गयष्टिः।
संङ्गाशंसातरलमनसं मञ्जुगुञ्जन्तमन्ते
भृङ्गाधीशं मधुरमधुरं प्रीतिपूर्णं जगाद ॥ १ ॥
भो भो भृङ्ग! प्रणयसरसीमग्नकादम्बराज?
कान्तामेनां भवति नितरां सानुरागामवेहि?

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मूढो वायुः सपदि यदि तां गन्धभूषापहारी
भूयो भूयोऽभिभवति तदा किं क्षमा ते क्षमास्मिन् ॥ २ ॥
नूनं धीर ! त्वयि मधुकरी सादरोदारभावा
चेतः शुद्धं यदि च भवतोऽप्यत्र बद्धानुकारि ।
हंहो त्वमस्तदपि मधुना मत्प्रदत्तेन गन्ध-
प्रत्याहृत्यै व्रज करुणया चौरगम्यं दिगन्तम् ॥ ३ ॥
योषावाक्यं प्रभवति सदा भर्त्तरीहप्र शान्ते
मत्वेत्येवं मनसि भवतो मास्तु मन्दाचलेशः ।
पाथोजिन्या निशि हिमरुचा क्लिष्टया संस्मृतोऽपि
प्रातःसूर्य्यः क्षिपति जलधौ तं विपक्षं करौघैः ॥ ४ ॥
यो मां शीर्षे वहति नियतं वृक्षराजो विशालः
तस्यैवाग्रे प्रियतम भवच्चित्तमानन्दयामि ।
एतत्पश्यन् मुकुलपुलकैरञ्चितोऽयं रसालः
क्रोधादुद्वेजयति मतिमन् मामितः पश्य पश्य ॥ ५ ॥
क्रूरे धिक् त्वामपरकलुषालिङ्गनासक्तचित्ता-
मित्थं गर्हापरवशरुवत्कोकिलास्योऽपि चायम् ।
उच्चैः सर्व्वं भुवनमसकृज्ज्ञापयन् कम्पिताङ्गः
किं किं नो मा मधुपललनां भाषते प्राणकान्त ! ॥ ६ ॥
बद्ध्वा शाखा वलिभिरनिशं पाणिभिर्मां कठोरे
धत्ते तुङ्गे वपुषि च दिशन्नात्मनः सेवकत्वम् ।
एतत्सर्व्वं तृणमिव मया मन्यते यस्य शान्त्यै
स त्वं बन्धुर्विलससि पुरो रे मनो मा शुचस्त्वम् ॥ ७ ॥
जाने जाने मयि तव दयां जीवितेश ! प्रकामं
यामालोक्य ज्वलति शतशश्चूतकः शक्तिहीनः ।
धन्यो धन्यस्तव च नितरां गाढभावानुभावो
यत्सम्पर्कादहमपि कृतार्थाऽस्मि संसारसारः ॥ ८ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

एषा सन्ध्या तिमिरवसना पद्मिनीशेन सार्द्धं
सम्भोगार्थं प्रविशति मुदा पश्य रत्नाकरान्तः ।
हा हा बाले नलिनि रविणा वञ्चितासीति शोक-
व्याहारः खे चरति पततां तत्प्रयाणे यतस्व ॥ ९ ॥
नायं चौरो मम सुभगतां केवलं हन्ति किन्तु
त्वत्सर्व्वस्वं हरति सहसा व्याप्तदिक्चक्रबालः ।
हृद्यं यद्यन्मृदुल-कुसुमं संस्पृशेदेष पापः
तत् किं न स्यात् सरल भवतः पेय-निष्यन्दहीनम् ॥ १० ॥
सान्द्रानन्दं पवनहतकं गूढमन्विष्यतस्ते
नूनं श्रान्तिर्नहि नहि भवेद्भूयसी भृङ्गराज !
वृक्षश्रेण्यो गहनविटपैरङ्ग तं दुर्विनीतं
दर्पोद्दामं मुहुरपि पुरो यन्निरोत्स्यन्ति साधो ॥ ११ ॥
नानाकाराः पथि नयनयोः स्निग्धपीयूषधाराः
फुल्ला वल्ल्यः प्रतिदिनमहो प्राणिनः प्रीणयन्ति ।
तासां शोभां मधुकरवर ! प्रेक्ष्य धूर्त्तः समीरो
मुग्धस्वान्तः क्षणमपि न किं विस्मरेदात्मकार्य्यम् ॥ १२ ॥
स्त्रीणामेषा जयति सहजा हारितास्यां त्रिलोक्यां
दुर्द्दान्तानां भवति मृदुता यत्समालोकनेन ।
चण्डो ध्वान्तप्रचयमथने चण्डरश्मिर्नलिन्यां
सौम्यालोकः प्रथयतितरामेतदानन्ददायिन् ॥ १३ ॥
प्रालेयानामपगमवशात् सम्प्रसन्ना निशायां
दिक्सुन्दर्य्यो वियति रसिक ! स्वागतं ते विभाव्य ।
अङ्के रम्यां शशधररुचिं धारयन्त्यः सलीलं
आधास्यन्ते कमपि भवतो मानसे भृङ्ग ! हर्षम् ॥ १४ ॥
पन्थानं ते सुखरपयसां दीर्घतोयाशयानां
हन्दान्यत्र मधुप कथयिष्यन्ति मा संशयो भूः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मन्दं मन्दं वहन-समये तस्करेणानिलेन
जङ्के तेषामपि खलु हठात् सञ्चरः शीकराणाम् ॥ १५ ॥
अम्भोजानां दिवसविलयान्मुद्रितानां दलाली-
रुद्धाः क्लान्ता यदि मधुकरास्तत्र ते बन्धवः स्युः ।
सम्भाव्यैतानमृतलहरीसोदरैर्वीक्ष्यजालैः
व्याकुर्व्वीथा दयित ! नु तदा वत्सलत्वं स्वकीयम् ॥१६॥
त्वां विज्ञाय द्रुतगतिरसौ यद्यपि स्यात्तथापि
गन्धास्ते ते गमनपदवीं तावकीं निर्द्दिशेयुः ।
आपन्नानां प्रकृतिरिति यत् प्रेक्षमाणाः स्वपक्षं
सर्व्वं व्यक्तं विदधति यथाशक्ति ते मुक्त्युपायम् ॥ १७ ॥
इत्थं संसूचितगतिमलिन्दच्छिणाशाकलङ्कं
गर्व्वोत्कर्षाविमतधरणीमण्डलं द्रागुपेत्य ।
लोकज्ञानां प्रथम ! विधिवत् साधयित्वा स्वकार्य्यं
प्रत्यावृत्तो भव मम हृदाकाश-शोभी सुधांशुः ॥ १८ ॥
नान्या याञ्चा तव चरणयोः सेविकाया ममाद्य
चापल्यं मेऽशरण शरण ! क्षम्यतां नाथ नाथ !
व्याहृत्यैवं पवनदलनान्मूर्च्छितायामकस्मा-
दस्यामिन्दुः कर-विततिभिस्तां विदूनां सिषेवे ॥ १९ ॥

(सावशेषम्)

गुरुशिष्यसंवादः

(आषाढ़मासादनुवृत्तः)

लेखकः—श्रीशरत्कमलन्यायस्मृतितीर्थः

गुरुः । "द्विजातेरेवोपनयनसंस्कारो न तु शूद्रादे"रिति प्रतिपादितम् । औपनिषदजाबालसत्यकामवृत्तान्तेन शूद्रादेरप्युपनयन-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्काराईतया यस्तावद् वेदाध्ययनाद्यधिकार आक्षिप्तस्तत्परिहारोऽपि विस्तरशः कृतः। अतः परं श्रीमतां का जिज्ञासा ?

(पूर्व्वपक्षः)

शिष्यः। जाबालसत्यकामवृत्तान्तेन शूद्रस्य वेदाध्ययनाद्यधिकारो न प्रतिपादयितुं शक्यते, किन्तु प्रमाणान्तरेण वैदिकेन सोऽधिकारः प्रतिपादित एव।

गुरुः। किं तत् प्रमाणान्तरम् ?

(१)

शिष्यः। उच्यते। तथाहि शुक्लयजुर्व्वेदीयो २६अ० २मन्त्रः। मन्त्रः—"यथेमां वाचं कल्याणीमावदानि जनेभ्यः। ब्रह्मराजन्याभ्यां शूद्राय चार्य्याय च स्वाय चारणाय च। प्रियो देवानां दक्षिणायै दातुरिह भूयास मयं मे कामः समृद्ध्यता मुपमादो नमतु।"

अस्यायमर्थः—"इमां कल्याणीं वाचं" निखिलभूतहितकारिणीं वेदवाणीं "यथा" "ब्रह्मराजन्याभ्यां" ब्राह्मणाय, क्षत्रियाय, "अर्य्याय" वैश्याय "आवदानि"-ब्रवीमि, (तथा) शूद्राय च "आवदानि"ब्रवीमि। एवं यथा "स्वाय" आत्मीयाय "आवदानि" तथा "अरणाय च" पराय च शत्रवेऽपीत्यर्थः, "आवदानि"। "अरणः" अपगतोदकः शत्रुः, नास्ति रणः शब्दो येन सह वाक्सम्बन्धरहितः शत्रुरिति वा।

व्याख्यातवेदमन्त्रेण ब्राह्मणादेर्यथा वेदाध्ययनाद्यधिकारस्तथा शूद्रादेरपीति सुस्पष्टमुपलभ्यते। एवं यथा—आत्मीयजनाय वेदकथनं तथा शत्रुजनायापि। युक्तञ्चैतत्, कथमन्यथा वेदवचसो वर्णितब्राह्मणादिशत्रुमित्रनिखिलभूतकल्याणकरत्वमुपपद्यते नाम ? अपि च—द्विजातिमात्राधिकारव्याख्याने—(१) "शूद्राय" (२) "अरणाय च" इति पदद्वयं व्यर्थं स्यात्। ततश्च शत्रुमित्रेभ्यः सर्वेभ्य एव वेदवाणीकथनश्रवणात् सर्वेषामेव तत्राधिकारः (न केवलं द्विजातेः) शत्रुत्वमित्रत्व-सम्बन्धस्य जातिविशेषाननुगततया सर्वजाति साधा-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रणत्वात्। एवञ्च सर्वजातेर्वेदाध्ययनाद्यधिकारसिद्धौ शूद्रादेरुपनयनसंस्कारोऽपि सिद्धः उपनयनपूर्वकत्वाद् वेदाध्ययनस्य।

(२)

(क) अपि च बृहदारण्यकोपनिषदि मैत्रेयीं प्रति ब्रह्मोपदेशः श्रूयते—"आत्मा वारे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः" (४।५।६) इत्यादिः।

(ख) ब्रह्मविदा याज्ञवल्क्येन च सह वाचक्नव्या गार्ग्या ब्रह्मविचारः श्रूयते (बृहदारण्यकोपनिषदः—अध्याये ६.८ ब्राह्मणं द्रष्टव्यम्)। एवं वैदिकसंहितायां "विश्ववारादि" याज्ञिकत्वमाम्नातम्। आत्रेयीप्रभृतीनामपि निगमान्त-विद्याद्यधिकारः प्रसिद्धः।* ततश्चैतेन स्त्रीणामुपनयनसंस्कारद्वारा ब्रह्मचर्य्य-वेदाध्ययनादि सुस्पष्टमवगतम्।

(ग) स्मृतञ्चैतत् परमर्षि-हारीतेनापि यथा—"द्विविधाः स्त्रियः, ब्रह्मवादिन्यः सद्यो वध्वश्च। तत्र ब्रह्मवादिनीनामुपनयनमग्नीन्धनं स्वगृहे भैक्ष्यचर्य्येति। सद्यो वधूनामुपनयनं कृत्वा विवाहः कार्य्य" इति। महर्षि-यमेनापि स्मृतमेतद् यथा—

"पुराकल्पेषु नारीणां मौञ्जीबन्धनमिष्यते।
अध्यापनञ्च वेदानां सावित्रीवाचनं तथा॥"

एवञ्च स्त्रीणामुपनयनसंस्कारद्वारा ब्रह्मचर्य्यं वेदस्याध्ययनमध्यापनञ्च श्रुतिस्मृतिप्रमाणसिद्धमिति शूद्रस्याप्युपनयनसंस्कारद्वारा ब्रह्मचर्य्यपूर्व्वकवेदाध्ययनादि सर्वमेव सिद्धं भवति स्त्रीभिः सह शूद्रस्य शास्त्रेणैव समानत्वस्य प्रतिपादितत्वात्। ततश्च शूद्रादेरुपनयनसंस्कारो नास्तीति सिद्धान्तः कथमपि नोपयुज्यते नामेति।

---

* "अस्मिन्नगस्त्यप्रमुखाः प्रदेशे, भूयांस उद्गीथविदो वसन्ति।
तेभ्योऽधिगन्तुं निगमान्तविद्यां वाल्मीकिपार्श्वादिह पर्य्यटामि॥"
(उत्तररामचरितनाटकस्य द्वितीयाङ्कीयविष्कम्भके आत्रेयीवाक्यम्।)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(सिद्धान्तः)

गुरुः। न तावच्छूद्रादेरुपनयनसंस्कारो वेदाध्ययनादिकमपीति स्पष्टः शास्त्रीयः सिद्धान्तः। भवता प्रमाणतया उपन्यस्ते शुक्लयजुर्वेदीयमन्त्रे उपनयनसंस्कारस्य तथा वेदाध्ययनादेर्वार्त्तालेशोऽपि न श्रूयत इति कथं तेन शूद्रादेरुपनयनसंस्कारद्वारा वेदाध्ययनादिकं प्रमाणितमिति मन्यते? तथाहि तन्मन्त्रस्य पूर्वमन्त्रे परमात्मानं प्रति, परस्मिंश्च मन्त्रे बृहस्पतिं प्रति यजमानस्य प्रार्थना श्रूयते। अपि च तन्मन्त्रस्यापि शेषभागे प्रार्थनाविशेष एवावगम्यते। तथाहि—तन्मन्त्रस्य शेषभागस्यायमर्थः—"यतोऽहं ब्राह्मणादिभ्यः कल्याणीं वाचं" परमात्मानं प्रति पूर्वमन्त्रोक्तप्रार्थनारूपां वाणीं वदामि, ततोऽहं "देवानां प्रियो भूयासम्" "इह" संसारे, "दक्षिणायै" दक्षिणाया "दातुश्च" प्रियो भूयासम्, देवा दक्षिणादातारश्च मयि प्रीतिं कुर्वन्तु इत्यर्थः। किञ्च "मे" मम "अयं कामः समृद्ध्यतां" सफलो भवतु। "उप मा अदः नमतु" "अदः" इति यः काम इष्यते स उच्यते तद् यथा उपनमतु मां प्रति देवदत्तः १।

एवञ्च "यथेमां कल्याणीं वाच"मित्येवं मन्त्रस्यादौ मध्ये परस्मिंश्च कुत्राप्युपनयनसंस्कारद्वारा शूद्रादेर्वेदाध्ययनाद्यधिकारवार्त्तालेशोऽपि नास्तीति सिद्धम्।

१। उवटाचार्य्यमहीधराचार्य्यप्रणीतं भाष्यम्। तैस्तु आचार्य्यैः "इमां कल्याणी"मित्यस्य "अनुद्दे जिनीं दीयतां भुज्यतामित्येवमादिका"मित्यर्थः कृतः। तस्यायं भावः—आदौ देवपित्रादिभ्यो दानं पश्चात्तदवशिष्टभोजनमुचितम्। अन्यथा अकल्याणमवश्यम्भावि, "यज्ञशिष्टाशिनः सन्तो मुच्यन्ते सर्वकिल्बिषैः। भुञ्जते ते त्वघं पापा ये पचन्त्यात्मकारणा"दित्युक्तेः, तस्माद् देवतादिभ्यो दीयतां पश्चात्तद्दत्तावशिष्टं भुज्यतामित्येवंरूपा इयं कल्याणी वागस्माभिः दक्षिणाया ग्रहीतृभिः पुरोहितैर्यजमानेभ्यो ब्राह्मणादिभ्य आत्मीयेभ्यः शूद्रेभ्यश्च यत उक्ता ततो देवादीनां दातॄणाञ्च प्रियत्वमस्माकमवश्यम्भावि। कामनायाश्चास्मदीयायाः सफलताप्यवश्यम्भाविनीति पुरोहितानामाशंसामेव वदति तादृशो मन्त्रो न तूपनयनसंस्कारद्वारा शूद्रादिभ्यो वेदवाणीदानमिति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तथाहि अस्य मन्त्रस्य पूर्वमन्त्रे उपनयसंस्कारस्य वेदाध्ययनादेर्वा प्रसङ्गलेशोऽपि नास्ति। स मन्त्रो यथा—"अग्निश्च पृथिवी च संनते ते मे संनमतामदः। वायुश्चान्तरिक्षञ्च संनते ते मे संनमतामदः। आदित्यश्च द्यौश्च संनते ते मे संनमतामदः। आपश्च वरुणश्च संनते ते मे संनमतामदः। सप्त संसदो अष्टमी भूतसाधनी सकामाँ। अध्वनस्कुरु संज्ञानमस्तु मेऽमुना"। शुक्लयजुर्वेदसंहिता।२६।१।

अस्यायमर्थः—"अग्निश्च पृथिवी च सन्नते"—सन्नमनं सन्नतिः प्रह्वीभावः—आनुकूल्येन प्रवृत्तिः। अग्निश्च पृथिवी च सम्भोगार्थं संनमति, कस्मादतो ब्रवीमि—ते अग्निपृथिव्यौ मे मम सन्नमताम्—अत्र णिचो लोपश्छान्दसः। सन्नमताम्—सन्नमयताम्—वशवर्त्तिनं कुरुतामित्यर्थः। "अदः"—इति पुरुषादेर्विशेषनायोपलक्षणम्। द्वितीयान्तश्चोपलक्षयति कर्म्मभावात्। एवमुत्तरेष्वपि योज्यम्। वायुश्चान्तरिक्षञ्च आदित्यश्च द्यौश्च आपश्च वरुणश्च सप्तसंसदः परमात्मा उच्यते। यस्य तव सप्त संसदः सप्त संसदानि प्रकृतानीत्येवम् अग्निपृथिवीवाय्वन्तरिक्षादित्यद्युलोकाम्बुवरुणान्तानि। यस्य तव अष्टमी बभूव भूतानां साधनी पृथिवी। नहि पृथिवीमन्तरेण भूतानामुत्पत्तिरस्ति। तत्—त्वं प्रार्थ्यसे—सकामान् अध्वनः कुरु, सकामान् मार्गान् अस्माकं कुरु—यदा हि तैर्लभ्यते तदा सकामा मार्गाः स्युः। "संज्ञानं"—सङ्गतञ्च ज्ञानम् अस्तु मे मम—अमुना—विशेषनामाभिप्रायमेतत्। विज्ञानात्मा वा उच्यते—यस्य तव सप्त संसदः—मनश्च बुद्धिश्च पञ्चबुद्धीन्द्रियाणि च, अष्टमी च वाक्—भूतसाधनी भूतप्रज्ञप्तिकरी। तं त्वां ब्रवीमि—सकामान् अध्वनः कुरु अस्माकं—संज्ञानञ्च अस्तु मे अमुना। *

उद्धृतमन्त्रे उपनयनसंस्कारस्य वेदाध्ययनादेर्नामापि न श्रूयते, तथा तन्मन्त्रस्य ("यथेम"मित्यादिमन्त्रस्य) परमन्त्रेऽपि। तथा च

* उवटाचार्य्यकृतभाष्यम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स चायं मन्त्रो यथा—"बृहस्पते अति यदर्य्यो अर्हाद्द्युमद् विभाति क्रतुमज्जनेषु। यद्दीदयच्छवस ऋतप्रजात तदस्मासु द्रविणं धेहि चित्रम्। उपयामगृहीतोऽसि बृहस्पतये त्वा। एष ते योनिर्बृहस्पतये त्वा।"

अस्यायमर्थः—"ऋतात्" सत्यात्—हे ऋतप्रजात! ब्रह्मणः सकाशात् प्रजातं प्रकृष्टं जातं जन्म यस्य स ऋतप्रजातः। हे बृहस्पते! "बृहतां" वेदानां "पते" पालक! "चित्रम्"—नानाविधं, "तद् द्रविणं" "अस्मासु" यजमानेषु, "धेहि" धारय स्थापय देहीत्यर्थः। तत् किम्? "अर्य्यः"—स्वामी "यद्धनम्" "अर्हति"—पूजयति ईश्वरयोग्यं धनं देहीत्यर्थः, यद्धनं "जनेषु" लोकेषु "विभाति" विविधं शोभते। कीदृशं धनम्? "द्युमत्" द्यौः कान्तिरस्य अस्ति इति द्युमत् "क्रतुमत्" क्रतवो यज्ञा विद्यन्ते येन तत्, येन यज्ञाः क्रियन्ते तादृशं धनं देहीत्यर्थः। यद्धनं "शवसा" बलेन "दीदयत्" दापयति प्रापयति वा धनान्तरं तद्धनं देहीत्यर्थः। "उपयामेन" पात्रेण "गृहीतोसि" "बृहस्पतये" अर्थाय "त्वा" गृह्णामि। स्थापयति एष ते योनिः स्थानम्। बृहस्पतये त्वां सादयामि। *

व्याख्यातमन्त्रेण बृहस्पतिं प्रति यजमानस्य प्रार्थना श्रूयते। ततश्चास्मिन्नपि मन्त्रे उपनयन-संस्कारस्य वेदादिदानस्य वा प्रसङ्गलेशोऽपि नोपलभ्यते इति सुस्पष्टम्। ततश्च "यथेमां कल्याणीं वाच" मिति भवदुक्तो मन्त्रस्तदाद्यन्तमन्त्रौ चोपनयन-संस्कारद्वारा शूद्रादिभ्यो वेदादिदानं न कथयन्तीति भवदुपन्यस्तः पूर्व्वपक्ष उन्मत्तप्रलाप एवेति सिद्धम्।

आदिमध्यान्तपर्य्यालोचनमकुर्व्वतां वेदाङ्गाद्यजानतां स्वेच्छापरतन्त्रव्याख्यातॄणां मतमास्थाय पूर्व्वपक्षो न करणीयः, तादृशाचरणेन पूजनीयो वेदः प्रहृत एव स्यात्—तदेतदुक्तम्

"बिभेत्यल्पश्रुताद्वेदो मामयं प्रहरिष्यति"। इति।

योषित्सादृश्येन शूद्रादेरुपनयनवेदाध्ययनादे यत्प्रमाणमुन्यस्तम्। तदालोचनमागामिनि दिवसे करणीयमिति॥ (क्रमशः)

* महीधराचार्य्यकृतभाष्यम्। विस्तृतिभयाद् भाष्यकारादेः सर्वं वाक्यं नोद्धृतम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नलदमयन्तीयम्

(पूर्वतोऽनुवृत्तम्)

(नेपथ्य)—अज्जा ! पलित्ताअध पलित्ताअध कुमालो इन्दसेणो ।

नलः—कुतः परित्रातव्यः ?

(नेपथ्ये)—तस्स बालअस्सुलहं लत्तपलिच्छदं पेक्खिअ कुपिदादो महिसादो ।

नलः—(ससम्भ्रमं) अये कुमार इन्द्रसेन इति नलहतकस्य कुलप्रतिष्ठा, कुतः खल्वायुधम् ? अथवा अलं महिषविन्नासनार्थं नलस्य आयुधेन ।

(पुनर्नेपथ्ये)—हा हा ! एसो दुस्सिवालो अदिनित्तं पच्चासण्णो, ता सिग्घं पलित्ताअध ।

नलः—अभयम् अभयं कुमारस्य, एष नलस्तस्य परित्राता ।

[निष्क्रान्तः] ।

प्रविश्य विदूषकः—अहो मन्दारकस्य निपुणवेदित्वम् ! यदेव मनसा कल्पितं, तदेव समुपनतं, कुमारम् इन्द्रसेनं पुरुषेण सह क्रीड़ोद्याने विहरन्तमुपलभ्य प्रियवयस्यं तत्र प्रापयितुं मयैव दुरन्तः सैरिभः प्रयुक्तः, तन्नूनं दृष्टातिसामर्थ्यं इन्द्रसेन एव तं निवारयिष्यति, परम् अनुषङ्गतः पितापुत्रयोः सुसम्बन्धः सम्भविता । भवतु, वयस्य, अद्य सम्भ्रमादात्मानं समुद्घाटितवानसि, अद्य सफलाः सर्वे परिश्रमाः मन्दारकस्य ! वयस्य, कियच्चिरं वञ्चितोऽस्मि ते सौहार्दपरिष्वङ्गात् । भवतु इदानीं क्रीड़ोद्यानं गत्वा विनीतविषादो भवामि । [निष्क्रान्तः] ।

(ततः प्रविशति पुरुषेणानुगम्यमान इन्द्रसेनः नलस्य तं करं गृह्णन्)

इन्द्रसेनः—आर्य, किमत्र विस्मयं वहसि ? क्षत्रियकुलाङ्कुरोऽहम् अधिगतधनुर्वेदः, सैरिभ इति लघीयं मात्रा । मम हि—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नलो वीराग्रणीस्तातो वीरसेन: पितामह: ।
भीमो मातामहो भीम: स्वयं शास्त्रे गुरुर्वर: ॥

नल:—वत्स, ललितं जल्पसि, अथ पृच्छामि कुतस्त्योऽयं वीराग्रणी: नलो नाम, यं तातत्वेन व्यपदिशसि ?

पुरुष:—अम्मो ! कुमालस्स तादं नलं ज्जेव एसो ण आणादि ? ता कोदिसो एसो ?

इन्द्रसेन:—आर्य्य, मम तातं नलमेव नावधारयसि ? यद्येवं श्रूयतां तस्य मम त्रिलोकैकवीरस्य तातस्य—

क्रोधाद्धनुर्ध्वनिविघूर्णितवातचक्रं
दृष्ट्वा त्रसन्ति सुरवैरिगणा विवर्णा: ।
संसारभङ्गमवधार्य्य भयेन धाता
सोत्कण्ठतामिव समाश्रयते प्रकामम् ॥

अपिच— यत्पुण्यकीर्त्तिपरिपाकवशात् पृथिव्यां
नामापि पापसुहृदामभवद् विलुप्तम् ।
गायन्ति वासवसभासदने विनीता
विद्याधरा: सपदि यस्य गुणोपचारान् ॥

नल:—किमेवं कुमारो निषधेषु पुरा विश्रुताधिकारमाक्षिपति ?

इन्द्रसेन—अथ किम्,त्रिलोकविश्रुतपराक्रमं निषधराजमेव स्मरामि !

नल:—आम् ! एष ते तथाभूतस्तात: ?

इन्द्रसेन:—कथमिव ?

नल:—आम् ! एष तु विज्ञात एव।

इन्द्रसेन:—आ: ! किमेवमज्ञाततत्त्वोऽपि विज्ञानाभिमानिताम् आत्मन: प्रदर्शयसि ? धिक् शान्तम् !

नल:—कुमार ! कथमज्ञाततत्त्वो भवामि ?

इन्द्रसेन:—अन्यथा कथं तातस्य नलस्यापि कीर्त्तिमभूतामिव मन्यसे ? नूनमविदित एव ते मदीयस्तात: !

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नलः—कुमार, अलमत्र क्रोधेन, मया स एव नलो विज्ञायते, येन द्यूतव्यसनविनिर्जितेन राज्यं परित्यज्य कान्तारमाश्रित्य बुद्धिदोषादात्मनो निःसहाया धर्म्मपत्नी विसर्जिता, तद् यदि नायं तातो व्यपदिष्टस्तदा को वात्र मे मत्सरः ?

इन्द्रसेनः—किमेवं प्रलपसि ? स एव मे तातस्त्रिभुवनविख्यातकीर्त्तिः। यच्च तस्य दोषमुपक्षिपसि, तत्र तु कारणं नानुसन्धत्से ?

नलः—कीदृशं कारणं तत्र श्रीमता समुपलब्धम् ?

इन्द्रसेनः—कलिनिग्रहस्तत्र कारणम् !

नलः—अथ स्वयमेव पितुः कलिना निग्रहं शंसन् अस्य त्रिलोकविश्रुतं वीर्य्यं किं न मलिनयसि ?

इन्द्रसेनः—धिक् प्रहसनम् ! भद्र, अलमुत्तरोत्तरेण, यथागतं प्रतिनिवर्त्तस्व, किमेवं नलात्मजं मामिन्द्रसेनं समुद्दीपयसि ?

नलः—अये ! कुपित एव मे वत्सः परिलक्ष्यते, तथाहि—

भ्रूभङ्गकुटिला दृष्टिः क्रोधविस्फुरितोऽधरः।
दृढं सव्येन हस्तेन धनुरंसस्थमग्रहीत् ॥

पुरुषः—अम्मो ! कुबिदो विअ लक्खीअदि कुमालो ! ता को ण क्खु एसो कुमालस्स उव्वेअं उप्पादेदि ?

नलः—कुमार, वृथैव समुद्दीप्तो भवसि।

इन्द्रसेनः—कथं वृथैव ? गुरुपरीवादश्रवणमतिहीनस्यापि समुद्दीप्तिहेतुर्भवति, तदहं मन्ये नाधीतं भवता गुरुगृहेषु।

नलः—कुमार, अपि गुरुणा केवलमेतदेव शिक्षितोऽसि, यथा गुरुजननिन्दा न श्रोतव्येति, न त्वेतदपि यथा दोषा वाच्या गुरोरपीति।

इन्द्र—(सरोषं) भद्र, मा तावत्, अलं दोषलेशेनापि मुक्तस्य मे तातस्य दोषानुसन्धानापराधेन, यदि इतः परमपि मामुद्वेजयसि, तदा नूनमतिक्रान्तमर्य्यादो भवामि।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नलः—(कृतकं कोपं प्रदर्श्य) पितृविक्रमविस्मित, प्रगल्भ, अति हि नाम प्रगल्भसे, अपि तव निदेशेनैव ते पितरं मृषा गौरवभाजं करिष्ये, अहो, शैशवशैली !

इन्द्र—अनभिज्ञातचारित्र, संयम्यतामात्मनो रसना, अन्यथा—

चात्रज्योतिर्ज्वालया दीप्रमस्त्रं जिह्वागर्व्वं संविधाता लघुं ते ।
लोको द्रष्टा दुष्टदण्डप्रकारं पापोत्सेकादस्तु लोके निवृत्तिः ॥

नलः—डिम्भक,

वाचा शक्यं वक्तुमेवं जनानां कृत्यारम्भे दुष्करं कृत्यमेतत् ।
स्नेहात्तावत् सह्यतामिव नीतं बालोऽसि त्वं बालवाचं दधीथाः ॥

इन्द्र—किं नु ? इन्द्रसेनं मां परिहससि ? अनभिजात, दुर्म्मर्य्याद, अनभिज्ञातनलप्रभाव, एषोऽहं त्वां—

शुभ्रांशुवंशप्रभवः प्रतापो नलस्य देहादुपजातजन्मा ।
त्वद्गर्व्वविध्वंसकरोऽद्य भूत्वा प्रत्याययिष्ये निजवंशकीर्त्तिम् ॥

तदेहि यावदायुधमुपादाय समरक्षमां भूमिमवतराव: ।

नलः—(स्वगतम्) अये, सुतरामुन्मत्ततेजा इन्द्रसेनो लक्ष्यते । (आकाशे दृष्टिं बद्ध्वा) भगवति, राज्यलक्ष्मि, सनाथासि नूनमेतेन भाविना नरपतिना । तदिदानीं कथं व्यवहरेयम् ?

इन्द्र—भद्र, अपि भयमुपगतम् ?

नलः—कस्मात् ?

इन्द्र—आयुधव्यापारात् ।

नलः—धिक् शान्तं ! शैशवमुग्ध, अलमुत्तरोत्तरेण एहि समरक्षमां भूमिमिव अवतराव: ।

इन्द्र—भवत्वेवं तावत् । (उभौ परिक्रामतः) । अये इयं सा दृश्यते समरक्षमा भूमिः, तदत्र प्रविश्य पौरुषपरीक्षा प्रवर्त्त्यताम् ।

नलः—एवं क्रियताम् । [निष्क्रान्तौ]

पुरुषः—अम्मो ! सच्चं ज्जेव जुज्झव्वावारं कादुं पउत्तो कुमालो

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पड़िबक्खस्स एक्कं कम्मुअं देदि, हद्दो ! हद्दी ! एसो पुलिसो कुमालं उद्दिसिअ कम्मअगुणए सलं आलोवेदि, कुमालो बि तह ज्जेव कलेदि, एसो दोसं ज्जेब साह्णिबेसो समलो पउत्तो ! (दृष्ट्वा) अले किस् क्खु एदं, पउत्तमत्तो ज्जेब णिउत्तो समलव्वाबालो ! किष् क्खु एदं ! (निपुणं दृष्ट्वा) आं एसो अह्माणं लाआ भीमो लाअदालिआए अज्जेण मन्दालएण बुट्ठ जअन्धलेण अ अणुगदो जुज्झव्वाबालं णिबालेदि, ता पच्चुज्जोबिदह्मि । [निष्क्रान्तः]

(ततः प्रविशति भीमादिसहितो नलः)

भीमः—वत्स, नल, अलं दुःखानुषङ्गेण, सर्वमेव तत्त्वतो गृहीतमस्माभिः, अत्र नास्ति ते पुरुषदोषः, परं दैवमेव अत्र अपराध्यति। दैवमप्रतिविधेयमिति को वा न जानाति?

नलः—अहो प्रत्युज्जीवितोऽस्मि, यदि मे गुरवः कठोरकृत्येऽपि मयि प्रसादमवलम्बन्ते ।

भीमः—वत्स, नल, एष प्रचार्य्यमाणः स्वयंवरणवृत्तान्तोऽपि तवैव लाभाय दमयन्त्या समुद्भावितः,तदत्र भार्य्यामन्यथा मा मंस्थाः,

नलः—(स्वगतम्) अहो जानास्येव सुनिपुणा देवोति, तदद्य देव्यामपनीतो मे मानसदोषप्रसूतो विकल्पपर्य्यायः। तदियं क्षमापणार्हा देवी, कुतः ?

सा साधुशीला मम पुण्यलब्धा प्रतिक्षणं ध्यायति सङ्गतिं मे।
मूढ़ो ह्यहं तामसतीं विचिन्वन् अहो महापातकदोषमाप्तः ॥

भीमः—वत्स, नल, कियच्चिरादनन्तरं सम्प्राप्तो भवान्, तदियं तपस्विनो सुचिरं लब्धदेव्या अभिनन्द्यतां सम्भाषणेन सपुत्रा दमयन्ती, एषोऽहम् अचिरात् प्रियसुहृदम् ऋतुपर्णं समानीय तेन साकमेव त्वत्सङ्गतिमहोत्सवं सम्भावयामि, जयन्धर, त्वमपि गच्छ सभास्थानं, तत्र गत्वा विज्ञापय सविनयं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

समवेतान् पारिषदान्, यथाहमनुपदमेव तेषां सम्भावनार्थ-मुपगच्छामीति। [निष्क्रान्तः]

कञ्चुकी—यथाज्ञापयति महाराजः। [निष्क्रान्तः]

दम—आर्य्यपुत्र, नूनं विस्मितोऽसि, यदद्यापि कथं जीवामीति ?

नलः—शान्तं पापं प्रतिहतममङ्गलं देव्याः ? देवि,—

इन्द्र—तात, कथमेतावच्चिरमस्मान् परिहाय स्थितोऽसि, अपि न स्मृतिपथमागता कदापि ते अस्माकं चिन्ता ?

नलः—वत्स, किमेवं पृच्छसि ? प्रकृतिदुर्ललित,

राज्यं विहाय घनकाननभूप्रयाणे
नाभूत्तथा किमपि दुःखमसह्यरूपम्।
यावत्त्वदीयवदनाम्बुजहास्यरेखा-
सम्पर्कविच्युतिवशाद्दुःविषमं तदासीत्॥

वत्स, एहि इदानीं परिष्वङ्गेण विनोदय माम्!

दम—वत्स, परिष्वजस्व तातं, तथा परिष्वजस्व यथा पुनरपक्रमितुं न शक्नुयात्।

इन्द्र—(परिष्वज्य) तात, न पुनरपक्रमितुं समर्थोऽसि ?

नलः—प्रिये दमयन्ति, वत्स इन्द्रसेन, नाद्यापि नलस्तथाभूतो वर्त्तते, यथा पुनरपक्रान्तः स्यात्, तत् परिह्रीयतां मनोमालिन्यम्।

दम—आर्य्यपुत्र, तेरेव मनोमालिन्यं न परिह्रीयते, येषां दृष्टिगोचरतां न गतोऽसि। तत्तव प्रदर्शनाय सुसज्जीकृतमपि एकपद एव परिहृतं दमयन्त्या।

नलः—प्रत्युज्जीवितोऽस्मि। (विदूषकमुपसृत्य) वयस्य, मन्दारक, एहि दृढं परिष्वजस्व मां, कियच्चिरादनन्तरं निराबाधं भवन्तं परिष्वजे। (परिष्वजते)।

विदू—अनुगृहीतोऽस्मि यदेतावता कालेन एकान्तवर्त्ती जनोऽयं स्मृत इति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नलः—वयस्य, सुचिरात् परं भवतः सर्वानुपलभ्य कृत्यविमूढ़ो जातोऽस्मि। तदेहि वयस्य पुनरपि गाढ़ं परिष्वजस्व मां—

वहोः कालादद्य प्रणयपरिणाहव्यवसितं
परिष्वङ्गस्त्वङ्गे विलसतु विषादव्यथयिता।
अहो दूरे दूरे चिरमधमदेवानुसरणात्
स्थितं यावच्छीघ्रं हृदयमिह संयातु हृदयम्॥

[उभौ परिष्वङ्गं नाटयतः]

विदू—वयस्य, आनन्देन सुतरां मुग्धोऽस्मि, तत् किं गायामि, किं हसामि, किं वा नृत्यामि, इत्येतदेव निर्णेतुं नालमस्मि।

नलः—वयस्य, मन्दारक, प्रिये दमयन्ति, निर्घृणो नलहतकः लज्जमानोऽपि किञ्चित् प्रष्टुमिच्छति।

उभौ—किमिव तत् ?

नलः—नलहतकेन विजने वने विसर्जनादनन्तरं केन दमयन्ती विदर्भान् प्रापितेति ?

विदू—वयस्य, श्रूयतां, अहमेव कथयामि—यदा भवानर्द्धवासो दधानां प्रियसखीं दमयन्तीं परिहाय दूरं गतवान्, तदा निद्रोत्थिता सा समन्ततः शून्यं वीक्षमाणा प्रमुक्तकण्ठं रोदितुं प्रवृत्ता, इतस्ततो वने सोन्मादं परिभ्रमन्ती कातरपरिदेवनेन वनदेवतानामपि नयनाश्रूणि पातयन्तीव स्थिता, अथ सा विलपन्ती काननान्तरे भीषणभुजङ्गेन विवास्यमाना त्वामुच्चैः शब्दापयन्ती यावदेव नोपलब्धवती, तावदेव मोहविलुप्तसत्त्वा भूमौ पतिता विमूढ़करणग्रामा सा स्पन्दशून्या गतासुरिव संवृत्ता—

नलः—ततस्ततः ?

विदू—ततश्च यावदेव स भीषणभोगं विस्तार्य्य भुजङ्गो दमयन्तीशिरसि दंशनाय सज्जीकृतवान् आत्मानं, तावदेव कुतोऽपि प्रत्यागत्य

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

किरात एको दैवानुकूल्येन भुजङ्गं शरगोचरीकृत्य प्रियसखी-मनुगृहीतवान्।

नलः—अहो प्रत्यागतजीवितोऽस्मि, ततस्ततः ?

विदू—ततश्च तेन किरातेन दमयन्तीललितलावण्यमुग्धेन पञ्चशर-शरविलसितेन तथैव मुग्धं स्वसहचरं विरोधिनं लतापाशेन संयम्य क्रमेण समुपस्तुता प्रियसखी दमयन्ती, सापि तपस्विनी गत्यन्तरमनीक्षमाणा लब्धसंज्ञा प्रमुक्तकण्ठं परित्राणं याच-माना समन्ततः स्खलन्ती अपि न तेन परिहृता।

नलः—(सावेगं) किं नाम मयि स्थिते ममैव धर्म्मपत्नीं दमयन्ती-माक्रामन्ति किराताः, कः कोऽत्र शीघ्रं मे सज्यं धनुरुपनय यावदेषोऽहम्—

विस्फारितोदरभयङ्करचापयन्त्र-
क्षिप्तेन भीषणशरेण किरातकीटम्।
सम्प्रेषयामि नरके कृमिलक्षपूर्णे
रे दुष्ट तिष्ठ पलकेन ददामि दण्डम्॥ [गन्तुमीहते]

दम—(नलं करे धृत्वा) आर्य्यपुत्र, किमेवं मुग्धो भवसि, वृत्तं खलु एतत्, एषाहं समीप एव म्रिये।

नलः—(दृष्ट्वा सलज्जं) आं एवं ! मया पुनरतिमात्रविक्षेपात् वर्त्त-मानमिव तदवधृतम्। अहो मे वीर्य्यप्रकर्षः ! अहं हि—

दस्यौ गृहं दर्पवशात् प्रविश्य स्वशक्तिमुद्घोष्य धनानि हृत्वा।
निःशङ्कमात्मीयगृहं प्रपन्ने गृहस्थमत्रानुहरामि दृप्तम्॥

वयस्य, ततस्ततः ?

विदू—ततश्च प्रियसख्या दमयन्त्या भक्तिगृहीतेन भूतभावनेन समनु-प्रेषित इव पतिव्रताधर्म्मेण समादिष्ट इव मुक्तिनाथो नाम किरातराजः केनापि स्वानुचरेण निवेदितवृत्तान्तस्तत्र तदा-नीम् एव प्रतिगतो धर्म्मपुत्रीति सम्बोधनेन विदर्भनन्दिनीम् आश्वास्य दुष्टवृत्तयोः किरातयोः प्राणान्तकं दण्डमाज्ञापितवान्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शिशिरविलासः

लेखकः—लक्ष्मीनारायणश्रीरामशर्म्मा

शिशिरं शिशिरेण समं समितः पवनेन शनैर्वितता वितता ।
मिहिकाऽपि विना सुरतं जनता कृतकुञ्चितवेपथु सोत्कुरुते ॥१॥
चलितैरदनैरधरः खदितः शिशिरेण सदागतिना च हतः ।
न रतिक्षतधा अजनि क्षतधाः क्षणसङ्कदने शिथिलः शिथिलः ॥२॥
सरसां समपादि जडं सलिलं हिमखण्डमयं पदचारजडम् ।
जलयोगविधावर्जानष्ट तथा विनखक्षतमङ्गमपि क्षतवत् ॥३॥
अधुना पथिकः पथि गन्तुमनाः शयनं परिहाय न धर्तु मनाः ।
अवनौ चरणं न च हातुमना वयसां विसरो निजनोडगृहम् ॥४॥
शनकैः शनकैः समये समये वितरन्विसरन् पवनः (१) पवनः ।
कलयन्नलिनो वनजे वनजे कुरुतेऽकुरुते सननंसननम् ॥५॥
न तु यामपि वीक्षितुमक्षमत द्युमणिस्तरुणीकरजालतले ।
कुरुते निजगण्डतलं ननु सा तरुणस्य हि तस्य विभातवतः ॥६॥
अभितो रविमास्य वितत्य कचानुपधूपयते क्वचनेह बधूः ।
उपलेपयते मृगनाभिमदं कुचयोः कुशला किल काचन च ॥७॥
इह कापि पुरः प्रणिधाय लसद्दशनच्छवि शीतहसां हसनीम् ।
नवपाटलपाटलितांशुकिरौ चरणौ च करौ मृदु तापयते ॥८॥
अरघट्टचलैरतिशोकरिताऽनिलसञ्चलितैः कटकट्टकरैः ।
रदनैरधरार्दनकृत्यचणैः रसना (२) रसना निदरोद्भियते ॥९॥
अतिशीतभिया वसनाऽपिहिता न कुतोऽपि तनुर्विवरीव्रियते ।
जड़राज्य इव स्वकृतिः कृतिना बहुदोषपरे प्रतिघातभयात् ॥१०॥
इह मन्मथिनां वनिताङ्गयुजां सुरतौ मनसां विकसद्दयसाम् ।
युगयामवती ननु पुण्यवतां क्षणदा क्षणदा क्षणदा क्षणदा ॥११॥

---

१ पवनं पविवता यस्मिन्नित्यजन्तः । पवनकर्मवान् इत्यर्थः ।

२ ल्युडन्तरसनशब्दाद्रसनं रसनक्रियाऽस्ति तस्या इत्यर्थेऽर्शं आद्यच् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मधवेऽरुणदीधितिदीधितिभिः पवनेन निरस्तहिमातिशयम् ।
तनुशीतगुणः सुखदायि निजं वपुरेष ऋतुः परिवर्तयते ॥१२॥
लक्षणं हि सुरभेः सहकारेष्वङ्गनाननमनोहरगन्धः ।
मत्तभृङ्गरमणस्थलमेकमेति मन्मथशरः प्रसवोऽत्र ॥१३॥
अपहास इव क्रियतेऽद्य विकस्य वसन्तऋतोः श्रिय उद्धतया ।
परिसार्य्य भुजानिव दीर्घदलान्युद्दतद्विजसुन्मुखगोभिकया ॥१४॥
रागिणां मदविवृद्धिकरीयं निस्त्रपेव युवतिर्विहृताङ्गी ।
दर्शितार्तवगुणा कुसुमेन तिष्ठते बत जनाय तमाली (२) ॥१५॥
अद्य कुन्दलतिकासु विकासश्चन्द्रकान्तविशदः प्रियवासः ।
प्रोषितान् स्मरयति प्रमदानां केलिकालकृतहासकलानाम् ॥१६॥

(सावशेषः)

प्राची-प्रतीची-सम्बन्धः

(पूर्वतोऽनुवृत्तः)

लेखकः—श्रीव्रजेन्द्रकुमार आचार्य्यः काव्यतीर्थः बि. ए

५। पण्यशिल्पादौ—भारतवर्षः खलु निखिलमणिरत्नादीनां स्वर्णरजतादिधातूनां तथा "शानचौमाविका"दितन्तूनां प्रभव इति नास्ति कोऽपि विसंवादः। आर्य्याणां भारतप्रवेशात् परं धातव-तान्तववाणिज्यस्य समधिकः प्रसारः सुदूरमपि यूरोपमहादेशं व्याप्तवान्। भारतीयाः शिल्पिनो बाहुल्येन नानाविधानि धातु-तन्तुरत्नादीनि तन्मयानि च नयनमनोरञ्जनानि वस्त्राभरणादीनि तत्र प्रेरयामासुः। तेऽपि यूरोपीया वस्तुगौरवचकिताः शिल्पकौशल-प्रमुग्धा वाणिज्यलालसया भारतागमनप्रयासमङ्गीकुर्वन्तो महान्तं

---

२ तमाखुः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

खलु प्राचीप्रतीचीसम्बन्धं विदधिरे। आर्य्यशास्त्रानुसारेण ब्रह्मचर्य्यानन्तरं द्वितीयाश्रमप्रविष्टानां त्रैवर्णिकानां यावज्जीवमग्निहोत्रानुष्ठाननियमे स्थिते समुद्रयात्रया दूरदेशपर्य्यटनेन वा व्रतभङ्गः स्यादिति कथमपि तेषां वाणिज्यवृत्त्या यूरोपप्रवेशो न श्रूयते। परन्तु यूरोपीया एव भारतमुपागत्य, पारस्योपसागरपर्य्यन्तं वा, क्रयादिकं चक्रिरे। केचन पुनरार्य्यधर्म्मपरित्यागिनैव ग्रीसादिदेशप्रस्थिता वाणिज्यादिकं चक्रुः। जारक्समद्वीपतिना समाक्रान्ते ग्रीसे एत एव भारतीया ग्रीसीयानां साहायकं विदधुरिति प्रागुक्तमेव। एतत्प्रमाणानि तु तात्कालिकभारतीयशास्त्रादौ यूरोपीयेतिवृत्तादौ च द्रष्टव्यानि, वाहुल्यभियात्र नोल्लिखितानि। वाणिज्यसम्बन्धस्तु ततः प्रक्रम्येदानीमप्यविच्छिन्नपरम्परया वर्त्तत एव।

६। भाषासु—एते खलु सम्बन्धाः पूर्व्वोक्ता गतप्रत्यागतन्यायिनाधुनिका एव। आजानिकोऽपि सम्बन्धोऽस्ति; स च भाषातत्त्वविज्ञानेन (Comparative Philosophy) सम्यक् प्राकाश्यं नीतः। तस्य सम्यगालोचना त्वत्र प्रबन्धे न सम्भवति, परन्तु भाषासु, प्राचीप्रतीच्योर्मूलसम्बन्धप्रदर्शनाय दिङ्मात्रं प्रदर्श्यते। तत्रार्थ्यपितामहाः "एशिया"महादेशस्य मध्यभागमेवाध्यूषुरिति भाषातत्त्वविदां मतमिति पूर्व्वमेवोक्तम्। प्रजावाहुल्येन तेषां देशाद्देशान्तरगमनमित्यपि प्रागेवोक्तम्। ते तु मूलवसतिं त्यक्त्वा द्विधाविभक्ताः प्राचीं प्रतीचीञ्च गतवन्तः। प्रतीचीशाखासन्ततयोऽधुना यूरोपादिदेशाधिवासिन्यः। प्राचीशाखा तु भूयोऽपि द्विधाविभक्ता एकया "इराण"देशमपरया च भारतवर्षं प्रविवेश। तेनार्य्यभाषायाः विभागोऽप्येवं सम्भवति,—(१) मूलभूता आर्य्यभाषा; तस्या द्वे सन्तती (क) प्रतीच्या (ख) प्राच्या च। प्राच्यायाश्च द्वे सन्तती (१ख) इराणीया (२ख) भारतीया च। पाश्चात्यायाः सन्ततयः पुनः सर्व्वेष्वेव यूरोपीयदेशेषु विस्तृतिं गताः। स च विभागश्चित्रे एवं प्रदर्श्यते,—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मूलभूता आर्य्यभाषा
(Indo German or Indo-European)

- प्राच्या (Ido-Iranin)
  - इराणीया (Iranic)
  - भारतीया (Indic)
- प्रतीच्या (European)
  - युरोपीया भाषा:

एवं सति एतेषु विभागेष्ववश्यमेवाभ्यन्तरीणं सादृश्यं विद्येत, वस्तुतोऽपि तथेत्येव द्वित्रैरुदाहरणै: प्रदर्श्यते। यथा—मातृभाषायां (मूलभाषायां) सहोदरवाचिन: "भ्रातर्"-शब्दस्य संस्कृत-ग्रीसीय-लाटीन-निम्नशार्म्मणीं * लण्डीयभाषासु यथाक्रमं भ्रातृ-फ्रातेर्-फ्रातेर्-ब्रोथार्-ब्रादार् इति रूपाणि खलूच्चारणभेदाद्भिन्नान्यपि वस्तुतो न भिन्नान्येव। तथैव "मातर्"-शब्दस्य संस्कृत-ग्रीसीय-लाटीनोच्चै: शार्म्मणीं † लण्डीयभाषासु मातृ-मातेर्-मातेर्-मुत्रोतेर्-मादार् इति रूपाणि। तथा संस्कृत "द्वि"शब्दस्य जेन्द् ‡-ग्रीसीय-लाटीन-निम्नशार्म्मणींलण्डीयभाषासु द्व-दुओ-दुओ-त्वइ-ट्ओ इत्येवं रूपाणि भवन्ति। अन्ये त्वेवंविधा बहव: सन्ति शब्दा येषामालोचनया स्फुटमेव सर्वेषामुदाहृतभाषाणां समानबीजप्ररोहत्वं प्रमीयते। अतो मूलतोऽपि प्राचीप्रतीच्यो: सम्बन्धोऽस्त्येव।

स च सम्बन्ध: खीष्टपूर्वचतुर्थशताब्द्या अर्वाक् कालमहिम्ना विस्मृत एवासीत्। न च तत्स्मरणसद्भावे किञ्चन प्रमाणमद्यापि निर्णीतम्। प्राचीप्रतीचीपुनर्मिलनादारभ्य पुन: स सम्बन्धो बहुलायमान: सन्ततिधारयाद्यापि निर्बाधमेव वर्त्तते। अतोऽस्माभि:

* Law German of Gothic.
† Old High German.
‡ Iranic, Avestic.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सुतरामिव वक्तुं शक्यते जङ्गदूरतिरोहिता जाह्नवीधारेव सागरसमीप-विभक्तशतधारा सा प्राचीप्रतीचीसम्बन्धधारा शतधा विभक्ता निकट-भाविनं विश्वसम्बन्धसागरमपेक्षत इति। पुनः प्रतिष्ठितसम्बन्धे त्विदानीं बहवः खलु यूरोपीयपण्डिता ज्ञानान्वेषणया भारतीय-शास्त्रजातकृतपरिश्रमाः प्राच्यज्ञानमाहात्म्यमोहिता विशुद्धमेवानन्द-मनुभवन्ति। तेषां मार्गप्रदर्शकरूपेण ख्रीष्टीयाष्टादशशताब्द्याः पश्चिमभागादारभ्य कतिपये यूरोपीयविद्वांस आविर्बभूवुः। यद्यपि सप्तदशशताब्द्यामपि भर्तृहरिकाव्यानुवादका ब्रह्मरोगार (Abraham Roger) प्रमुखैः ख्रीष्टधर्म्मप्रचारकैर्भारतप्रवासिभिरार्य्यज्ञानसन्धानं लब्धकल्पमासीत्, तथापि तेन पाश्चात्यानां वस्तुतः कोऽप्युपकारो न सञ्जातः। यदा पुनर्भारतशासनसौकर्य्याय वारणहस्तिन्भिः (Warren Hastings) राजप्रतिनिधिभिर्भारतीयाचारव्यवहारादि-ज्ञानस्यावश्यकत्वमनुभूतमासीत् तदा तदाज्ञया पारस्यभाषामाध्य-स्थ्येन तत्समयप्रचलितान् कतिपयधर्म्मसंहिताग्रन्थान् निबन्धांश्च पाश्चात्यभाषायां परिणमय्य भारतशासने तदुपयोगो विहितः। स च प्रथमभाषान्तरसमयः ख्रीष्टीयः षट्सप्तत्युत्तरसप्तदशशततमो वर्षः (1776 A. D.)। एतत्प्रभृत्येव संस्कृतप्रभृतिषु भारतीयभाषासु पाश्चात्यविद्वन्मनसि ज्ञेयत्वेन महानाग्रहः सञ्जातः। तेन च यूरोपे तद्बहुलप्रचारार्थं ह्विकिन् (Wilkins) प्रमुखाः कर्म्मिणः सुदृढसंकल्पाः स्वध्यवसायाः समुद्यता बभूवुः। एतेषाञ्च नामानि कर्म्माणि च वक्ष्यामः; परमयमेवास्माकं महानानन्दो यच्चिराय विजातीयशासन-निष्पेषितानामपि भारतीयानामर्द्धविकसितभाषाप्रसूनसौरभविस्तृत्या बहुकालविभक्तसम्बन्धानां भूयोऽपि नैकट्यसम्पादनसाहायकं कर्त्तु-मारब्धमिति।　　　　(सावशेषः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शिवसन्तोष-स्तोत्रम्

(पूर्वतोऽनुवृत्तम्)

लेखकः—कविराज-श्रीरामदासवाचस्पतिः

श्लिष्टो जगत्प्रणयने जड़वर्ग एष
हेतुः सुदुर्म्मतमिदं कलयन्ति केचित् ।
तन्मेलनं भव ! भवेन्न हि कर्त्तृहीनं
हे चेतनाखिलजड़ेषु चितिप्रदातः ! ॥३॥

जड़स्यापि वस्तुनिर्म्मितौ हेतुत्वदर्शनात् विश्वसृष्टावपि जड़स्य कर्त्तृत्वं न तु प्रत्यक्षागोचरस्य भगवत इति तस्य हेतुत्वमनङ्गीकुर्वतां स्तवनप्रयासवैयर्थ्यं मन्यमानानां नास्तिकानां मतनिरसनार्थमाह—श्लिष्ट इति। हे भव! प्रभवकारण! विश्वोत्पादक इति यावत्। सम्बोधनेनानेन आरम्भवादरूपः न्यायवैशेषिकसिद्धान्तः प्रत्युक्तः। केचित् केचन जनाः, चार्वाका इत्यर्थः, न तु सर्वे इति भावः। एष परिदृश्यमानः, जड़वर्गः जड़ानाम् अनिलानलजलोर्व्वीणां, वर्गः समूहः, श्लिष्टः यथायथं मिलितः सन्, जगत्प्रणयने विश्वोत्पत्तौ, हेतुः, भवतीति शेषः, इदं सुदुर्म्मतं युक्तिहीनतया साधुजनविगर्हितं मतं, कलयन्ति प्रकटयन्ति, कल्पनयैव ख्यापयन्तीति भावः। हि यतः, तत् पूर्वोक्तम्, मेलनं जड़परमाणवादीनां परस्परविचित्ररूपेण संयोजनं कर्त्तृहीनम् अनुकूलकृतिमद्रहितं, न भवेत्, कार्य्यस्य कर्त्तृजन्यत्वात् मेलनस्य च कार्य्यत्वात् अवश्यमेव कश्चित् कर्त्ता स्वीकरणीयः इति भावः। अत एव चरकाचार्य्यः—

"कृतं मृद्दण्डचक्रैश्च कुम्भकाराद्दृते घटम्।
कृतं मृत्तृणकाष्ठैश्च गृहकाराद्विना गृहम्॥
यो वदेत् स वदेद्देहं सम्भूय कारणैः कृतम्।
विना कर्त्तारमज्ञानाद् युक्त्यागमवहिष्कृतः" ॥ इति

अत्रायमभिप्रायः,—ईश्वरस्य प्रत्यक्षाविषयत्वेन तत्र प्रमाणाभाववादिनस्तु—अनादिकालादेव जगदुत्पद्यते, पृथिव्याः काठिन्यादिकम्, अपां द्रवत्वादिकं,

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तेजस उष्णत्वादिकं, वायोः तिर्य्यग्गमनादिकम्, आत्मनश्च ज्ञानादिकं, यथा स्वाभाविकलक्षणमस्ति, तथा चैतन्यमपि मदशक्तिवदुद्भवति शरीरेण सम विनश्यति च, प्रत्येकं भूतानां चैतन्यास्वीकारेऽपि तेषां संयोगाच्चैतन्यमुद्भवति इत्याहुः। तथात्वे बाल्याद्यवस्थाभेदाद् बहूनि चेतनानि स्युः ज्ञातृभेदात् प्रतिसन्धानानुपपत्तिश्चेति तदपि हेयम्। अत एवोक्तं "संयोगे च वियोगे च तेषां कर्मैव कारणम्"। इति (चरक सू० स्था० ११ अ०) किञ्च ते नास्तिकशिरोमणयः—प्रत्यक्षादन्यदनुमानादिकं न प्रमाणम्, अर्थकामौ पुरुषार्थौ, चैतन्यविशिष्टदेहातिरिक्त आत्मा नास्ति, चत्वारि भूतानि, इत्यादिकं मतं समर्थयन्तः—

"अत्र चत्वारि भूतानि भूमिवार्य्यनलानिलाः। चतुर्भ्यः खलु भूतेभ्यश्चैतन्यमुपजायते॥ किण्वादिभ्यः समेतेभ्यो द्रव्येभ्यो मदशक्तिवत्। अहं स्थूलः कृशोऽस्मीति सामानाधिकरण्यतः॥ न स्वर्गो नापवर्गो वा नैवात्मा पारलौकिकः। नैव वर्णाश्रमादीनां क्रिया च फलदायिका॥ यावज्जीवेत् सुखं जीवेत् ऋणं कृत्वा घृतं पिबेत्। भस्मीभूतस्य देहस्य पुनरागमनं कुतः"॥

इत्यादिकं वृहस्पत्युक्तं प्रमाणयन्ति। तच्च प्रपितामहादीनामप्रत्यक्षतया तत्र प्रमाणाभावसम्भवादयौक्तिकमिति युक्तिहीनतयैव प्रेक्षावद्भिरुपेक्षितम्। ततश्च क्षितिः सकर्तृका कार्य्यत्वात् इति युक्त्या घटपटादीनामपि कर्त्तारमन्तरेणासम्भवात्. अचेतनायां कारणत्वन्तु सचेतनघटितमिति न्यायादवश्यमेव तादृशः कर्त्ता स्वीकरणीयः। एवञ्च कार्य्यमात्रस्यैव कर्त्तृजन्यत्वनियमेन जगत्कार्य्यं प्रति प्रत्यक्षागोचरस्यापि ईश्वरस्य कारणत्वं सिद्धमेवेति दिक्। स्थूणानिखननन्यायेनापराऽपि विप्रतिपत्तिः प्रदर्श्यते चेतनादिविशेषणव्याजेन। हे चेतन! नित्यज्ञानाश्रय! एतेन—अचेतनस्य जड़वर्गस्य चेतनानुविधायित्वं विनिगमनाभावान्न स्वीकरणीयम् इति सूचितम्। तत्रायमभिप्रायः,—"कारणगुणा हि कार्य्यगुणमारभन्ते" इति न्यायात् हेतौ चेतनावत्त्वे कार्य्यस्यापि तत् सम्भवति। तत्र कार्य्यकारणभावं प्रतिपादयितुमाह—अखिलेति। अखिलजड़ेषु, आत्मसहितभूतवर्गेषु। चितिप्रदातः! चैतन्यविधायिन्! आत्मनामपि ज्ञानमुत्पाद्य सर्वाचेतनकारणानां त्वमेव चितिविधायीति भावः। त्वं प्रसीद इति पूर्वेणान्वयः॥३॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

चित्रपरिचयः

प्रकाशितेह पत्रिकायां नैयायिककुलधुरन्धराणां स्वर्गत-महामहोपाध्याय-राखालदासन्यायरत्नपादानां चित्रमूर्त्तिः। वङ्गेषु भट्टपल्लीत्यभिधाने पत्तने एकपञ्चाशदुत्तरसप्तदशशततमे शकवर्षे प्रसिद्धविद्याभिजनवतः सीतानाथ-विद्याभूषणाद्विमलादेव्यां लब्धजनी राखालदासो बाल्ये स्वग्राम एव वैया-करणवरिष्ठस्य जयरामन्यायभूषणस्यान्तेवासित्वमङ्गीचक्रे, ततः समधिगत-व्याकरणालङ्कारश्च नैयायिकप्रकाण्डात् भट्टपल्लीस्थ-यदुरामसार्वभौमतो न्याय-शास्त्रं निःशेषतः समाददे। विद्याग्रहणावसर एव स्फुरितोऽस्य लोकोत्तरः प्रतिभाराशिः। ततः पाण्डित्यप्रभया प्रकाशीकृतदिगन्तोऽसौ बहुकालं स्वदेशमेवाधिष्ठाय नानादिग्भ्यः समापतितान्—विद्यार्थिनिवहानध्यापया-मास। स्वर्गत-महामहोपाध्याय-शिवचन्द्रसार्वभौमप्रमुखा बहवः समभवन्नस्य कृतिनश्छात्राः। अथ चतुःषष्ठितमवर्षे वयसि मुमुक्षुर्न्यायरत्नपादो वाराणसीं शरणमधिशिश्राय। तत्र च विद्याब्राह्मण्यतेजसा समाक्रान्तविद्वन्मण्डलः सुचिरं रविरिव प्रज्वलन् विश्वेश्वरचरणलग्नमानसो नश्वरं जीवनं परिज[illegible]। तत्कृतदार्शनिकनिबन्धेषु जीवतत्त्वनिरूपणम्, दीधितिकृन्नूतनतावादः, गद[illegible]वर-भ्रान्तिविलासः, तत्त्वसारं शक्तिवादरहस्यप्रकाशं अद्वैतवादखण्डनञ्च वयं नामतो जानीमः। तत्र द्वित्रा एव निबन्धाः मुद्रापयित्वा प्रकाशं ग[illegible]ताः। तर्कविद्यायामतिनिपुणोऽसौ काव्यरसेऽप्यतिप्रसरबुद्धिः समवर्त्ततेति च[illegible]रसरत्न-कवितावलीनामकग्रन्थाभ्यां सम्यग् विज्ञायत इति किमधिकेन।

सन्देशाः

उपाधिलाभः—विदितमस्तु पाठकानां यथा वर्त्तमानखीष्टवर्ष-प्रारम्भमहोत्सवे भारतराजराजैः श्रीमन्तः परिषत्सदस्याः फणिभूषणतर्क-वागीशपादाः महामहोपाध्यायपदेन सुसम्मानिताः। नैया[illegible]न्धराणा-ममीषां बहोः कालात् प्रभृत्येव पाण्डित्यकीर्त्तिरुद्दीप्ता भ[illegible]ति, गौतमसूत्रीय-वात्स्यायनभाष्यविवरणं तद्भाष्यस्वरूपव्यवस्थापननैपुण्यादिकञ्च सम्यक्तया तन्निदर्शनमुपलभ्यते। यदेतावान् समयः श्रीमता[illegible]दुपाधिमनुप-गच्छतामतीतस्तदेव नो विस्मयपदं वरीवर्त्ति। तदद्यापि तथा सम्मानपदेनामून् सम्भावयतो भारताधिपतेः सम्प्राप्तो गुणज्ञतायाः सत्यं परिचयः। आशास्महे श्रीमन्तो निरामयं स्वपाण्डित्यप्रतिभाप्रतिभासिताः सुदीर्घमायुः प्रतिपद्य भारतवर्षगौरवं संवर्द्धयेरन्निति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

কেশরাশিকে কুঞ্চিত ও কোমল করিবার জন্যই

কে-শ-র-ঞ্জ-ন-তৈ-ল

এই আসমুদ্র ভারতের সর্ব্বত্রই কেশরঞ্জনের শতমুখে সুখ্যাতি। নিত্য স্নানকালে কেশরঞ্জন মাথায় মাখিলে সমস্ত দিনটী চিত্ত প্রফুল্ল থাকে ; কেশরঞ্জন নিত্য মাথায় মাখিলে মাথা ধরা মাথা ঘোরা, অনিদ্রা, মন হু হু করা প্রভৃতি উপসর্গ বিদুরিত হয়। দেশের রাজা মহারাজা হইতে সামান্য গৃহস্থ-গৃহেও কেশরঞ্জনের সমাদর। আপনিও ব্যবহার করুন। মূল্য প্রতিশিশি একটাকা, ডাকব্যয় সাত আনা।

স্নায়বিক দুর্ব্বলতার আশু প্রতিকারক

সঞ্জীবন রসায়ন

বলবর্দ্ধক, মেধাবর্দ্ধক ও স্মৃতিবর্দ্ধক মহৌষধ

স্নায়বিক দুর্ব্বলতার জন্য যাঁহাদের উদ্যম, উৎসাহ-স্ফূর্ত্তি ও স্মৃতিশক্তি বিনষ্ট হইয়াছে' অজীর্ণ অগ্নিমান্দ্য প্রভৃতি গ্লানিকর উপদ্রব উপস্থিত হইয়াছে, তাঁহাদের পক্ষে "সঞ্জীবন রসায়ন" অমৃতের ন্যায় উপকারী। বিশেষতঃ ইহা দ্বারা বমন, উদ্গার, হিক্কা, আধ্মান (পেট ফাঁপা) ও পেট ভুটভাট করা প্রভৃতি পেটগরমের উপদ্রবসমূহ অচিরে নিবারিত হইয়া থাকে। এক কথায় বলিতে হইলে, অজীর্ণ, অগ্নিমান্দ্য, ও স্নায়বিক দুর্ব্বলতা নিবারণ জন্য এবং ছাত্রগণের মেধাবৃদ্ধি করিতে"সঞ্জীবন রসায়নের" ন্যায় অব্যর্থ ঔষধ অতি বিরল। এক শিশির মূল্য ১৲ টাকা। মাশুলাদি ।৴০ আনা।

পরি... ...বিদ্যাবিনোদ

সচিত্র কবিরাজি শিক্ষা

পরিবর্দ্ধিত

শ্রীযুক্ত নগেন্দ্রনাথ সেনগুপ্ত প্রণীত।

সমগ্র আয়ুর্বেদশাস্ত্রের সার সঙ্কলন। বড় বড় আটটী খণ্ডে সমগ্র পুস্তক বিভক্ত অতি সরল ভাষায় লিখিত হওয়ায়, কেবল চিকিৎসকের নয়—সাধারণ গৃহস্থের পক্ষেও ইহা একখানি নিত্য ব্যবহার্য্য গ্রন্থ। নাড়ীপরীক্ষা হইতে আরম্ভ করিয়া সমস্ত রোগের নিদান, চিকিৎসা-প্রণালী, আয়ুর্ব্বেদীয় ঔষধ, তৈল ও ঘৃতাদি প্রস্তুত-বিধি, বিষচিকিৎসা, দীর্ঘজীবন-লাভের উপায়স্বরূপ স্বাস্থ্যকারক স্থানসমূহের পূর্ণবিবরণ, রোগীর পরিচর্য্যা এবং দ্বিতীয়খণ্ডে মহর্ষিদের গৌরবস্বরূপ—"সুশ্রুত-সংহিতা" এই সংস্করণে সন্নিবেশিত হইয়াছে। মূল্য ২॥০ টাকা। ডাকমাশুল ও প্যাকিং ৸০ বার আনা।

কবিরাজ নগেন্দ্রনাথ সেন এণ্ড কোং লিমিটেড

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

The Sanskrit Sahitya Parishad

A JOURNAL PUBLISHED IN SANSKRIT

DEVOTED TO THE STUDY

OF

History, Literature & Philosophy

OF

Ancient India

Annual subscription........ Rs. 3. Foreign......7s.

As the most popular and widely read Sanskrit Monthly this is the best medium for advertisement. Advertisements are published in all languages.

Monthly Rate of Advertisement :—

	Full page	Half page
For one year	Rs. 6	Rs. 3
For one issue	„ 8	„ 4

For further particulars apply to the Manager,

SANSKRIT SAHITYA PARISHAD,
Shambazar, Calcutta

प्रकाशको मुद्रापकश्च—श्रीदुर्गामोहनकाव्यसांख्यपुराणतीर्थ एम्. ए.
संस्कृतसाहित्यपरिषत्, श्यामबाजार, कलिकाता।
मुद्रापणस्थानम्—सिद्धेश्वरप्रेस, २८ नन्दकुमारचौधुरीसेकेण्डलेन,
कलिकाता।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

१८४७ शकीये माघे

Reg. No. C. 1073.

८म वर्षस्य १०म संख्या

February, 1926

Vol. VIII. No. 10

संस्कृतसाहित्यपरिषत्

संस्कृतसाहित्यपरिषदो मासिकं मुखपत्रम्

भारते भातु भारती

सम्पादकः—श्रीकालीपदतर्काचार्य्यः

सहसम्पादकः—श्रीदुर्गामोहनभट्टाचार्य्य एम्. ए.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पण्डिताग्रणी-वैयाकरणशिरोमणि-
श्रीयुक्तहरलालस्मृतिरत्नमहोदयविरचितटीकयान्वितम्

सारस्वत-व्याकरणम्।

वङ्ग-विहार-वाराणसी-पञ्चनदादिप्रदेशप्रवर्त्तितराजकीयसंस्कृतपरीक्षायाः पाठ्यरूपेण निर्दिष्टम्

बालानामाशुबोधकतया परमुपयुक्तेऽस्मिन् व्याकरणे विभिन्न-प्रदेशप्रचलितपाठान्तराणां समन्वयेन प्रसादगुणालङ्कृता संयोजिता बालसरला नाम टीका। सरलसंस्कृतभाषया व्याख्या, पद-साधनम्, पारिभाषिकलक्षणनिर्म्माणादिकम्, विचारवितर्कादिना गूढसन्देहमीमांसा, असंख्यानां परिकल्पितपूर्वपक्षाणां विभिन्नदिशा प्रदर्शितान्युत्तराणि—इत्येवमादिकं व्याकरणाध्यायिनामपेक्षितं सर्व-मेवात्र सन्निवेशितम्। सम्पादकस्य 'निवेदने' च व्याकरणविषयकं विविधगवेषणामयमालोचनं विद्यते।

मूल्यम्—पूर्व्वार्द्धम् ३) रूपकत्रयमात्रम्। उत्तरार्द्धम् ३) रूपकत्रयम्। ये तु पूर्वोत्तरार्द्धे एकदा ग्रहीष्यन्ति, तेषां कृते ५) रूपक-पञ्चकमात्रम्।

प्राप्तिस्थानम्—श्रीकृष्णदासमिश्रव्याकरणतीर्थः
चटुला सारस्वतचतुष्पाठी, पोः मिरगोदा, मेदिनीपुर।
तथा—संस्कृतबुकडिपो, २८।१ कर्णओयालिसष्ट्रीट, कलिकाता।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



स्वर्गत-महामहोपाध्याय-शिवचन्द्रसार्वभौमः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृतसाहित्यपरिषत्

(श्यामबाजार, कलिकाता)

(Registered under Act XXI of 1860)

समितिरियं संस्कृतभाषायास्तन्मूलकप्राकृतादीनाञ्च सम्यगालोचनया यथावत् प्रसारप्रतिपादनाय प्रतिष्ठापिता (१) प्रतिमासं सभाद्यनुष्ठानेन (२) मुद्रापितानां हस्तलिखितानाञ्च ग्रन्थराशीनां परिषद्ग्रन्थागारे नियतसञ्चयनेन (३) स्वकीये महाविद्यालये विद्यार्थिनामध्यापनेन (४) अमुद्रापितसंस्कृतग्रन्थानां प्रकाशनेन (५) अन्तरान्तरा रङ्गेषु संस्कृतरूपकाणां प्रयोगेण (६) यथानियमं मासिकपत्रिकाप्रचारेण विविधैरुपायान्तरैश्च स्वमुद्देश्यमनुकूलयति। सदस्या मूल्यं विनैव प्रतिमासं संस्कृतपत्रिकां लभेरन्, परिषत्प्रकाशिता ग्रन्थमालाश्च तेषां सुलभतराः स्युः, निखिलेष्वेव परिषत्कृत्येषु ते लब्धाधिकारा भवेयुः।

संस्कृतसाहित्यपरिषत्पत्रिका

संस्कृतसाहित्यपरिषन्नाम तदभिधानायाः परिषदो मासिकी सुखपाठ्येयमतिगभीरार्था दार्शनिकनिबन्धेषु परमकोमला काव्यचिन्तासु धर्म्योपचारा स्मृतिपुराणेतिहासादिषु सूक्ष्मतत्त्वावेदिका विज्ञानविभवेषु संस्कृतोन्नतिमूलप्रवृत्तिप्रचारपरा पारिपार्श्विकवृत्तेषु यथार्थगुणदोषविचारचतुरा ग्रन्थादिसमालोचनेषु गीर्वाणवाणीप्रणयिनामत्युपादेयतया वरीवर्त्ति।

अस्याः प्रतिखण्डमूल्यम् ।० चतुरानकम्, वार्षिकमूल्यम् ३) रूप्यकत्रयम्।

पत्रिकामूल्यादिकं परिषत्कार्य्याध्यक्षसविधे निबन्धादिकञ्च पत्रिकासम्पादकसविधे अधोलिखितसङ्केतानुसारेण प्रेषणीयम्।

'संस्कृतसाहित्यपरिषत्'

श्यामबाजार, कलिकाता।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भारतवर्षस्य श्रेष्ठानाम् औषधालयानां चिकित्सालयानां च अन्यतमः

"आर्, सि, सेन एण्ड कों लिमिटेड्"

(यथाशास्त्रं निर्मितानि विशुद्धानि औषधानि सर्व्वदा लभ्यन्ते)

१ । च्यवनप्राशस्य प्रतिविंशतितोलकं मूल्यं रूप्यकद्वयं २) प्रेषणादिव्ययः ।/० आणकषट्कम् ।

२ । बृहच्चन्द्रोदयमकरध्वजस्य सप्ताहार्थं मूल्यं २) रूप्यकद्वयम्, प्रेषणादिव्ययः ।/० आनकपञ्चकम् ।

३ । तुषारबिन्दुतैलस्य प्रतिदशतोलकम् मूल्यं २) रूप्यकद्वयम्, प्रेषणादिव्ययः ।/० आनकषट्कम् ।

(सर्वेषाम् औषधानां मूल्यादिविषयक-विवरणपूर्णं पुस्तकं मूल्यं विनैव प्रेष्यते

कविराजः राखालचन्द्रसेनः एल् एम् एस्

" श्रीसुधीरकुमार सेनः

२५८ नं अपारचितपुररोड्, कलिकाता

सर्व्वत्र भारतवर्षे सुधीजनैः समादृतं,

कविराज-राखालचन्द्र-सेन एल्, एम्, एस्, कृतं

कुन्तलकौमुदीतैलम्

भवत्कुटुम्बमध्यवर्त्तिनीनां महिलानां केशप्रसाधनार्थं

विशुद्धोपादानजातं केशतैलमेतत् क्रीयताम् ।

भवत्-स्वदेशवासिना सुशिक्षितेन भिषजा निर्म्मितमेतत्

तैलम्, अतो भेषजगुणैः श्रेष्ठम् ।

(सर्व्वत्र गान्धिकानामापणेषु प्राप्तव्यम्)

आर् सि सेन एण्ड कों लिमिटेड्

२५८ अपारचितपुररोड्, कलिकाता

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृतसाहित्यपरिषत्

इयं संस्कृतसाहित्यपरिषत् प्रतिभा रवेः ।
भावालोकैर्मनःपद्मं प्रकाशयतु धीमताम् ॥

१८४७ शकीये माघे, ८म-वर्षस्य १०म-संख्या

श्रीविश्वेश्वराष्टकम्

लेखकः—महामहोपाध्याय-श्रीप्रमथनाथतर्कभूषणः

असंख्यास्ते भक्ताः स्मरहर समाधौ विकसिते
हृदब्जे पश्यन्तस्त्विदमलतनुं त्वां सुमतयः ।
क्षमाः स्तोतुं नो चेदविषय सदा वाङ्मनसयो-
स्तदा के विश्वात्मन् ! वयमिह वराकाः हतधियः ॥१॥

किमर्थं स्तौमि त्वां पितृवनचरं दिक्पटधरं
वितर्कोऽयं तर्कातिगविषयगः सञ्जि[illegible]दितः ।
ध्रुवं काशीनाथागतिगतिकराचिन्त्यमहिमन् !
तवैतत् कारुण्यं यदियमधुना मे स्तुतिरतिः ॥२॥

शिशुत्वं क्रीड़ाभिर्विगतमथ तारुण्यमखिले-
रसद्वृत्तैर्योषिज्जनविषयोन्मादविषमैः ।
जरेदानीं प्राप्ता जरयति शरीरेन्द्रियधियः
कृपासिन्धो शम्भो ! कथय तव भृत्यः श्रयतु कम् ॥३॥

नृलोके ये धन्या द्रविणविनयैश्वर्यमहिताः
कथं वा ते सेव्याः स्वयमकुशला ये स्वकुशले ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

जरा-शोक-व्याधि-प्रबलविषयाशा-हृतधिय-
स्ततस्त्वामिवैकं शरणद ! गतोऽस्म्यद्य शरणम् ॥४॥
किमन्यैर्वा देवैः शतमखविरिञ्चिप्रभृतिभिः
सदा शङ्काग्रस्तैरधिकृतपदभ्रंशविषये ।
अयि विश्वस्वामिन् जगदुदयरक्षाक्षयकर !
क्षमस्व व्यामोहं हर हर मतिं मेऽन्यविषयाम् ॥५॥
स्वभावः कालो वा प्रकृतिरथ मायाऽणुरथवा
जगत्सृष्टेर्मूलं रटतु बुधवृन्दं निजधिया ।
ममायं विश्वासः स्वजनभयभङ्गव्यसनिनो
तवैवेयं लीला लसति जगदीश ! प्रतिदिशम् ॥६॥
जगन्नाथानाथावन-शमनभीतिक्षतिकरीं
कृपादृष्टेर्वृष्टिं विसृज सृज भक्तिं मम हृदि ।
विना यां लोकेऽस्मिन् श्रवणमननध्यानविधयः
समस्ता व्यस्ता वा न खलु कुशला मोहदलने ॥७॥
प्रभो ! गौरीकान्त ! त्रिपुरहर ! विश्वेश्वर ! हर !
स्मरध्वंसिन् ! शीतद्युतिलसितभालासितगल !
अपारे संसारे चिरपतितमत्यन्तपतितं
प्रपन्नं मां दासं कुरु करुणया निर्भयमलम् ॥८॥

मतिमञ्जरी

वैदेशिकानां भारतीयविज्ञानप्रशस्तिः—यदेव प्रकाश-मस्माभिरुच्यताम्, अद्यापि वस्तुनो वैदेशिकपण्डितकृतां प्रशस्तिमनु-पलभ्य न वयं प्रशस्तियाथार्थ्यमवधारयामः । अत एव संस्कृतविद्या-महिममुग्धानां केषाञ्चित् वैदेशिकविदुषां संस्कृतविद्यासम्बन्धि मतं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पाठकेषु उपहरामः। कतिपये दिवसाः किल मद्रदेशीय मयला-पुर-संस्कृतमहाविद्यालये 'भारताद् बहिः संस्कृतशिचे'ति विषय-मधिकृत्य व्याख्यानमुपन्यस्तवतां ओलन्दाजाध्यापक डिभान-एड्च्-ल्यावार्टनमहाभागानाम्। तैरेवं प्रतिपादितमास्ते यथा सम्प्रति यूरोपीयमनीषिणः भारतवर्षेण द्वारविशेषमाश्रित्य सम्बन्धमभि-प्रयन्ति। यतो भारतीयसभ्यतैव मूलं यूरोपीयसभ्यताया इति सम्यगेव तैरधिगतमस्ति। भारतवर्षाद् यूरोपमुपगत्य नाना जातयः तत्र तत्र सभ्यतां विस्तारयामासुरित्यत्र संशयलेशोऽपि न पदं दधाति। यूरोपदेशः अन्तरा सेमेटिकसभ्यतया हिब्रुसभ्यतया वा ऋणप्राणितोऽपि साम्प्रतम् आर्य्यसभ्यतामेवाभिलषति। खोष्टधर्म-प्रादुर्भावात् बहुपूर्व्वंत एव एसिया-यूरोपप्रदेशेषु बहुत्रैव हिन्दुभावो बौद्धभावश्च प्रसृतौ समवर्त्तेतामिति बहुभिरेव प्रमाणैरुपपादितमेतैः। यूरोपीयदर्शनानां सर्व्वाण्येव मतानि प्रायेण हिन्दुदर्शनेषु समुप-लभ्यन्ते। किञ्च बहुभिरेव भाषाभिरद्य संस्कृतग्रन्था अनूद्यन्ते। तदनुवादं द्वारीकृत्य भारतीयप्राचीनभावा यूरोपदेशमनुप्रविशन्ति। परन्तु अनुवादेषु गूढ़ं भावमपहाय भाषायामेव दृश्यते सविशेषाभि-निवेशः। ज्ञातव्ये किल मानवजातिविवर्त्तने यूरोपादर्शास्यार्थनिर्व्वाहः परं भारतीयसभ्यतादर्शनादेव इति।

देशनायकपदाधिकृतेषु केषुचन स्वदेशीयमहाजनेष्वपि तथा तथा मतवादाः समुपलभ्यन्ते। किन्तु तेषां तत्र सुदृढ़ो निर्भर इति नो विश्वसितुमर्हामः। तथात्वे तेषां प्राचीनविद्याभिहृदये वा तदीयवैशिष्ट्यपरिरक्षणाय वा तत्समुज्जीवनाय वा यत्नो दृष्टः स्यात्। दूरे तावदास्तां तथा यत्नः केचिदेवमपि दरीदृश्यन्ते, येषां प्राचीन-सम्पत्तिविनाशमेव प्रयत्नफलमद्यत्वे वयमनुभवाम इति।

भारतीयशिक्षापद्धतेरनुवर्त्तनम्—भारतीयशिक्षाप्रभृ-तीनां प्रशस्तिर्व्वा पुनरनुवर्त्तनप्रस्तावो वा बहुशो बहुत्रास्माभिरनु-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रूयेते। परं तत्प्रस्तावफलं दिङ्मात्रेणापि नोपगम्यते। किन्तु शुभमिदं वृत्तं यदस्मिन् संवत्सरे भारतीयमहासभायाः काञ्चीपुराधिवेशने आध्यक्ष्यमधिगत्य तदभिभाषणवितरणावसरे श्रीमतीभिः सरोजिनीनाइडूमहोदयाभिरेष विषयः सम्यगालोचित इति। तत्र प्रतिपादितं यथा—'यः खलु विषयः सर्व्वथा समपेक्षणीयोऽस्माकं तत्र शिक्षापद्धती स्वजातीयानामनुपेक्षणीयं माध्यस्थ्यमुपलभ्य सुतरामहं शङ्किताऽस्मि। वैदेशिकप्रभावेण बुद्धिः चिन्ताशक्तिश्चास्माकं परवशतया पराभवं प्रापिते, समुत्पादितश्च विरागो गौरवमयस्वीयविद्यापरिग्रहेषु। सम्प्रति वयमीदृशायाः कस्याश्चन शिक्षापद्धतेरधीनाः तदनुकरणमात्रं कुर्महे, या तावदस्मज्जातिगतस्वभावविरोधिनी विनाशयति मानसीं शक्तिं, नितरामपाकरोति दूरदर्शितां, विघटयति च मौलिकतथ्याविष्कारसामर्थ्यपर्य्यायम्। सम्प्रति सन्ततिकल्याणसाधनाय तथा काचन शिक्षापद्धतिरपेक्षणीया या प्राच्यविद्यया समं प्रतीच्यनवजातीयदर्शनविज्ञानशिल्पसाहित्यादिनिहितप्रकृष्टवस्तुसम्बन्धेन साध्यमाना फलमत्युत्तममुत्पादयितुमलं सम्पद्येत। यदि भारतीयमहासभा सत्यमेव निरुक्तं कृत्यमात्मना साधयेत्, तदैव तस्या अभीप्सितवस्तुलाभो निराबाधः स्या'दिति।

धर्म्मश्च अन्यादृशो समुन्नतिश्च—भारतीयराजनीतिमधिकृत्य चिन्तापरेषु बहव एव सनातनधर्मबन्धनं राजनीतिमूलकोन्नतेः परिपन्थि मन्यन्ते, किन्तु सिद्धान्तोऽयममूलक एवेति राजनीतिकप्रवराणां लालालाजपतरायमहाभागानां 'पिप्ल'पत्रिकानिबद्धनिबन्धसमुपहारेण वयं वेदयितुमिच्छामः। तदुक्तं तैः यथा—'विदिता मे बहवो राजनीतिज्ञा हिन्दुधर्मस्य विनाशसाधनमेव येषाम् असाधारणो भारतदुःखमोचनोपायः। ते तु केवलं हिन्दुधर्मं कतिपयनिर्दिष्टनियमानाम् अन्धपक्षपातस्य भ्रान्तसंस्कारस्य आचारभेदानां जातिभेदादीनाञ्च समष्टिमात्रं मन्यन्ते; ते प्रकाशमुद्घोषयन्ति

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यथा यावदस्य हिन्दुधर्म्मरक्षसो न प्रलयस्तावदाशापि वृथैव राजनैतिकजातीयस्वाधीनताया इति ।

किन्तु तेषां सामाजिकपारिवारिकाचारव्यवहारादिषु समालोच्यमानेषु तावदिदमेव प्रतिपद्यते यथा—प्रकाशं यथा तथा वा ते वदन्तु, स्वेनाचारेण व्यवहारेण वा चिरन्तनहिन्दुसंस्कारानुवर्त्तनमेव तेषाम्। ते हिन्दुभिन्नेभ्यस्तु कन्यां न ददत्येव, परन्तु स्वजातीयात् स्वसाम्प्रदायिकाद्वा भिन्नेभ्योऽपि कन्याप्रदानम् नानुमोदन्ते। कर्म्मविशेषप्रार्थनाद्यवसरे सौकर्य्यसम्पादनाय स्वीयं हिन्दुत्वं सडिण्डिमघोषमुद्घोषयन्ते च। प्रतिवादमन्तरेण नोपलक्ष्यते तेषामनुष्ठानतो हिन्दुत्वव्यतिरेकः। नहि तेषां निन्दा प्रशंसा वा मदीयवचनबीजं, केवलं तेषामिच्छाया मूलानुसन्धानमेव। नहि हिन्दुधर्म्मस्य विध्वंसो वा अविध्वंसो वा तेषामधीनः। बौद्धेस्लामखृष्टीयशिखब्राह्मार्य्यधर्म्माः सर्व्वे एव कदाचन कदाचन हिन्दुधर्म्मविनाशने बद्धपरिकरा अभूवन्। तथापि स राक्षसो न केवलमद्य यावत् सजीवः सतेजा अपि वर्त्तते। अयमेव बौद्धधर्मं भारताद्बहिः प्राव्राजयत्, इस्लामधर्मं परिवर्त्त्य स्वमते प्रतिष्ठापयामास, खीष्टधर्मं वशीचकार। ब्राह्मार्य्यधर्मौ हिन्दुधर्मपादपस्य शाखाभूततया स्वीयावेव। सहस्रविघ्नससापतनेन अद्यापि हिन्दुधर्मः तदीयचिरन्तनगौरवेण गरीयानेव। वाधया तस्य मर्य्यादा वृद्धिमाप्ता, साधका बहुलीभूताः, न कुत्रापि तदीयं लाघवमजायत।

नवाविष्कृत आमेरिकामहादेशः साम्प्रतमस्य गौरवेण मोहितः श्रद्धाञ्जलिमस्य बध्नाति। पाश्चात्त्येषु खीष्टधर्ममन्तरेण न कोऽपि धर्मस्तथा समादरं लभते।

इदमेकं महद् वैषम्यं यत् सर्व्वस्ववतोऽप्यस्य अकिञ्चनत्वं, सरलस्यापि कुटिलत्वं, नितरामुदारस्यापि सङ्कीर्णत्वम्। अद्य यावत् न केनाप्ययमायत्तीकृतः, न वा केनापि पराभूतः। सर्वेषामेव मूलतः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्थितिस्थापकतास्य संलक्ष्यते। विवेकानन्दो वा रवीन्द्रनाथो वा महात्मा गान्धिर्वा अरविन्दो वा पियार्सन् वा पल रिचार्ड् वा सर्व एव एकेन वचसा स्वीकृतवन्तः यथा पाश्चात्यानां कृते नवीनवार्त्तानेन समाहृता, महदेकमुद्देश्यमत्र निहितञ्चेति। नास्य विनाशः कस्यापि शक्तिसाध्यः। ये तावदस्य निधनं कामयन्ते, ते न जानन्ति यथा किमिदमाशास्यत इति। यदि हिन्दुधर्मस्य नष्टावशेषे भारतस्य स्वाधीनताभित्तिस्थापनमन्तरेण गत्यन्तरं नास्ते, तदा भारतं कदापि न स्वाधीनं भवेदिति निश्चितमेव। येन महाशक्तिना बौद्धेस्लाम-खृष्टधर्मावलम्बिनः स्वधर्मप्रचारे दुर्द्दमोत्साहशक्तिसम्पन्ना अपि पराभूताः, तत्र निरुद्यमाः शक्तिहीनाः राजनीतिज्ञहिन्दुधर्मावल-म्बिनः पराजयमन्तरेण किं वा आशासताम्। ………

राजनैतिकं हिन्दुं पृच्छामः यथा हिन्दुधर्मविनाशपदेन ते कमर्थं प्रतिपादयितुमिच्छन्ति। राजनीतिगोचरधर्मभेदापसारणमेव किमेषा-मुद्देश्यम्। तथात्वे तैः साकमस्माकमैकमत्यम्। किन्तु धर्मान्तराव-लम्बिनः तत्र ऐकमत्यम् अवलम्बितुमकामा अपि भवेयुः। अतः हिन्दुधर्मापसारणेन अपरो धर्मः शक्तिसम्पन्नः कृतः स्यात्। वयन्तु मन्यामहे नेदमपि तेषामभिप्रेतमिति, यदि तथा स्यात्, तदायं कुसंस्कार एव नान्यत्।

यथा तथा वास्तु तेषामिदमवगन्तव्यं यत् हिन्दुधर्मः कथमपि नात्मनो ध्वंसं प्रसहेत। यदि तेभ्यो नाभिरोचते हिन्दुधर्मस्तदा ते धर्मान्तरमवलम्बितुं क्षमन्ते। किन्तु तेषामेतन्मनोरथमपि न वयं प्रतीमः। वस्तुतस्तु तेषामभिलषितं स्वयं त एव न जानन्ति। केवल-मेकया वृथा धारणया विवेकबुद्धिरेषामन्धीकृतास्ते। सर्व्वतः खलु तदेव समीचीनं स्यात्, यदि ते स्वां धारणासन्ततिं दूरीकृत्य तथा प्रयतेरन् यथा हिन्दुधर्मः समुन्नतश्च शक्तिसमृद्धश्च भवेत्। हिन्दूधर्मः सम्प्रति केवलं सामाजिकताया बन्धनमात्रं, बन्धनमिदं यथा सुदृढतरं स्यात्,

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तथा प्रयतितव्यम्। अस्ति तावदस्माकं धर्मे तथा किमपि किमपि वस्तु, यत् मानवीयबुद्धिकल्पनायाश्चरमविकाशेनैव सम्भवितुमर्हति, तत् सर्वं परिहाय अप्रुवस्यानुसरणं न किं मूढ़जनोचितम् इति।

लाला-लाजपतरायमहाभागानामिमं सिद्धान्तं सर्वथा वयमनुमोदामहे। तथा अत्र धर्मसम्बन्धमपहाय राजनीतिकोन्नतिकामिनां साभिनिवेशदृष्टिमभ्यर्थयामहे।

धर्म्म-कर्म्म

लेखकः—श्रीयोगेन्द्रनाथसांख्यस्मृतितीर्थः

धर्मप्रवणे कर्मप्रवीणे भारतभुवनेऽस्मिन् ये तावन्तो महाजना जन्मान्तरीणागण्यपुण्यारुणकिरणानां प्रभावातिशय्येन दुर्लभजनुं मनुजजनुमधिचक्रुः। येषाञ्च पूर्वपुरुषाणामाचार्य्यवर्य्याणाम् अतुलकीर्त्तिकलापविमण्डितधर्मकर्मकलापटलं ज्ञानगवेषणापूर्णानन्तधर्मशास्त्रसुधाकरोज्ज्वलमद्यापि दुर्दशान्धतमसाच्छन्नेऽपि दिने शतशताब्दीय-प्रबलविप्लवघनवात्याः समतीत्य, समाकृष्य च पृथिव्या वर्त्तमान-सभ्यजातीयानां विस्मयविस्फारितनयनानि, वितनुते हिमाद्रिस्थिरतमं सनातनतनुत्वं लोकसमाजे विराजमानम्। भारतगौरवरविभारतीकवीनां खलु तेषां वंशावतंसायमानानामिदानीन्तनानां विद्यामण्डितपण्डितानां कीर्त्तिस्तम्भेन दण्डायमानस्य सभामण्डपस्यैकांशे दण्डायमानोऽहमल्पशक्तिस्तादृशधर्म्मकर्म्मविषये किं वक्तुमर्हामि? मन्ये च तत्र न किमपि नूतनत्वमभिधातुं शक्नोमि, परन्तु भ्रमप्रमादेन कृतास्पदं हास्यास्पदमेकमभिनवं नूतनत्वमेव प्रकटयामि। तथापि सहृदयानां महोदयानां तत्रभवतां भवतां विद्वद्-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

न्दानां तुषमिव सूर्पाणां दोषमपहाय गुणग्रहणे समाग्रहवतामवगत्य समुदारतां तद्गुणैः कर्णमागत्य चापलाय प्रणोदितः किञ्चिद् वक्तुमुपक्रमे। विदन्तोऽत्रभवन्तस्तत्र प्रमाणम्।

वक्तव्यञ्चात्र मेऽकिञ्चनस्य किञ्चन धर्म्मकर्म्मेति। कर्म्मेत्युक्ते यत् क्रियते (ग्राह्यत्वेनाग्राह्यत्वेन वा बुद्धिविषयीक्रियते) तत् कर्म्मेति व्याकरणशासनानुगतं सहजतो यद् बुद्धिविषयीभवति तदेव भवतु, न तु केनापि विशेषलक्षणेनाक्रान्तं न्यायतर्काद्यनुगतं साधारणबुद्धेरविषयीभूतम् असार्वजनीनम्। एवं सति "अहरहः सन्ध्यामुपासीत", "स्वाध्यायोऽध्येतव्यः", "स्वाध्यायस्तु ब्रह्मयज्ञः पितृयज्ञस्तु तर्पणम्। होमो दैवो बलिर्भौतो नृयज्ञोऽतिथिपूजनम्॥ एतानि विधिदिष्टानि नित्यान्याहुर्मनीषिणः। श्रुतिस्मृत्युदितं कर्म्म करणीयं प्रयत्नतः॥" इति श्रुतिस्मृतिभिरहरहर्विधेयतया प्रतिपादितानि सन्ध्यावन्दनादीनि नित्यकर्माणि, पापक्षयमात्रसाधनतया नैमित्तिकत्वेन कीर्त्तितानि प्रायश्चित्तव्रतादीनि नैमित्तिककर्माणि, 'स्वर्गकामो यजेत', "कृत्वैवं परमामापुर्निर्वृतिं त्रिदिवौकसः। एवमन्यैरपि सदा देव्याः कार्य्यं प्रपूजनम्॥ विभूतिमतुलां लब्धुं चतुर्वर्गप्रदायिनीम्॥" इत्यादिश्रुतिस्मृत्यादिभिः काम्यतया समुल्लिखितानि यागादीनि काम्यकर्म्माणि च सर्व्वाणि संगृहीतानि भवन्ति। परन्तु "ब्रह्महत्या सुरापानं स्तेयं गुर्व्वङ्गनागमः। महान्ति पातकान्याहुः संसर्गश्चापि तैः सह॥ यो ब्राह्मणायावगुरेत् तं शतेन यातयेत्॥" इत्यादिशास्त्रैरनर्थहेतुतयाऽविधेयत्वेन कीर्त्तितं ब्रह्महत्यादिकमपि अग्राह्यत्वेन ज्ञानविषयीकरणोपदेशात् (पाप)कर्म्मशब्दग्राह्यं भवति।

तेन कर्म्म विधेयाविधेयतया द्विविधम्। ब्रह्महत्यादेः पापकर्म्मणः कार्य्यत्वासम्भवेऽपि तत्र ग्राह्यत्वाभावबुद्धिकरणसम्भवात् न लक्षणत्वासङ्गतिः। विधेयन्तु कर्म्म नित्यनैमित्तिककाम्यतया त्रिविधमिति स्फुटम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अनन्तशास्त्रप्रतिपादितमर्म्मण: कर्म्मण: क्षुद्रतमेऽस्मिन् प्रबन्धे विस्तरत: स्वरूपप्रकाशनं दुर्घटं स्वल्पधियो मे शक्तेरसाध्यमपीति निरस्तम्।

तत्कर्म्म सर्व्वैरेवाश्रमिभिरवश्यमनुष्ठेयं मोक्षोपयोगित्वादिति शास्त्रोपदेश:।

उपरिष्टादयमाशय: कथञ्चित् प्रकाशयितुं यत्यते, यथा—दृश्यते हि आध्यात्मिकादित्रिविधदु:खज्वालामालयाऽहरहरन्तर्दंदह्यमाना मानवा: सततं नितरां दु:खक्षयमेव वाञ्छन्ति अनिष्टञ्च परिजिहीर्षवो भवन्ति। स्वहृदयेन तदनुभूय त्रिकालज्ञा: सूक्ष्मदर्शिन: सहृदया: कपिलादयो मन्वादयश्च महर्षयस्तेषां तत्तद्दु:खनिवृत्तिकामनया इष्टानिष्टं निर्णीय तद्दु:खापायोपायजातमपि निर्णीतवन्त:। चित्तवृत्तेर्विभिन्नतया नानाविधमपि उपायजातं परार्थत्वात् यथार्थमिति मन्तव्यम्। तथाच महाजनोक्ति:—रुचीनां वैचित्र्यादृजुकुटिलनानापथजुषां, नृणामेको गम्यस्त्वमसि पयसामर्णव इव। इति

लोकेऽस्मिन्नपि दृश्यते गन्तव्यस्थानाधिगमे केऽपि वाष्पीयरथयानं सुष्ठु मन्यन्ते, केऽपि वा जलपोतमार्गं साधुतया स्वीकुर्व्वन्ति, अन्ये चाऽश्वयानं सुगमतयाऽधिकुर्व्वन्ति, परे च पद्भिर्गमनमिष्टार्थतयाऽभिमन्यन्ते। यैर्यदभिमन्यते मन्यतां गन्तव्यस्थानलाभस्तु सर्व्वेषामपि भवेत् इति। तथा नानामुनिप्रदर्शितेषु सत्सु कर्म्मसु सदाचारानुमतं लोकधर्म्माविद्दिष्टं यदात्मन: प्रियतया मन:पूतत्वेन निर्णीतं तदेव उपासितव्यं जनै: हंसैर्यथा क्षीरमिवाम्बुमिश्रम्। तथाच— 'श्रुति: स्मृति: सदाचार: स्वस्य च प्रियमात्मन:'। 'मन: पूतं समाचरेत्'। 'अस्वर्ग्यं लोकविद्दिष्टं धर्म्ममप्याचरेन्न तु।' इति। तत्र च सन्देहे निर्णायकं महाजनवाक्यं यथा—'महाजनो येन गत: स पन्था:।' 'येनास्य पितरो याता येन याता: पितामहा:। तेन यायात् सतां मार्गं तेन गच्छन्न दुष्यति॥' 'यद्यदाचरति श्रेष्ठस्तत्त-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

देवेतरो जनः। स यत् प्रमाणं कुरुते लोकस्तदनुवर्त्तते॥' 'येषु स्थानेषु यच्छौचं धर्म्माचारश्च यादृशः। तत्र तं नावमन्येत धर्म्मस्तत्रैव तादृशः॥' 'श्रेयान् स्वधर्मो विगुणः परधर्मात् स्वनुष्ठितात्। स्वधर्मे निधनं श्रेयः परधर्मो भयावहः॥' इत्यादि।

एतावता चेदं प्रतिपन्नमुपपद्यते—संसारेऽस्मिन् जीवा हि नितरां मायया समुपहिताः सदा त्रिविधदुःखतापेन दंदह्यमाना अपि तन्निराकरणकारणं निर्णेतुमसमर्थाः स्वेषामहितमपि हितत्वेन हितमप्यहितत्वेन मन्यमानाः किंकर्त्तव्यविमूढ़ा इतस्ततो विचरन्तोऽशेषक्लेशराशिमिव भुञ्जते। दयालवो महर्षयः परार्थं स्वार्थं मन्वानाः किं दुःखं किञ्च दुःखनिदानं को वा तन्निराकरणोपाय इत्यादिविषयं सम्यग्विचार्य्य निर्णीतवन्तः सन्तः संसारिणां लोकानां दैनन्दिनकृत्यमपि सर्व्वाभीष्टस्य ऐकान्तिकदुःखनिवृत्तिरूपपरमार्थस्य मोक्षस्य परम्परया निदानमाचक्षते। सुतरां महर्षिप्रदिष्टमेतत् प्रात्यहिककार्य्यजातं मुमुक्षूणामपि जीवानामैकान्तं करणीयमिति।

नन्वेवं कर्म्मपरम्परया कथमैकान्तिकदुःखोच्छेदः सम्भवति कर्म्मणां दुःखजनकत्वात् अदृष्टजननद्वारा चानन्तजन्मग्राहकत्वात् जन्मसत्तायाश्च एकान्तदुःखनिराशासम्भवादिति वाच्यं सकामकर्म्मपरम्पराभिरपि नैष्कर्म्म्यजननद्वारा कर्म्मिणामैकान्तिकदुःखनिवृत्तेः सम्भवात्। तथाहि भगवान् श्रीकृष्णः प्रथममर्जुनाय कर्म्म कर्त्तुमुपदिशति। क्रियमाणे च कर्म्मणि नैष्कर्म्म्यं स्वत एवायातीति यदुक्तं तेन—'कर्म्मण्येवाधिकारस्ते मा फलेषु कदाचन'। 'कर्म्मणैव हि संसिद्धिमास्थिता जनकादयः'॥ 'शरीरयात्रापि च ते न प्रसिध्येदकर्म्मणः'। 'न कर्म्मणामनारम्भात् नैष्कर्म्म्यं पुरुषोऽश्नुते॥ न च सन्न्यसनादेव सिद्धिं समधिगच्छति॥" इत्यादि।

न चात्र कर्मणो निन्दाकथनं कथं सङ्गच्छते मोक्षोपयोगित्वेन तस्यावश्यकत्वात्, कर्मणो निन्दा च भगवतापि गीतायामुक्ता—"दूरेण

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ह्यवरं कर्म बुद्धियोगाद्धनञ्जय" ! 'ध्यायतो विषयान् पुंसः सङ्गस्तेषूपजायते ॥ सङ्गात् संजायते कामः कामात् क्रोधोऽभिजायते ॥" इत्यादिना। अन्यत्रापि "प्रसजंश्चेन्द्रियार्थेषु नरः पतनमृच्छति।" इति। परन्तु तत्त्वज्ञानस्यैव सर्व्वथा मोक्षसाधनत्वमिति शास्त्रेषु शतशः प्रतिपादयति, तद् यथा—"बुद्धौ शरणमन्विच्छ कृपणाः फलहेतवः"। 'न हि ज्ञानेन सदृशं पवित्रमिह विद्यते॥ बहूनां जन्मनामन्ते ज्ञानवान् मां प्रपद्यते॥" "नान्यः पन्था विद्यतेऽयनाय"। इत्यादि। सत्यं भागवतार्थातिरिक्तस्यैव कर्मणः संसारबन्धजनकत्वं, न तु कर्ममात्रस्य, शास्त्रेषु च भगवद्भावानुप्राणितः सन्नेव कर्म कुर्य्यादित्युपदिशति। भगवति सर्वकर्मसमर्पणेन तस्य सार्थकतां प्रतिपादयति; तथा च गीतायामुक्तं—"यज्ञार्थात् कर्मणोऽन्यत्र लोकोऽयं कर्मबन्धनः। तदर्थं कर्म कौन्तेय! मुक्तसङ्गः समाचर॥ यत्करोषि यदश्नासि यज्जुहोषि ददासि यत्। यत् तपस्यसि कौन्तेय! तत् कुरुष्व मदर्पणम्॥" इत्यादि। 'यज्ञार्थ' इत्यत्र 'यज्ञ' शब्देन भगवानुच्यते, टीकाकृद्भिस्तथा व्याख्यानात्। तेन 'कर्त्ताह'मिति मन्यमानो यत् कर्म कुर्य्यात्तेन कर्मणा संसारबन्ध इत्यापद्यते। 'अहङ्कारविमूढ़ात्मा कर्त्ताहमिति मन्यते।' इति भगवद्वाक्यात् तथा प्रतीतेः। शब्दादिषु संसारविषयेषु अत्यन्तासक्तिरेव दुःखकारणम्। अनासक्तेन सता कर्मणि कृते ततः नैष्कर्म्यमापद्यते। तथा चोक्तम्—'असक्तो ह्याचरन् कर्म परमाप्नोति पूरुषः।' इति। तत्र दृष्टान्तस्तावत् महात्मा ध्रुवः। तस्य महात्मनो वाक्येनैव एतत् स्फुटीभवति नाधिकं प्रलपितुमिच्छामि। तद्वाक्यं यथा—"राज्याभिलाषी तपसि स्थितोऽहं त्वां प्राप्तवान् देव! मुनीन्द्रगुह्यम्। काचं विचिन्वन्निव दिव्यरत्नं स्वामिन्! कृतार्थोऽस्मि वरं न याचे॥" मार्कण्डेयपुराणोक्तः समाधिनामा वैश्योऽपि अत्र निदर्शनं भवितुमर्हति। स खलु महाभाग आदौ पुत्रदारैः निरस्तोऽपि धनलोभादसाधुभिः, तत्प्रेमप्रवणात्मा च विगुणेष्वपि

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

बन्धुषु। ततो मेधसमुनेरुपदेशेन मृण्मयीं दुर्गादेवीं सम्पूज्य निर्विसः ज्ञानं प्रार्थयन् तल्लाभेन परमपुरुषार्थमवाप। इति।

नित्यकर्मसन्ध्यावन्दनादितः यज्ञदानादिकाम्यकर्मपर्य्यन्तं सर्वमपि कार्य्यजातम् अवश्यकरणीयं न त्याज्यमिति भगवान् स्वयमेवाह स्म, यथा—"यज्ञो दानं तपः कर्म न त्याज्यं कार्य्यमेव तत्। यज्ञो दानं तपश्चैव पावनानि मनीषिणाम्॥ एतान्यपि तु कर्माणि सङ्गं त्यक्त्वा फलानि च। कर्त्तव्यानीति मे पार्थ निश्चितं मतमुत्तमम्॥ त्यक्त्वा कर्मफलासङ्गं नित्यतृप्तो निराश्रयः। कर्मण्यभिप्रवृत्तोऽपि नैव किञ्चित् करोति सः॥"

न च नित्यकर्मसन्ध्यावन्दनादेरदृष्टाजननात्, प्रायश्चित्तव्रतादेश्च पापक्षयमात्रसाधनत्वश्रुतेः स्वर्गादेरजनकत्वान्न कर्त्तव्यत्वमिति वाच्यं—चित्तशुद्धिजननद्वारा सन्ध्यावन्दनादेरपि ब्रह्मलोकावाप्तेः, अकरणे प्रत्यवायजननात्, पञ्चशूनाजनिताज्ञानजपापनाशकत्वाच्च। तथाचोक्तम्—"सन्ध्याहीनोऽशुचिर्नित्यमनर्हः सर्वकर्मसु। सन्ध्यामुपासते ये तु नियतं संशितव्रताः। विधूतपापास्ते यान्ति ब्रह्मलोकमनामयम्॥" इत्यादि। प्रायश्चित्तव्रतादेश्च स्वर्गाजनकत्वेऽपि दुःखजनकपापनिवारकतया पापिनामवश्यानुष्ठेयत्वान्नानुष्ठानवैफल्यमिति।

किमधिकं लपामि भो भ्रातरः! कर्मभूमौ भारतभूमौ कर्म कर्त्तुमेव भगवता प्रेरिता वयम्। सत्कर्मानुष्ठानार्थमेव हस्तपदादिकं कर्मेन्द्रियं सदसद्विचारयितुं ज्ञानेन्द्रियं चक्षुरादिकं प्रददौ नः। अतस्तत्प्रदत्तवस्तुनः सद्व्यवहारं विधाय तस्मिन्नन्नृणा भवामः। सर्वदा कर्म सदनुतिष्ठ। एवं चिन्तयामो वयं—"प्रातरारभ्य सायाह्नं सायाह्नात् प्रातरन्ततः। यत्करोमि जगन्नाथ तदेव तव पूजनम्॥ जानामि धर्मं न च मे प्रवृत्तिः जानाम्यधर्मं न च मे निवृत्तिः। त्वया हृषीकेश! हृदि स्थितेन यथा नियुक्तोऽस्मि तथा करोमि॥ आवाहनं न जानामि नैव जानामि पूजनम्। विसर्जनं न जानामि क्षमस्व

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

परमेश्वर ॥ त्वयि मे चापराधस्य त्वमेव शरणं प्रभो। भूमौ स्खलित-पादानां भूमिरेवावलम्बनम् ॥" इति शम्।

शिशिरविलासः

(पूर्वतोऽनुवृत्तः)

लेखकः—लक्ष्मीनारायण-श्रीरामशर्म्मा

सर्षपः कुसुमितो मधुपानां बोधयन्निव वसन्तलतानाम्।
पीतिमानमुपलेपयतीव क्षेत्रभूषु मधुरङ्गमहीषु ॥१७॥
निलिप्तकाश्मीरजसङ्गिचन्दनाङ्गनापयोदानुकृतिं दधत्यमी।
न नागरङ्गा न हरन्ति मानसं सुगन्धयो लोचनपद्धतिं गताः ॥१८॥
अस्मिन् स्वभावाच्चपलेक्षणाभ्यः कटाक्षनिक्षेपमिवैकविद्याम्।
आसाद्य यातीव समाप्तशिक्षः खं खञ्जनः शिक्षयितुं सुरस्त्रीः ॥१९॥

नन्वेष वेगसरणेन वसन्तराज-
मागामिनं किल समीक्ष्य लताश्वशालाः।
नव्या भवन्त्विति पुराणदलानि तेभ्यो
विश्लेषयत्यलघु नृत्यमिषेण वायुः ॥२०॥

मण्डलानि दधता ननु भूयस्ताण्डवस्य सरणिः पवनेन।
स्वीकृतोद्धतविधूनितधूलिशीर्णपर्णनिचयस्तनमूर्च्छम् ॥२१॥
शाखिनश्चपललम्बितशाखा व्याहतातिशयितध्वनिपूरम्।
मुक्तकीर्णसुमनः खगमालाविस्मृतस्खलितपर्णविभूषाः ॥२२॥
वेणवो ललितसन्ततनादैर्झर्झरध्वनिभिरुत्तमतालाः।
उत्तरङ्गहतिभिः कृततालं साद्यमस्य रचयन्ति नु नद्यः ॥२३॥

सम्पन्नान् दृढ़कणभूरिभारभुग्ना
नापाकश्रियमुपलम्भयन् समूहान्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सस्यानां प्रवितत-रंहसा प्रवातो
गृह्णाति परकृतिदत्तचित्तकीर्तिम् ॥२४॥
अश्वत्थो विगलितपर्णनग्नपिण्डः
शाखाभिः क्वचन च कम्पितैकपर्णः ।
निःशेषं कठिनतपोव्यपेतरागः
सञ्जातः कपिलकचो यथा तपस्वी ॥२५॥

यद्वै ते सकलमहीरुहा लताभिर्वायुाशाः कठिनतरं तपश्चरन्तः ।
विध्वस्ताभरणशरीरसाधनाद्यमाराधां दधति मधोऋतूत्तमस्य ॥२६॥

शय्यात्वं च्युतदलसञ्चयैः पशूनां
गोमृभ्यो धरणिरुहां तले स्थितेभ्यः ।
आधारि ह्यपरहितार्थमङ्गभाजो
विभ्रंशेऽपि निजकृतिं नहि त्यजन्ति ॥२७॥
विभ्रष्टा दलनिचयाः पुनस्तरूणा-
मप्युच्चैर्मुहुरनिलेन नीयमानाः ।
न स्थानं कथमपि तेऽधिगन्तुमर्हा-
विभ्रष्टस्य निजपदादियं दशा हि ॥२८॥

निःशेषं व्यपगतपक्वपीतपर्णा नूत्नाना दधति पलाशिनोऽङ्कुरांश्च ।
उद्भेदानृतुसमये यथा हि रामा उल्लासार्थमिव समिद्धयौवनस्य ॥२९॥
भूयोभिर्लसतितरां समुत्सवाद्येरानन्दप्रद ऋतुरेष देहभाजाम् ।
प्राचीनं समवनयन्नवीनलक्ष्मीमात्तागूः सुरभिकृते तदीयबन्धुः ॥३०॥

कृत्वासौ भविलविभूतिसम्मुखीनान्
भुङ्क्तानवनिधरानशेषलोकान् ।
प्रत्येतुं निहितमतिः समाप्तकृत्यो
भूयो नः शिशिरऋतुः शिवाय भूयात् ॥३१॥
अलिविहितविरावैर्जालकैर्भूरुहेषु
सुरभिदलमुपेतं वीक्ष्य भूयो दलाङ्गैः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इति विविधविलासैराशुगेन प्रयातः
शिशिरऋतुरुदारो भूतये वो विभूयात् ॥२२॥

दूतकाव्यम् *

लेखकः—श्रीचिन्ताहरणकाव्यतीर्थः एम-ए

महाकाव्यं, खण्डकाव्यं, चम्पूकाव्यञ्चेत्यादीनि बहुविधान्येव काव्यानि समलङ्कुर्वन्ति विराजन्ते सुरभरस्वतीकण्ठम्। तत्र च स्वल्पायतने खण्डकाव्ये पञ्चकानि, अष्टकानि, दशकानि, शतकानि, दूतकाव्यानि चान्तर्भवन्ति, स्वल्पावयवान्यपि यानि वस्तूनि प्रायेण निखिलान्येव कवित्वप्रतिभया रसालङ्कारान्तर्भूततया भावगाम्भीर्य्येण च स्वत एव सामाजिकानां चित्तचमत्कृतिमुपपादयन्ति सततम्। एतानि च Ode, elgegy प्रभृतिपाश्चात्यकाव्यसदृशवस्तूनां सुरभारत्यामनुमीयमानादभावादुद्घोष्यमाणं परीवादं कथञ्चित् दूरीकर्त्तुमलम्भवन्तीति मन्यामहे। एषु पुनर्दयितानां सविधे दूतप्रेषणमधिकृत्य प्रवृत्तानि दूतकाव्यानीति सम्भाव्यमानाभिधानानि मनोहरमनोहराणि वस्तुजातान्यधिकृत्यैवात्राद्य समासतः किञ्चिदालोचयितुमभिलषामः।

बह्वन्येव दूतकाव्यानीदानीमपि समुपलभ्यन्ते संस्कृतसाहित्ये सकलानि विकलानि वा। तेषु च यानि सौभाग्यतो मे दृष्टिगोचरतामुपगतानि येषां चोपलब्धवृत्तान्तो मयाऽऽकर्णितो वाचितो वा तेषाम् विवरणाभिधानान्यादौ अधस्तात् प्रकटयामः।

१। **मेघदूतम्**—कालिदासप्रणीतम् इदमेव प्रसिद्धं वस्तु संस्कृतसाहित्ये दूतकाव्येषु प्रधानतमं स्थानमधिकुर्वत् विराजते।

---

* परिषदी मासिकाधिवेशने पठितोऽयं निबन्धः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अत्र शापग्रस्तेन यक्षेण प्रियासमीपे मेघरूपस्य दूतस्य प्रेषणमुपवर्णितम्।

२। **पवनदूतम्**—धोयीककविराजरचितम्। अत्र सेनान्वय-कुलतिलक-गौड़ाधिप-श्रीमन्महाराजलक्ष्मणसेनसविधे कुवलयवत्या नाम गन्धर्वनन्दिन्या लक्ष्मणसेनानुरक्तचित्तया मलयपवनरूपस्य दूतस्य प्रेषणमुपवर्ण्यते।

३। **हंससन्देशः**—वैष्णवकविवेदान्तदेशिकविरचितम्। अत्र रामकृतम् अशोककानने सीतासविधे हंसरूपदूतप्रेषणमुपन्यस्तम्। कवेरस्याभ्युदयकालः १२६८ तम खृष्टाब्दात् परम् १३७६ तम खृष्टाब्दाच्च प्रागिति प्रतिभाति।

४। **हंसदूतम्**—(कलिकातास्थ-वसुमतीकार्य्यालयतो मुद्रितम्) वङ्गीयकवि-रूपगोस्वामिविरचितम्। अयन्तावत् शकीयपञ्चदशशताब्द्यां प्रादुर्भूतः विविधान् वैष्णवग्रन्थान् विनिर्म्मितवान्। अत्र मधुरापुरं गतस्य कृष्णस्य सविधे ललिताख्यया गोप्या हंसरूपस्य दूतस्य प्रेषणमधिक्रियते। *

५। **मनोदूतम्**—चैतन्यदेवमातुल-विष्णुदासरामरामद्विजप्रणीतम्। संसारविषयतः मनसः कृष्णसमीपे दूतरूपेण प्रेषणम् भगवदभिमुखीकरणञ्चात्रोपवर्णितम्। सर्वथातीव रमणीयमिदं वस्तु।

६। **जैनमेघदूतम्**—(भावनगरस्थ-जैनात्मानन्दसभातः प्रकाशितम्)—अञ्चलगच्छीयमेरुतुङ्गाचार्य्यविरचितम्। कविवरोऽयं शकीय-पञ्चदशशताब्द्यां प्रादुरासीत्। अत्र तावद्ग्रन्थे संसारविरक्तस्य समाश्रितरैवतगिरेः श्रीमन्नेमिकुमारस्य सविधे तदीय-

* यत्तूक्तं श्रीमताकुप्पुस्वामिशास्त्रिणा यथात्र कृष्णेन राधासमीपे दूतस्य प्रेषणमुपवर्ण्यते इति तत् भ्रमवशाद् इति प्रतिभाति (A Descriptive Catalogue of Sans. Mss. in Oriental Mss. Library, Madras, Vol XX No. 11903).

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कान्तया तद्विरहक्लिष्टया मेघो दूतरूपेण प्रेषित इति वर्ण्यते विषयः ।

७ । **पवनदूतम्**—सूरिवादिचन्द्रकृतम् (काव्यमालायां त्रयोदशगुच्छे प्रकाशितम्)। ग्रन्थकर्त्तुश्चास्य कालः खृष्टीयसप्तदश-शताब्दी। अत्र उज्जयिनीपतेर्विजयनरेशस्य अशनिवेगाभिधेयविद्या-धरहृतायाः स्वमहिष्याः तारायाः सविधे पवनद्वारा सन्देशप्रेषणम् उपवर्णितम् ।

८ । **पदाङ्कदूतम्**—नवद्वोपाधिपतेः प्रख्यातनाम्नः कृष्ण-चन्द्रनृपतेः पितुः रघुरामरायमहोदयस्य सभापण्डितेन कृष्णचन्द्र-सार्वभौमेन कविवरेण १६४५ मिते शकहायने निर्म्मितमेतत् । अत्र च मथुरां प्रस्थितस्य कृष्णस्य सविधे गोपीभिः कृष्णपदाङ्क एव दूतत्वेन प्रेषित इत्युपवर्ण्यते । अतितरां प्रसिद्धमेतदस्तु वङ्गेषु ।

९ । **मनोदूतम्**—१८१४ मिते वैक्रमवत्सरे तैलङ्गव्रज-नाथेन निर्म्मितमेतत् । तत्र दुर्य्योधनसभाप्रापितया केशाकर्षण-विह्वलया द्रौपद्या कृष्णसमीपे मनोरूपदूतस्य प्रेषणमुपवर्णितम् । (काव्यमालायां त्रयोदशगुच्छे प्रकाशितमेतदस्तु ।)

१० । **तुलसीदूतम्**—वैद्यनाथभट्टाचार्य्येण १७०६ मिते शाके प्रणीतम् एतत् । वृन्दारण्याद् गोपीभिर्मथुरायां कृष्णसमीपे तुलसी दूतत्वेन प्रेषिता इत्यस्य वर्णनीयो विषयः । तुलसीद्वारा नारायणः सन्तोषमेति इति चात्र ध्वनिः ।

११ । **कीरदूतम्**—गोपालकविरचितम् कालश्चास्य न निर्णेतुं पार्य्यते अन्तान्तिमश्लोके कालवर्णनस्य अस्पष्टत्वात् । तथाच—

दोर्दण्डेन वशीकृताः क्षितिभुजो यस्येह वङ्गावनौ
यस्याशेषगुणप्रदीप्तयशसा प्रच्छादितं क्ष्मातलम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वर्त्तन्ते परिषत्सु यस्य कवयः श्रीकालिदासोपमाः
काव्यं कीरवचोहरं वितनुते तस्यैव सभ्यो बुधः ॥

इत्यतः निश्चयेन किमपि प्रख्यापयितुं नालम्भवामः। परं महामहोपाध्याय-हरप्रसादशास्त्रिमहोदयैस्तावदेवमनुमीयते यथा विवादार्णवसेतुग्रन्थस्यान्यतमसंकलयिता नवद्वीपाधिपतेः सभापण्डितेन रामगोपालेनानेन भाव्यम्। (१) अत्र च वृन्दारण्यात् गोपीभिः कृष्णसमीपे मथुरायां कीररूपस्य दूतस्य प्रेषणम् उपन्यस्तम्। (अमुद्रितस्य ग्रन्थस्यास्य खण्डमेकं परिषदि वर्त्तते।)

१२। **मेघदूतसमस्यालेखः**—मेघविजयोपाध्यायकृतः—

१३। **कोकिलसन्देशः**—* उद्दण्डशास्त्रिकृतः अत्र काञ्चीनगरीस्थेन कामिना केनचित् कोकिलमुखेन प्रियासविधे केरलेषु सन्देशः प्रेषित इत्युपवर्णितम्। वासुदेवकृत-भृङ्गसन्देशमुपलभ्यैतेन कविना निर्म्मितमेतदित्याहुः।

१४। **भृङ्गसन्देशः**—† वासुदेवकृतः। यच्च्या कयाचित् प्रियतमातः दूरं नीतेन कामिना भृङ्गद्वारा प्रियासकाशे सन्देशः प्रेषित इत्यत्र विषयः।

१५। **हंससन्देशः**—‡ भट्टवामनकृतः। अत्र तावत् शापविप्रयुक्तेन यक्षेण हंसद्वारा प्रियासमीपे सन्देशः प्रेषित इत्युपवर्ण्यते।

१६। **चातकसन्देशः**— ब्राह्मणः कश्चिदतिदीनः

(१) Notices of Sanskrit Manuscripts—H. P. Shastri—Vol. I. Preface.

* Descriptive Catalogue of Sanskrit Mss.—Oriental Ms. Library Madras Qol. xx. No. 11835.

† Ibid No. 11865. ‡ Ibid No. 11912.

¶ १६—२० संख्यकानां विवरणम् J. R. A. S. (1884) P. 419 ff इत्यत्र वर्त्तते। तत्रैव च Pp. 491 ff [illegible] नोक्तः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

टिपुप्रभृति-तुरुष्कैराक्रान्ते मालावारप्रदेशे तत्स्थानं परिहाय अनन्तशयनं समाश्रित्य महाराजेन रामवर्म्मणा संलापं व्यधात्। परमकस्मात् पोड़ाग्रस्तः सन् राजानम् अनिवेद्यैव स्वगृहं प्रत्यावृत्तः, स पुनः रोगोपशमे काव्यमिदं राज्ञः समुत्सृष्टवानिति प्रसिद्धिः।

१७। **भ्रमरसन्देशः**—वासुदेवकृतः। वासुदेवोऽयं युधिष्ठिर त्रिपुरदहनादिकर्त्ता वासुदेवविजयविरचयिता वा तुल्य इति न निर्णीतम्।

१८। **शुकसन्देशः**—लक्ष्मीदासकृतः। अत्र स्वप्नविप्रयुक्तेन कामिना केनचित् शुकद्वारा प्रियासविधे सन्देशस्य प्रेषणमुपवर्णितम्।

१९। **सुभगसन्देशः**—अत्र कुमारिकातः स्नातकस्य कस्यचित् दूतरूपेण प्रेषणमुपवर्णितम्।

२०। **हंससन्देशः**—ग्रन्थकर्त्तुर्नाम नोपलब्धम्। दार्शनिकमिदं वस्तु। तस्यायमाद्यश्लोकः—

"कश्चिन्मायामृगवशगतः कर्म्मणा मुह्यमानो
भक्त्या शम्भोश्चरणगतया मुह्यमानो विषक्तः।
रामो यद्वज्जनकसुतया दण्डकारण्यभूमौ
चित्तेऽप्राप्ते क्वचन पुरुषः कल्पयामास वासम्॥"

२१। **नेमिदूतम्**—(काव्यमालाया द्वितीयगुच्छे प्रकाशितम्) विक्रमकविकृतम्। जैनमेघदूतस्य एतस्य च तुल्य एव वर्णनीयो विषयः।

२२। **शीलदूतम्**—चारित्रसुन्दरगणिविरचितम्।

२३। **इन्दुदूतम्**—(काव्यमालायां प्रकाशितम्) विनयविजयगणिकृतम्।

२४। **चेतोदूतम्**।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

२५। रथाङ्गदूतम्।

२६। उद्धवदूतम्—माधवशर्म्मविरचितम्। कृष्णसमीपादागताय उद्धवाय कृष्णविरहवेदनामसह्यां विनिवेदयन्त्या गोप्याः सविधे उद्धवस्य गोपीसमीपप्रेषितश्रीकृष्णदूतरूपेणात्मप्रकटनं गोपीनामुपसान्त्वनञ्चोपवर्णितम्। विषयोऽयमेव श्रीमद्भागवते दशमस्कन्धे सप्तचत्वारिंशत्तमेऽध्याये समुपवर्णितः।

२७। उद्धवसन्देशः—श्रीकृष्णेन मथुरातो गोकुले राधासविधे दूतत्वेन उद्धवस्य प्रेषणमत्रोपवर्णितम्।

२८। चन्द्रदूतम्—जम्बूकविकृतम्।

२९। मनोदूतम्।

३०। मेघदूतम्—मन्त्रिविक्रमकृतम्।

३१। पिकदूतम्—व्रजपुरात् गोपीभिः मथुरायां कृष्णसमीपे पिकरूपस्य दूतस्य प्रेषणमत्र उपवर्णितम्।

३२। लक्ष्मीकटाक्षदूतम्।

३३। भक्तिदूतम्।

३४। विप्रसन्देशः—लक्ष्मणसूरिविरचितः। (तञ्जानगरे मुद्रितमेतत्) कृष्णानुरक्तचित्तया रुक्मिण्या स्वापहरणार्थं कृष्णसमीपे दूतत्वेन वृद्धब्राह्मणस्य प्रेषणम्। विषयोऽयमेव श्रीमद्भागवते दशमस्कन्धे द्विपञ्चाशत्तमेऽध्याये समुपवर्ण्यते।

एवं च आधुनिकैर्म्महामहोपाध्याय-कृष्णनाथसार्वभौमादिभिर्विरचितानि वातदूतादीन्यपि वर्त्तन्ते।

दृश्यते चात्र दूतकाव्यविवरणे यथा एकस्यैव पदार्थविशेषस्य दौत्यं विषयीकृत्य विभिन्नैः कविवरैः पृथक् पृथक् काव्यं निर्म्मितमिति।

(सावशेषम्)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वार्त्ताचतुष्टये

भवभूतिपरिचयः *

लेखकः—श्रीउपेन्द्रनाथसेनगुप्तकाव्यतीर्थः

अथ किल वयमनभिनवमपि वार्त्ताचतुष्टयं प्रपानीयकमिव पुरातत्त्वरसपिपासूनां परिषत्सदस्यानां पुरतः समादाय समुपस्थिताः। न जाने तेषामिदं कियतीं तृप्तिं विधास्यति। अतिगहनं नाम पुरातत्त्वकाननं, तत्र प्रमादपरिखिन्ना अपि राज्ञ इवाभियानसमुत्सुकस्य भाविनोऽप्रमत्तस्य पुरावृत्तप्रकाशनचतुरस्य प्रागचरितभूमिभागे असंस्तुतवस्तुरूपकण्टकद्रुमाचिते अभिनवालोचनापरशुलीलां विदधानानाम् आटविकत्वं सम्पादयन्तीति मनसिकृत्वा कृतोऽयमुद्यमः। कृतश्च निबन्धविरचने परिश्रमः; यदि तेन विदुषां मनांसि परितोषं प्रयान्ति—ननु कृतार्था वयम्; अथवा यदि दैवदुर्विपाकात् फलम् अन्यथैव परिणमति, तदा तु जोषमासिष्यामहे। यतः अभिमानैकधना हि गुणवन्तः। निर्गुणानान्त्वयमेव गुणः यदभिमानेन तेषां संस्तवो नास्ति। कण्टकाचितत्वमपि कमलमृणालस्य गुणाय, महती वर्णसमृद्धिरपि किंशुकानां नोपकरोति, ये पुनः कण्टकिनोऽपि निर्गन्धप्रसवास्तेभ्यः शाल्मलितरुभ्यो नमः।

अस्य वार्त्ताचतुष्टयस्य 'भवभूतेः परिचयः' प्रथमा वार्त्ता; द्वितीया तु 'प्राचीनसमाजवैशिष्ट्यम्'; तृतीया 'केचन विलुप्तग्रन्थाः', चतुर्थी तु 'भारते प्रथमनाट्याभिनयः'। तद् यावदस्यादित आरभ्यते तावदत्र भवद्भिः आर्य्यमिश्रैरवधानं दीयमानमभ्यर्थये।

(क)

भवभूतेः परिचयः।

कविप्रकाण्डः श्रीकण्ठो भवभूतिः स्वकृते मालतीमाधवे वीर-

* परिषदो मासिकाधिवेशने पठितोऽयं निबन्धः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

चरिते च आत्मपरिचयं दत्तवान्। तस्मात् तु ज्ञायते यदसौ महाकविः दक्षिणापथस्थितपद्मपुराभिजनः, पंक्तिपावनस्य सोमपीथिनश्च गोपालभट्टस्य पौत्रः पवित्रकीर्त्तेर्नीलकण्ठस्यात्मसम्भवश्चासीत्। जातुकर्णी अस्य जननी ज्ञाननिधिश्च गुरुरासीत्। अयं भट्टगोपालस्य पञ्चमपौत्र आसीत्। ज्ञाननिधिरित्यस्य गुरोर्नाम विरुदमात्रं वा तत् सम्यक् नावधारयितुं शक्यते। स्वर्गतसुगृहीतनामानः विद्यासागरपादाः स्वकृतोत्तरचरितटीकायां—"जातूकर्णगोत्रसम्भवत्वात् भवभूतिजनयित्री जातूकर्णी इत्यभ्यध्यायि" एवं लिखितवन्तः, सम्भवत्येतत् यतः मातृनामग्रहणं शिष्टाचारविरुद्धं, अपि च हरिवंशस्य द्विचत्वारिंशाध्याये अन्यत्रापि पुराणेषु जातूकर्णस्य नाम श्रूयते ;—

व्याघ्रः कात्यायनश्चैव जातूकर्णः कपिञ्जलः।
उपस्मृतय इत्येताः प्रवदन्ति मनीषिणः॥

इति श्लोकेन हेमाद्रिरपि जातूकर्णमुपस्मृतिकर्त्तारमाचचक्षे। परमयं जातूकर्णो गोत्रप्रवर्त्तक आसीन्नवेति न ज्ञायते। दिव्यावदानस्य त्रयस्त्रिंशाध्याये यजुषः शाखासु अन्यतरा जातूकर्णशाखा पठ्यते, तद्यथा तत्रैव—

"अध्वर्य्यूणां मते ब्राह्मणाः सर्व्वे ते अध्वर्य्यवो भूत्वा एकविंशतिधा भिन्नाः। तद्यथा—कठाः कणिमा वाजसनेयिनो जातूकर्णाः प्रोष्ठपदा ऋत्त्रयः। इतीयं ब्राह्मणाध्वर्य्यूणां शाखा। एकविंशत्यध्वर्य्यवो भूत्वा एकोत्तरं शतधा भिन्नम्।" अत एव भवभूतेर्मातामहस्य जातूकर्णशाखाश्रयित्वात् भवभूतेर्मातुः जातूकर्णीति नामाभवत् इत्यनुमानमपि सर्वथा सङ्गतमेव। प्रख्यातविद्यावैभवानां भि, एस्, आप्ते महोदयानां मते अधुना नारओयार इति ख्यातः मालवान्तर्गत सिन्धुतीरवर्त्तिभूभाग एव पुरा पद्मावतीनगरीति नाम्ना परिचित आसीत्। मालतीमाधवे अस्याः पद्मावतीनगर्य्या उल्लेखो दृश्यते। अस्याः समीपे पारालवणामधुमत्यभिधानाः तिस्रः नद्य आसन्, अधुना

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ताः पारालुणमधुवराख्याः सञ्जाताः इत्यपि श्राप्ते महोदयेन कथ्यते। आसाञ्च पारादीनामुल्लेखो मालतीमाधवस्य नवमाङ्के—

पद्मावतीविमलवारिविशालसिन्धु
पारासरित्परिकरच्छलतो बिभर्त्ति।

*　　*　　*　　*

*　　*　　*　　*

तथा—सैषा विभाति लवणा ललितोर्म्मिपङ्क्तिः

इत्यादि श्लोकयोस्तथा—"अयञ्च मधुमतीसिन्धुसम्भेदपावनो भगवान् भवानीपतिः अपौरुषेयप्रतिष्ठः सुवर्णविन्दुः इत्याख्यायते" इति वाक्ये परिदृश्यते। यात्वयन्तु मालवप्रदेश उत्तरापथवर्त्ती अस्य दक्षिण-प्रान्तश्च विन्ध्यपर्वतपादशायी, अतःपरमेव दक्षिणापथस्यारम्भः। दक्षिणापथान्तर्गतविदर्भनगरीसमीपे (Berar) पद्मपुरे भवभूति-रजायत। पण्डितप्रवरः कार्णिंहामोऽपि (Cunningham) मतमेतत् समर्थयति। तदानीन्तु कुण्डिनपुरं विदर्भराजधानी आसीत्। मालतीमाधवे पाटलावत्यभिधानायाः कस्याश्चित् सरितः तथा श्रीपर्व-तस्योल्लेखो दृश्यते। पाटलावती पद्मावतीनगरीसमीपे एव आसीत्। तिव्वतीयभाषायां खीष्टीयाष्टमनवमदशमशताब्दीलिखितेषु पुस्तकेषु (Skya-nar-idan-ma) क्यनरदन्मशब्दः प्राचुर्य्येण परिलक्ष्यते। अयञ्च तद्देशीयभाषायां पाटलावत्या * एव नामान्तरं, परं तत्रापि पाटलावत्याः अवस्थितिस्थानं न निर्दिष्टम्। स्वर्गत-शरच्चन्द्रदास-महोदयेनोक्तं यत् तिव्वतीयभाषायां श्रीपर्वतस्य (Dpal-gyi-ri) पल्-ग्यि-रि इति नामान्तरं दृश्यते, तिव्वतीयग्रन्थेषु च तस्य दक्षिणा-पथे अवस्थितिः निर्णीतास्ति। भवभूतिविरचितरूपकेषु तस्य यथा गोदावरीजनस्थानदण्डकादिषु अनुरागातिशयोऽवलोक्यते

* भवतु अमुष्माद् गिरिशिखरात् पाटलावत्यां निपत्य माधवस्य मरणाय सरी भवामि।
(मालतीमाधव ९)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar.

Digitized by Arya Samaj Foundation Chennai and eGangotri

तथैव पद्मावतीनगर्य्यां दृढ़परिचयः। यत्र यत्र भवभूतिः पर्वतभरण्यं वा वर्णितवान्, यत्र यत्र स दण्डकादीनां नामोल्लिखितवान्, तत्र तत्रैव तस्य पर्वतादिभिः सहजपरिचयः दण्डकादिषु च नैसर्गिकप्रणयानुबन्धः निपुणमभिव्यक्तः। प्रसङ्गतः क्वचिन्नातिप्रसङ्गतश्च भवभूतिः भीषणाभोगरुक्षं काननं चरत्प्रस्रवणसलिलं श्यामलं पर्वतकुलं नदद्वारिराशिनदीश्च वर्णयन् सुखमनुपमसुपभुङ्क्ते। प्रकृतेः रौद्रमूर्त्तिवर्णनायां कोऽप्यन्यः कविः भवभूतेः प्रतिबलो नास्ति। अतो मन्ये निविड़काननसङ्कुले पर्वतपार्श्ववर्त्तिनि कस्मिंश्चित् स्थाने एवासीत् पुरातनं पद्मपुरं नाम नगरम्। पद्मपुरात् पद्मावतीनगरी बहुयोजनेषु तिष्ठति। भवभूतिकाले वाष्पीयशकटादिविहीने पद्मपुरात् यदि कोऽपि मासेनापि पद्मावतीं गन्तुम् अशक्नोत्, तर्हि तस्य गमनशक्तिरवश्यमेव प्रशंसनीयासीदिति वक्तव्यमेव। परमिदमेव विशेषेण लक्षितव्यं, यत् पद्मावत्यपि भवभूतिः सविशेषपरिचयम् अनुबध्नाति, स्नेहप्रकर्षञ्चानुभवति। यथा दण्डकादीनाम् आजन्मपरिचितशैशवविहारभूमीनां प्रसङ्गादेव महाकवेरस्य मनः सरसायते, नयने आर्द्रभावं गच्छतः, शरीरञ्च पुलकमातनोति, समग्रा कवित्वशक्तिः समुज्जृम्भते तथा पद्मावतीकुण्डिनपुरादीनां प्रसङ्गादपि। न केवलं कविः पद्मावत्या परिचितः परमस्याः नदीभिः प्रत्यन्तपर्वतैरट्टालिकाभिश्च। न केवलं भगवतः शिवस्य सुवर्णविन्दुनामलिङ्गमूर्त्त्या असौ परिचितः परमयम् शिवमिमं "अपौरुषेयप्रतिष्ठ" इति विशेषणेन विशेषयन् अयं भूतलात् स्वयमुत्थितः न केनापि प्रतिष्ठितः इति इतिहासमपि वक्ति। न केवलमितिहासं वक्ति, भक्त्यतिशयमपि दर्शयति। सुवर्णविन्दुरिति नामोच्चारणसमनन्तरमेव स शिवमुपगम्य सौदामिनीमुखेन स्तौति,—

जय देव भुवनभावन जय भगवन्नखिलवरद निगमनिधे।
जय रुचिरचन्द्रशेखर जय मदनान्तक जयादिगुरो ॥ (मा,मा,९)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

केषाञ्चिन्मते स्पष्टमनुल्लिखितमपि अन्यदप्येकं स्थानं कवेः परिचितमुपलभ्यते। भवभूतेः रूपकत्रये कालप्रियनाथस्य उल्लेखः अस्ति। स खलु उज्जयिनीप्रसिद्ध-शिवविशेषः। परमस्मिन् विषये सर्व्वेषां मतसङ्गतिर्नास्ति। मालतीमाधवटीकाकृत् जगद्धरः "कालप्रियनाथस्य" इत्यस्य टीकायां—"कालप्रियनाथस्य तद्देशदेवभेदस्य" इति लिखितवान् विद्यासागरपादा अपि तन्मतमनुसृत्य 'कालप्रियनाथः पद्मपुरप्रसिद्धः शिव' इति लिखितवन्तः।

परं कालप्रियनाथस्य उज्जयिनीस्थितत्वे प्रबलतरप्रमाणानां सद्भावात् जगद्धरविद्यासागरयोः मतं सदोषमेव इत्यन्ये। तथा च पठ्यते बालरामायणे—"अयमुज्जयिनीनिवासी भगवान् महाकालनाथः।" कथासरित्सागरे च उज्जयिनीवर्णनायां दृश्यते श्लोकः,—

"यस्यां वसति विश्वेशो महाकालवपुः स्वयम्।
शिथिलीकृतकैलासनिवासव्यसनो हरः॥"

कालिदासोऽपि रघुवंशस्य षष्ठे सर्गे—"असौ महाकालनिकेतनस्य" इत्यादिश्लोकेन, मेघदूतस्य पूर्वमेघे च—"अप्यन्यस्मिन् जलधर महाकालमासाद्य काले" इत्यादिश्लोकेन उज्जयिनीप्रसिद्धः शिव एव महाकाल इति निर्दिदेश। स्कान्दे च—

तथा पुण्यतमं देवि महाकालवसं शुभम्।
यत्रास्ते श्रीमहाकालः पापेन्धनहुताशनः॥

इति शिवस्य महाकाल इति नामान्तरं समुपलभ्यते। बहव एव विद्वांसः महाकाल इति कालप्रियनाथस्यैव नामान्तरमित्याहुः। परम् एतस्य मतस्य समर्थने प्रमाणविशेषो नास्ति, यतः अधुनापि उज्जयिन्यां यः शिवोऽस्ति, स महाकालनाम्ना एव प्रसिद्धः, न तु कालप्रियनाथनाम्ना। किञ्चित्सादृश्यात् उभयोरेकत्वप्रतिपादनं न युक्तमिति मन्यामहे वयम्। भवतु कविः स्वजन्मभूमौ पद्मपुरे तत्सन्निहित-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्थानेषु च प्रणयवान् इत्यत्र किमपि अद्भुतं नास्ति, परं कथं स पद्मावतीनगर्य्यामपि तथासक्तचित्त इत्येव अस्माकं प्रश्नविषयतामवगाहते।

वयन्तु मन्यामहे यत् महाकविरसौ विदर्भेषु लब्धजन्मा माधववत् आन्वीक्षिकीप्रभृतिविद्याः शिक्षितुं स्वयं यौवने पद्मावतीमगच्छत्, तत्र च तस्य बहुकालावस्थानात् जन्मभूमौ विदर्भदेश इव पद्मावत्याञ्च संरूढ़रागोऽयमभवत्। अपि च महाकविरसौ मालतीमाधवे कामन्दकीप्रभृतीनां बौद्धप्रव्राजिकानां यदाचारादिकं वर्णितवान्, तदपि स तत्रैव ददर्श। यतः प्राचीनकालादेव यथा मालवप्रदेशे न तथा दाक्षिणात्ये बौद्धानां प्रचार इति श्रूयते।

अङ्गवङ्गकलिङ्गेषु सौराष्ट्रमगधेषु च।
तीर्थयात्रां विना गच्छन् पुनः संस्कारमर्हति॥

इत्यादिधर्मशास्त्रनिर्देशोऽपि अङ्गादीनां कादाचित्कं बौद्धभूयस्त्वं निर्देशयति इति च केचन ऐतिहासिकाः। अन्ये च ऋग्वेदादिष्वपि पुरा वङ्गकीकटादीनामनार्य्यजनाध्युषितत्वात् तत्र तत्र गतिप्रतिषेधो विद्यत इति वचनमिदं वेदवाक्यानुवादपरमिति मन्यन्ते। परमपरे तु सौराष्ट्रादीनामपि अत्र उल्लेखो दृश्यत इति बौद्धभूयस्त्वमेव तत्तद्देशस्य निन्दितत्वे हेतुरिति प्रत्यवतिष्ठन्ते।

सौराष्ट्रप्रदेशस्तु मालवस्य प्रत्यन्तस्थित एव। मालतीमाधवे तान्त्रिककापालिकानां ये व्यापारा वर्णितास्तेऽपि महाकविना अत्रैव मालवे प्रत्यक्षीकृताः। दाक्षिणात्येऽपि तान्त्रिकाणां प्रभाव आसीदिति नास्ति सन्देहः, परं मालवान्तर्गतार्बुदपर्वतादिषु (आरावल्ली) पुरा भूयांसः तान्त्रिका आसन्, किमधिकं तत्राधुनापि बहवः कापालिका वसन्ति। प्राचीनकालादेव आन्वीक्षिकीविद्यायाः उत्तरापथे समधिका चर्चासीत्, अतः तादृशविद्याशिक्षार्थं दक्षिणापथात् उत्तरापथे आगमनं युज्यत एव। वैदिकसदाचाराणां भवभूतिकृतग्रन्थे य उल्लेखोऽस्ति, स तु क[illegible]ना स्व[illegible]श एव बाहुल्येन परि-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

लक्षित:। अध्ययननिरतस्य माधवस्य भागधेयेन समं कवेरपि भागधेयस्य सादृश्यमासीत् न वा, बिम्बभूतस्य भवभूतेर्माधव एव प्रतिबिम्ब:, उतान्यथा, तत्तु सर्व्वज्ञो जगदीश एव जानाति, परमेतदपि ऐतिहासिकानां कुतूहलमातनोति। भूतार्थत: किं भवभूतेर्नामासीत् तदपि न निर्द्धारितम्। केचिद् वदन्ति "साम्बा पुनातु भवभूतिपवित्रमूर्त्तिः" इति गिरिजां स्तुवते राज्ञा परितुष्टेन भवभूतिरिति उपाधिर्दत्त:। केचिच्च 'ऋचो यजूंषि सामानि सा हि श्रीरमृता सतो" इति श्रीशब्दस्य त्रयीत्वावगमकत्वं निर्व्वाच्य श्रीकण्ठशब्दं व्युत्पादयन्ति। तत् कोऽयमासीत् भवभूति:? दृश्यते हि विश्वकोषे यत् मध्यप्रदेशान्तर्गते इन्दोरनगरे हस्तलिखितमेकं मालतीमाधवपुस्तकमधिगतम्। तस्य तृतीयाङ्कपरिसमाप्तौ "इति कुमारिलशिष्यकृते" इत्यादि षष्ठाङ्कपरिसमाप्तौ च "इति कुमारिलस्वामिप्रसादप्राप्तवाग्वैभवश्रीमदुम्बेकाचार्य्यविरचिते मालतीमाधवे षष्ठोऽङ्क:", ग्रन्थशेषे च "इति भवभूतिविरचिते मालतीमाधवे दशमोऽङ्क:" इति लिखितमस्ति। वाक्पतिराजकृतप्राकृतभाषामयगौड़वहकाव्यस्य प्रकाशकश्चदपि पण्डितवर: भि, एस्, पाण्डुरङ्गमहोदय: (V. S. Pandurang's Gandovaho Introd. P. 206) एतदवलम्बनेन भवभूतिं कुमारिलभट्टान्तेवासितया निर्द्धारयति, अपि च कुमारिलस्वामिन: खोष्टीयसप्तमशताब्द्या: शेषभागे स्थितत्वात् भवभूतिं श्रीमदुम्बेकाचार्य्यं वा खोष्टीयाष्टमशताब्द्या: प्रथमभागे स्थापयति।

चिद्विलासयतिकृते शङ्करविजये सुरेश्वरापरनाम्न: मण्डनमिश्रस्य उम्बेकाचार्य्य इति नामान्तरं दृश्यते। आनन्दगिरिकृते शङ्करदिग्विजये पुन: मण्डनमिश्र: भट्टकुमारिलस्य स्वसृपतिरासीदिति अवलोक्यते। अत: मण्डनोम्बेकभवभूतय: एकस्यैव विभिन्नाभिधानानि इति प्रमाणपदवीं नीतम्। अपि च भवभूति: कुमारिलस्य शिष्य:

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भगिनीपतिश्चासीत् इत्यप्यवगम्यते। परं भट्टकुमारिलः शङ्करस्य समकालीनः। राजतरङ्गिण्याः चतुर्थतरङ्गस्थितचतुर्दशाधिकशततमश्लोके—

कविर्वाक्पतिराजश्रीभवभूत्यादिसेवितः।
जितो ययौ यशोवर्म्मा तद्गुणस्तुतिवन्दिताम् ॥

इत्युल्लेखदर्शनात् चतुर्विंशत्युत्तरसप्तशततमखीष्टाब्दे काश्मीराधिपतिना ललितादित्येन पराजितस्य कान्यकुब्जपतेः यशोवर्म्मणः समकालीनं भवभूतिं दृष्ट्वा शङ्कराचार्य्यश्च खीष्टीयाष्टमशताब्द्याः शेषभागे आविर्भूतं मत्वा पण्डिताः सर्वमेतदुपेचन्ते अपरे च केचन भवभूतेः मीमांसादर्शने तथाविधपाण्डित्यानवलोकनात् मतमेतत् नाद्रियन्ते। साम्प्रतमस्माभिस्तु तादृशः प्रमाणविशेषः प्राप्तः, येन एतावन्तं कालं व्याप्य पण्डितैरुपेचितं मतमेव सत्यतया प्रतिभाति। भवभूतेर्दर्शनशास्त्रज्ञता यथा तद्रचितरूपकत्रये विलोक्यते, तेनायं सर्वेष्वेव दर्शनेषु वेदेषु च कृतश्रमो महापण्डित आसीदिति अनुमानं सर्व्वथा युज्यते।

प्रथमन्तावदिदमेव वक्तव्यं, यत् भगवच्छङ्कराचार्य्यप्रादुर्भावकालविषयिणीनां विप्रतिपत्तीनामभावो नास्ति। अत्र विप्रतिपत्तीनामांशिकपरिचया दीयते।

१। पुण्यपत्तनतः अष्टनवत्यधिकाष्टादशशततमखीष्टाब्दे (26th April) प्रकाशितायां केशरीपत्रिकायां—"एकत्रिंशदुत्तरषड्विंशतिशततमयुधिष्ठिरराजवत्सरे वैशाखे शुक्लपञ्चम्यां श्रीमच्छङ्करावतारः" इति केनचित् निर्द्धारितम्।

२। प्रख्यातैतिहासिकपण्डितनिखिलनाथरायमहोदयः शृङ्गारिमठात् विशिष्टोपकरणं संगृह्य निर्द्धारितवान् यत् ऊनाशीत्यधिकचतुःशततमखीष्टपूर्व्वाब्दे श्रीमच्छङ्कराचार्य्याः प्रादुरासन्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

३। भाण्डारकरमहोदयानां मते अष्टोत्यधिकषट्शततमखीष्टाब्दे श्रीमच्छङ्करावतारः।

४। विश्वकोषमते चतुरशीत्यधिकषट्शततमखीष्टाब्दात् प्रक्रम्य षड़शीत्यधिकषट्शततमखीष्टाब्दमध्ये श्रीमच्छङ्करावतारः।

५। एन् (N.) भाष्यकार महोदयस्य मते खीष्टीयषष्ठ-शताब्द्याः प्रागेव शङ्करोत्पत्तिर्बभूव।

अपराणि च बहूनि मतानि सन्ति परमत्र बाहुल्यभयात् तानि नोल्लिख्यन्ते, विस्तरतस्तु विश्वकोषे शङ्करशीर्षकनिबन्धे अवलोकितव्यम्। (क्रमशः)

सारस्वतमहोत्सवः

(वाराणसी-वङ्गीयच्छात्रावासतः प्राप्तः)

भारतीयतनये दयावती भारतीह भुवि सा समागता।
वापिकाप्रभृतयो मधूत्सवे पूजयन्ति ननु यामनारतम्॥१॥
"आसनं" स्वहृदये तु वापिका राजहंसवरमज्जनच्छविम्।
काकलीं परभृतो मनोहरां "स्वागतञ्च" मधुरं प्रकल्पते॥२॥
सुप्रसन्नसलिला सदुत्पला "पाद्य"दानमपि सा मलापहम्।
सञ्चिताम्बुकणपुष्प-कम्बुना "स्वर्घ्यं"मेव ननु शङ्खपुष्पिका॥३॥
निम्नगापि मृदुगामिनी मुदा "सादराचमनकं" प्रयच्छति।
वल्लरी च मकरन्दविन्दुभिः पुष्प एव "मधुपर्क"माहृतम्॥४॥
पर्णराजिविगलद्धिमाम्बुभिः "स्नानवारि" विमलं महीरुहः।
दीप्तशुभ्रकरसंहतीः शशी सन्ततास्य "वसनं" सितं शुभम्॥५॥
कुन्दराजिमवदातमौक्तिकं हार"माभरणकं" लतावधूः।
चन्दनागुरुसुगन्धमावहन् "गन्ध"दानममलं वनानिलः॥६॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पुण्डरीककुसुमं प्रकाशितं पादयोः सुमनसश्च दीर्घिका ।
सालवृक्षरससम्भवं वनं "धूप"दानसुरभिं समाततम् ॥७॥
रक्तपद्ममुकुलानि पद्मिनी "दीप"पङ्क्तिमतुलानि यच्छति ।
ओषधिश्च रसनारसप्रदं पक्वशस्यवि"निवेदनं" परम् ॥८॥
"वन्दनां" नयनयोः सुखावहामन्तरीक्षगततारकावलिः ।
कल्पतेऽनिलविधूतमञ्जरीं "चामरञ्च" सहकारपादपः ॥९॥
एहि मातरतुले ! तव प्रियं बोधयस्व मदमत्तभारतम् ।
नो पतेत्तव पथश्चिरं यथा याचनेति वरदे ! तथा कुरु ॥१०॥

शारीरकभाष्यीय-प्रश्नोत्तरम्

लेखकः—कश्चन विद्यार्थी

विगतपौषसंख्यायां संस्कृतसाहित्यपरिषत्पत्रिकायां 'शारीरक-भाष्यीयप्रश्न' इति शीर्षकं प्रबन्धं दृष्ट्वाऽत्यन्तमेव मोदामहे। एवं भाष्यादिपर्यालोचनेन हि सत्यं सर्वेषां बुद्धिः सम्यगेव निकष्यत इति सर्वविदितमिदम्। अत्र स्वल्पैरेवाक्षरैरष्टाविंशतिप्रश्नानां सङ्कलनेन नूनं दाक्षिणात्यरामशास्त्रिशास्त्रिणः स्वस्य विषयसंग्रहपाटवं दर्शयन्ति। अतो वयमप्यत्र स्वल्पैरेवाक्षरैरेषां समालोचनार्थम् प्रवर्तामहे। शांकरभाष्ये मुद्रितोपलभ्यमानपुस्तकैकरूप्येण परिदृश्यमानेषु एषु पाठभेदेषु यदि उपपत्तिरस्ति, तर्हि तु प्रश्नानामेतेषां नावसरो भविष्यति। अत्र-(३अ०-१पा०-,७सू०) अवरोहाभ्युपगमात् असम्पूर्णोपपत्तिरित्यत्रासम्पूर्णोपपत्तिरिति शोधनं यत् कृतं तत् पूर्वोत्तरसन्दर्भानुगुणं योग्यमेव प्रतीयते। एतेन—२-२-१४ प्राप्तांशपरामर्शस्य नित्यानुवादतयाप्युपपद्यमानत्वान्न तद्बलेन प्रत्यभिज्ञाऽपोदितुं शक्यते इत्यत्रापोहितुमिति, तथा परिशिष्येत् इत्यस्य परिशिष्येत इति पाठशोधनमपि व्याख्यातं भवति। अवशिष्टेषु

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रश्नेषु तु अस्माकं प्रतिभाति न काप्यनुपपत्तिर्वर्तत इति। तत्र प्रथमप्रश्ने—१-१-१० सूत्रे ततः कदाचित् प्रधानकारणवादानुरोधेनापि ईक्षत्यादिश्रवणमकल्पयिष्यदित्यत्र यदि प्रतिवादो कर्तृत्वेन विवक्ष्यते, तर्हि श्रवणमित्यस्य कर्मतयाऽन्वयः सम्भवत्येवेति नात्र पाठान्तरकल्पनमपेक्षामहे।

(२) अन्यतरपरिग्रहे तु युक्तम् ब्रह्मपुच्छं प्रतिष्ठेत्यत्रैव ब्रह्मनिर्देश आश्रयितुमित्यत्रापि विभक्तिप्रतिरूपकाव्ययत्वेनोपपत्तिः।

(३) सोऽकामयत बहुस्यां प्रजायेयेतीयं श्रुतिरुदाहृतेत्यत्र ह्यधिकस्येतिशब्दस्याभावेऽपि न क्षतिः; इतिशब्दरहितांशमात्रस्य प्रकृतोपयोगविवक्षणात्।

(४) "असगतिदोप्त्यादानेषु" इति भौवादिकासधातुविवक्षणेनोपन्यसेत् इति प्रयोगोऽभ्यसेत् इति प्रयोगश्चोपपद्यते। उपसर्गवशात्त्वर्थभेदस्य विवक्षितस्य निर्व्वाहः सम्भवत्येव।

(५) १-३-१४ "तदविलयनेन तद्विपरीतमपहतपाप्मत्वादिगुणकं पारमेश्वरं रूपं विद्यया प्रतिपाद्यते" इत्यत्र प्रतिपद्यत इत्येव पाठो विवक्षित इति सर्पादिविलयनेन रज्ज्वादीनिति द्वितीया नानुपपन्नेति नात्रापि श्रीरामस्वामिशास्त्रिकल्पितस्य पाठभेदस्यास्त्यपेक्षा

(६) १-३-३२ ततश्च राजसूयादिचोदनोपरुन्ध्यात् इत्यत्र तमितिकर्माध्याहारेण यथाश्रुतपाठनिर्वाहात् न पाठान्तरकल्पनाऽपेक्ष्यते।

(७) १-४-३ अस्यैव जगतः प्रागवस्थायाः प्रधानत्वेनाभ्युपगमात् इत्यत्रास्य पदस्य प्रागवस्थाविशेषणत्वे नौचित्यमस्ति। एतत्पूर्ववर्त्तिवाक्ये हि "यदि जगदिदमनभिव्यक्तनामरूपं बीजात्मकं प्रागवस्थमि"ति इदं पदं जगत एव विशेषणं वर्तत इति, अस्य पदस्याप्यत्रत्यस्य तद्विशेषणत्वस्यैवौचित्यात्। न हि प्रागवस्थाया इदंशब्दविशेषणता सम्भवत्यपि, तस्याः परोक्षत्वात्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(८) १-४-१० किन्तु बन्धमोक्षप्रतिपिपादयिषा त्वेषेत्यत्र द्वितीयस्तुशब्दो हिशब्दार्थे इति सम्प्रदायः। दृष्टं हि बहुषु स्थलेषु हिशब्दार्थे तुशब्द इति।

(९) १-४-१४ "प्राक् सृष्टेरद्वितीयं स्रष्टारमाचष्टे" इति लट्प्रयोगो न्याय्य एव। पूर्ववर्त्तिसन्दर्भो हि "यथाभूतो ह्येकस्मिन् वेदान्ते सर्वज्ञः सर्वेश्वरः सर्वात्माऽद्वितीयः कारणत्वेन व्यपदिष्टस्तथाभूत एव वेदान्तान्तरेष्वपि व्यपदिश्यते।" इति वर्तमानतया निर्देशेनापि वर्तत इति नायं नियमः, यत् भूतकालेनैव निर्देशः करणीय इति न दोषः।

(१०) २-१-१ प्रख्यातप्रणेतृकासु स्मृतिष्ववलम्बरन् इति कर्मण एवाधिकरणत्वविवक्षया सप्तम्या अस्त्येवोपपत्तिः।

(११) २-१-२ तत्त्वज्ञानायोपकुर्वन्तीति तत्त्वज्ञानमुत्पादयितुं पुरुषस्योपकुर्वन्तीत्यर्थः। "क्रियार्थोपपदस्य कर्मणि स्थानिन" इति चतुर्थीति न दोषः।

(१२) २-१४ "अनवगम्यमानमिव ह्येदं लोके समस्तस्य वस्तुनश्चेतनत्वं शब्दशरणतया केवलयात्प्रेक्षे"त्यत्र हि उत्प्रेक्ष्येतेति पाठे प्रतिवादिनेति यदध्याहर्तव्यम्, तत्स्थाने प्रतिवादीति यद्यध्याह्रियेत, तर्हि न कोऽपि दोषो भविष्यतीति नात्रापि पाठान्तरकल्पनावश्यकता।

(१३) २-१-१४ "फलवत्सन्निधावफलं तदङ्गमितिवत्," इत्यस्यानन्तरं श्रूयते, "न तु स्वतन्त्रं फलाय कल्प्यते" इति। अत्र हि विश्वजिन्न्यायादिना स्वतन्त्रं फलार्थत्वं न कल्पयितुं योग्यमित्येव वर्णनीयम्, अतः कल्प्यत इत्येव पाठो युक्तः, न तु कल्पत इति

(१४) १३-१-२६ "कथमिवानुपचरितं तद्भावमद्यमानान्नानुगतोऽनुशयो प्रतिपद्यते।" अत्र प्रतिपद्येतेति लिङ्प्रयोगो न साधीयान्। यतः—'योह्यन्नमत्ति यो रेतः सिञ्चति, तद्भूय एव भवती'ति श्रुत्यर्थस्यात्राक्षेपः। तत्र भवतीति लट् प्रयोग एव वर्तते, न लिङ्प्रयोगः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

३-२-३ स्वप्ने पाञ्चालानभिगतश्चास्मिन् प्रतिबुद्धश्चेतिति-वाक्येऽस्मिन् पदेन देश एव परामृश्यते। "न हि सुप्तस्य जन्तोः क्षणमात्रेण योजनशतान्तरितं देशान्तरं पर्येतुं विपर्येतुं च ततः सामर्थ्यमस्ति" इत्येतदर्थोपपादनार्थमेव ह्येदं वाक्यम्। अत्रास्मिन् पदेन विवक्षणीयो देशः कुरुदेश एव, न पाञ्चालदेशः; दाक्षिणात्य रामस्वामिशास्त्री तु पाञ्चालदेशं परामृशन् भाष्यार्थमेवान्यथा-मन्यत।

३-२-७ "स्वप्नजागरितयोस्तूपाधिसम्पर्कवशात् पररूपापत्ति-मिवापेक्ष्य तदुपरमात् सुषुप्तेः स्वरूपापत्तिर्वक्ष्यते।" इत्यत्र सुषुप्ते-रिति पञ्चम्येव युक्ता, न तु सुषुप्ते इति सप्तमी। पररूपतापत्तौ उपाधिसम्पर्क इव स्वरूपापत्तौ उपाधिसम्पर्कोपरमरूपसुषुप्तिरेव प्रयोजिकेति ह्यत्र विवक्षितम्।

३-२-९ सामञ्जस्यमीयुः इत्यत्र ईयुरिति पदं साध्वेव, सिद्धान्त-कौमुद्यां इट-किट-कटी गतौ इत्यत्र कटीशब्दे ईकारप्रश्लेषेण ईधातुमपि स्वीकृत्य ईयुरिति प्रयोगसाधुता सम्यगेव समर्थिता।

३-२-२१ उत्तरमधिकरणं प्रकाशवच्च, एतत् व्यर्थमेव एवमपि भाष्यकाराणां शैली यत् विना इति शब्दम्, क्षुद्रेण क्षुद्रेण वाक्येन विवरणं नाम अत्रापि उत्तरमधिकरणम् प्रकाशवच्चेति वाक्यसमाप्त्य-नन्तरम् एतदुभयमिति वाक्यप्रवृत्त्या न दोषः।

३-२-२१ श्रुत्या चैवं जातीयकानां गुणानामुपासनार्थत्वेऽव-कल्प्यमाने इत्यत्र श्रुत्येति तृतीयान्तश्रवणात् कर्मप्रयोगविवक्ष-णात् अवकल्पमाने इत्येव पाठो युक्तः, नावकल्प्यमान इति।

३-२-२२ इति शब्देन त्वत्र प्रतिषेध्यं किमपि समर्प्यते नेति नेतीतीति परत्वात् नञ्प्रयोगस्य। अयमस्य भाष्यस्याशयः— अथात आदेशो नेति नेति इति वाक्ये नञ्शब्दनिषेध्यं किमिति शङ्कायां इतिपदबोध्यमेव तन्निषेध्यमिति। इतिशब्दबोध्यं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

किमिति शङ्कायान्तु इतिशब्दस्यायं सन्निहितवचन इत्यादिभाष्याद् अत्र नञ्शब्दस्य निषेधवाचकत्वम् इति शब्दस्य ततः परत्वं च गमक- मिति भावः पर्यवस्यति। अत्र च नञ्पदस्येतिपरत्वव्यवस्थापन- मेकमेवापेच्यते। अथात आदेशो नेति नेतीत्यस्यैव हि विवरण- मत्र क्रियते, न तु—"नह्येतस्मादिति नेत्यन्यदित्यस्येति। ततश्च इति शब्देन त्वत्र प्रतिषेध्यं किमपि समर्प्यते नेति नेतीतीतिपरत्वात् नञ्प्रयोगस्येति भाष्ये नेति नेतीत्यतःपरमन्यत्पदं च्युतमिति कल्पनया दाक्षिणात्य-श्रीरामस्वामिशास्त्रिण उक्तभाष्यार्थमेव सम्यङ् न विचार- यन्ति स्मेति ज्ञायते।

एतेन (३-४-५) साधनवीर्यविशेषात् त्वतीन्द्रिया कस्यचिच्छक्ति- राविर्भवति, तत्प्रतिबद्धा परस्य तिष्ठतीति भाष्यमपि व्याख्यातम्। अत्र तत्प्रतिबद्धा इति समस्तपदमेव, न तु तत् प्रतिबद्धेति भिन्नं पदम्। एवञ्च तत्पदस्य स्थाने सा-पदमपेक्षितमिति कल्पनं त्वराति शयं वाक्यार्थनिर्णये गमयति।

४ १-६ कर्मभूयं भूत्वा फलं करिष्यन्तीत्यत्र 'भूत्वा' इत्यस्य भूप्राप्ताविति चुरादिनिष्पन्नस्य विवक्षणे प्राप्तिरित्यर्थविवक्षणात् नात्र कर्मभूयमेत्येति पाठकल्पनस्यापेक्षा वर्तते।

४-३-१५ अनियमः सर्वासां इत्यत्राविशेषेणैवेषां विद्यान्तरे ष्ववतारिता। इदं भाष्यं सर्वेषामेवेषां विदुषामन्यत्र परस्मात् ब्रह्मणो गतिः स्यात् इति भाष्यानन्तरं तत्समर्थनार्थं प्रवृत्तम्। तथाच समर्थ्यसमर्थकयोरेकविषयत्वमपेक्षितमिति एषामित्येव पाठोऽत्र समुचितः। अनियमः सर्वासामिति सूत्रेऽपि भाष्यकाराः—यथाग्नि- विद्यावतां देवयानं पन्थानमवतारयन्तो "ये चेमेऽरण्ये श्रद्धा तप इत्युपासते" इति विद्यान्तरशालिनामियं गतिरिति सर्वविद्वत्साधार- ण्यमेव गतेः प्रतिपादयन्तीति एषामिति पाठ एवात्र युक्तः। गति- रिति त्वर्थत एवानुषङ्गेण वा सिध्यतीति न कोऽपि दोष इति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वल्लीविलासम्

(पूर्वतोऽनुवृत्तम्)

लेखकः—स्वर्गतः रामसत्यकाव्यव्याकरणवेदान्तदर्शनतीर्थः

इत्थं वृत्ते विधुरमनसा भृङ्गराजो विशीर्णां
कान्तां खिन्नां पवनमथितां वीक्ष्य शोकाभितप्तः ।
आपन्नेऽपि प्रियतमजने हर्षतुङ्गोमात्तमाङ्गं
कारुण्यांशग्रहणकृपणं तं रसालं बभाषे ॥२०॥

हे हे चूतद्रुम किमु भवान् सङ्गिनीमङ्गनानां
रत्नं पश्यन्नपि वसुमतीधारितां सुस्थ एव ।
के पार्श्वस्थां कमललतिकां वारणोत्खातमूलां
शुष्कप्रायां पथि निपतितां नाभिनन्दन्ति कष्टम् ॥२१॥

नैतद् युक्तं तव रसनिधे निर्दयत्वं रसाल !
यत्ते चित्तं रचयति सदा वज्रखण्डप्रचण्डम् ।
एषा दीना सुललितलता सुन्दरी स्नेहसारा
कां नो शोभाकर ! कृतवती गात्रशोभां त्वदीयाम् ॥२२॥

किं ब्रूषे त्वं मधुकरकुलाङ्गार ते लम्पटस्य
पापिन् पापप्रणयभवनस्यार्त्तिरिष्टा ममेति ।
रे रे चूताधम कठिनतासार ! सारल्यहीन !
चान्द्रीं कान्तिं स्पृशसि वपुषा त्वं कथं मूढराज ! ॥२३॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शिवसन्तोषस्तोत्रम्

(पूर्व्वतोऽनुवृत्तम्)

लेखकः—कविराज श्रीश्यामादासवाचस्पतिः ।

यत् कौशलं भुवननिर्म्मितिकर्म्मणीश !
संदृश्यते न कुशली जड़ एष तेन ।
संशेरते जड़धियो जड़धीप्रसङ्गात्
सत्तां तवागणितसूर्य्यविड़म्बिमूर्त्ते ! ॥४॥

इत्थं चार्वाकादिमतं निरस्य इदानीं यस्मिन् यत्प्रयोजनं यादृशं तत्तु जड़ेन दुर्घटमिति संशयवादिमतमपाकर्त्तुमाह—यदिति। हे ईश ! भगवन् ! प्रयोजनानुरूपजगन्निर्माणसमर्थ ! इति यावत्। भुवननिर्मितिकर्मणि, निखिलजगत्सर्ज्जनकार्य्ये। यत् कौशलम्; नैपुण्यम्। संदृश्यते, सर्व्वत्रैवाव्यभिचरितत्वेनानुभूयते। भगवदिच्छामन्तरेण अश्वादेः पदकाठिन्यम्, चामरवल्लाङ्गूलवत्त्वम्, हस्तिनः शौण्डादण्डानां काठिन्यं, मातरि स्नेहः, कलापिकलापे तथाविधालौकिकवैचित्र्यञ्च नैव सम्भवतीति भावः। तेन कौशलेन, एष जड़ः, चेतनाहीनः क्षित्यादिभूतवर्गः। न कुशली, नैव समर्थः। यदृच्छया श्लिष्टस्य जड़वर्गस्य न हेतुत्वम्; कौशलस्याभिप्रायरूपत्वेन तस्य बुद्धिपूर्व्वकत्वनियमात् जड़ानाञ्च तदभावादिति भावः। तथाहि—जड़धियः, मन्दमतयः पुरुषाः। जड़धीप्रसङ्गात्, स्थूलबुद्धिसम्बन्धात्। नास्तिक-तद्ग्रन्थादिसेवनादिति भावः। तव सत्ताम्, अस्तित्वम्। संशेरते, संशयनाशकप्रमाणसद्भावेऽपि दिग्भ्रान्तवत् सन्दिहन्ति। तादृशसंशयापनोदनाय सम्बोधनान्तरमाह—अगणितेति। अगणिताः असंख्याताः ये सूर्य्याः सहस्रांशवः, तेषां विड़म्बिनी मूर्त्तिर्यस्य तत्सम्बोधनम्। "कोटिसूर्य्यप्रतीकाशं कोटिचन्द्रसमप्रभम्" इत्याद्युक्तेः ॥४॥

ग्रन्थपरिचयः

महिम्नः स्तोत्रम्—पण्डितप्रवरेण पूर्णानन्दवंशकरीरेण तन्त्रज्योतिषादिशास्त्राभिज्ञेन श्रीसतीशचन्द्रसिद्धान्तभूषणमहोदयेन

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सम्पादितेनानेन वङ्गाक्षरमुद्रितेन व्याख्याविवृत्यनुवादादिसमलङ्कृतेन पुस्तकेन दुर्बोधमपि स्तोत्रमिदं सुबोधं जातं संस्कृतभाषाज्ञानविहीनानामपि जनसाधारणानामिति महदानन्दकारणमस्माकं यदिदानीमास्थावन्तः पाठकाः स्तोत्रस्यास्य सम्यगर्थज्ञानलाभात् साकल्येन स्तोत्रपाठफलभाजो भविष्यन्ति। दुर्गोत्सवतत्त्वादिविविधग्रन्थसम्पादकोऽयं पण्डितधौरेयः सुविदित एव सुरसरस्वतीसेवकानाम्, यथापूर्वं नवीनया भूमिकया विविधसूचीपत्रेण च समलङ्कृतोऽयं ग्रन्थः सर्वथा सनातनधर्म्मावलम्बिनां नेत्राकर्षकः स्वत एव भविष्यतीत्यलं पल्लवितेन। ग्रन्थकारेणैव प्रकाशितोऽयं ग्रन्थः कलकत्तायां सुलभः। मूल्यं रूप्यकमात्रम्।

आह्निककृत्य (प्रथमभाग)—श्रीश्यामाचरणकविरत्नेन सम्पादितम् पुस्तकमेतत् वङ्गाक्षरेण मुद्रितम्। कलकत्तायां सुलभम्, मूल्यं सार्द्धरूप्यकम्। पण्डितप्रवरेण विहिताशेषश्रमेण ससूत्रकवेदचतुष्टयालोचनपटुना स्वधर्म्मनिष्ठासम्पन्नेन कविरत्नमहोदयेन सम्पादितस्यास्य पुस्तकस्य संस्करणानां बहुत्वमेव सारवत्तायाः सूचकम्, प्रख्यापितञ्चानेनैवास्य सनातनधर्म्मावलम्बिषु सुधीप्रवरेषु प्रचारबाहुल्यम्—आकाङ्क्षितञ्चेतोऽप्यधिकम्। सर्वेषां सनातनधर्म्मावलम्बिनां सनातनधर्म्मरक्षणविधौ यतमानानां यथैतादृशानि पुस्तकानि नवोपनीतानां बालकानां सुलभानि भवन्ति तथैव यतितव्यम्। प्रायशो दृश्यन्ते वङ्गाक्षरमुद्रिता ग्रन्था विशेषतश्च वैदिकक्रियोपदेशकाः संख्यातीतभ्रमविलसिताः, फलञ्चैतत् व्यवसायैकदृष्टीनां सम्पादकानां श्रमकृपणतायाः, किन्तु आनन्दविशेषजनकमेतदेव यत् मन्त्रानुवादसहितो ग्रन्थोऽयं वङ्गाक्षरमुद्रितोऽपि सर्वथा विश्वासमर्हति सुधीप्रवराणाम्। सर्वथापेक्षितप्रमाणवचनानामाकरोल्लेखश्च लभ्यते। बहुषु स्थलेषु विशेषेण बालकानां बोधसौकर्य्याय वङ्गभाषयैव सर्वं व्याख्यातम्। विलुप्तप्राये वैदिकक्रियानुष्ठाने वेदज्ञानविरले वङ्गदेशे सदालोचनयुतस्यास्य ग्रन्थस्य प्रचारबाहुल्यं भूय एवाभीप्सामः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पुरस्कारप्रतिश्रुतिः

देवभाषापरिषदो मन्त्रिणा विज्ञापितम्, यथा 'देशभक्ति'विषयमुपजीव्य यैः विद्यार्थिभिः संस्कृतभाषामयनिबन्धो विरचय्य एप्रिलमासस्य त्रिंशद्दिवसाभ्यन्तरे सम्प्रेषयिष्यते निम्नलिखितसङ्केतानुसारेण, तेभ्य आपेक्षिकनिबन्धोत्कर्षमनुसृत्य क्रमेण १२॥)—९)—८)—७॥)—६)—५)—४॥)—३)—२॥)—२) रूप्यकाणि ऐकैकश्येन वितीर्य्येरन् इति।

प्रेषणसङ्केतः—देवभाषापरिषन्मन्त्री—सिवान—सारण।

प्रार्थना—

संस्कृतभाषायां पदार्थानां न्यूनान्यधिकानि वा लक्षणानि ये निम्नलिखितसङ्केतानुसारेण विलिख्य सम्प्रेषयेयुः, तेषां नामनिर्देशेन सहैव तानि लक्षणानि मुद्रापेयरन्। लक्षणप्रेषकेभ्यश्च मुद्रापितग्रन्थस्यास्य एकैकसंख्या सादरं वितीर्य्येत। लक्षणेषु पुरस्कारयोग्यतायां सत्यां लक्षणप्रेषका अवश्यमस्माभिः परिदृष्टव्याश्चेति विज्ञापयति विहारान्तर्गत—जामालपुर—पोष्टनिर्दिष्ट—पुट्टीग्रामवास्तव्या श्रीमनभरोदेवी।

सन्देशाः

परिषदो मासिकाधिवेशनम्—माघस्य विगतनवमदिवसे परिषदो मार्गशीर्षपौषयोरधिवेशने सुसम्पन्ने। तत्र श्रीमता अशोकनाथभट्टाचार्य्य बि, ए, महोदयेन अद्वैतमततात्पर्य्यशीर्षकः श्रीमता चिन्ताहरणकाव्यतीर्थ एम् ए महोदयेन च धोयीककविशीर्षको निबन्धः पठितः। उभावेव निबन्धौ स्वस्वविषयप्रतिपादननैपुण्यमाश्रित्य लेखकाभ्यां लिखिताविति तयो रमणीयताया-मविवादः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

उपाधिलाभे सम्माननम्—माघमासीयशुक्लैकादश्यां रविवासरे काशीस्थ-टीकमानिसंस्कृतमहाविद्यालये श्रीकाशिराज-सभापतित्वेन जातायां तदीयवार्षिकोत्सवसभायाम् अस्मिन्नेव संवत्सरे प्राप्तमहामहोपाध्यायोपाधिकाय श्रीमते फणिभूषणतर्कवागीशमहोदयाय गौरवसूचकमभिनन्दनपत्रं फलपुष्पसमन्वितं सभापतिना समर्पितमिति वृत्तेनानेन नितरां मोदामहे। स्थाने खलु कृतमभिनन्दनमिदं श्रीमद्भिरिति स्वल्पेनाक्षरेण पुनरपि वयमुद्घोषयामः। अधस्तदभिनन्दनश्लोकाः सन्निविश्यन्ते यथा—

यो वामाचरणं दधाति हृदये स्नेहस्फुरन्मानसो
यत्र प्रेमपरायणश्चिरमपि श्रीदेवकीनन्दनः।
पञ्चास्यः सुमनःसु यः परशुभोल्लासो चिताभूतिमान्
सोऽयं श्रीफणिभूषणो विजयते सोपाधिकः साम्प्रतम्॥
न्याये वैशेषिके च स्फुरति मतिरतिश्रेयसी तावकीना
संख्यावान् सांख्यतन्त्रे पुनरसि निपुणस्त्वं हि मीमांसयोश्च।
जानीषे जैनशास्त्रं मतमपि सुमते सौगतं वैष्णवञ्च
प्रौढ़िं धत्से च मन्वादिभिरभिलषिते धर्मशास्त्रेऽपि वाढ़म्॥
आविष्कुर्वन् रहस्यं जनयसि विदुषां विस्मयं तेषु तेषु
व्याख्यानं न्यायभाष्ये किमपि रचितवान् वङ्गभाषामयञ्च।
छात्रास्ते कीर्तिराशिं दिशि दिशि दधते पाठनापाटवेन
प्रायो नालोकयामो भुवि भवदुपमा लेशमप्यादधानम्॥
वितीर्णं सम्राजा गुणगणविदा संप्रति 'महा-
महोपाध्याये'ति प्रकृतमुपनामात्रभवते।
विदित्वा ते योग्यादरविधिमिमं तुष्टहृदयैः
क्रियन्ते सत्कारा विसविशदकीर्त्या विलसतः।

राजोपाधिलाभः—अस्मिन् संवत्सरे परिषत्सदस्यानां वदान्यप्रवराणां श्रीमतां देवेन्द्रनाथमल्लिकमहाभागानां राजोपाधि-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सम्मानप्रदानेन सम्राजा गुणज्ञतायाः सम्यक् परिचयो दत्तः। आशा-स्महे यथा मल्लिकमहाभागाः सम्मानपदमिदमुपगम्य इतोऽपि परतरं गुणगरिमाणमात्मना अनुगृह्य निरुपाधिरूपस्य परमेश्वरस्य महान्तं सन्तोषमाधास्यन्तीति।

चित्रपरिचयः

एतत्पत्रिकासचित्रिकायां येषां महात्मनाञ्चित्रमूर्त्तिः प्रकाश्यते। ते भट्टपल्लीवास्तव्या महामहोपाध्याय-৺शिवचन्द्रसार्व्वभौमपादाः मूलायोड़संस्कृतमहाविद्यालयस्य न्यायशास्त्राध्यापकाः अध्यक्षाश्चा-सन्। न्यायशास्त्रेषु तेषामसाधारणो विद्वत्ता सुविदितैव नैयायिक-धुरन्धराणाम्। अद्यतनेषु सुप्रथितनैयायिकेषु प्रायेण सर्वेष्वेव तदीय-शिष्यतागौरवमभिवीक्षामहे। एते अष्टादशवर्षे वयसि भट्टपल्ल्यां स्वभवनेषु विद्यार्थिनः समध्यापयितुमारेभिरे परेण च कियता कालेन पाण्डित्यप्रथिम्ना सहैव मूलायोड़विद्यालयमधिकृत्य आपरलोक-प्रयाणात् तत्रैव न्यायदर्शनादिशास्त्राणि समध्यापयाञ्चक्रिरे। तदधि-कारकाले मूलायोड़विद्यालयस्य परमोत्कर्षः समपादि। एते स्वयं महामहोपाध्याय राखालदासन्यायरत्नानाम् अन्तेवासिनः सम-वर्त्तन्त। चारित्रमपि निदर्शनमासीदेषां महताम्। न्यायशास्त्रा-ध्यापनायां तथा समुत्कर्षः सुतरामेव दुर्लभतां धत्ते। न्यायशास्त्रीय-विचारादिशैली च तेषामसाधारणीति वहुत्रैव सुप्रकाशम्। दैव-विश्वासादिरपि समीचीनस्तेषामुपदिशति स्म परेषु महिमानम्। अद्य वहवस्तदीयाश्छात्रा अपि पाण्डित्येन सुप्रथिताः महामहो-पाध्यायोपाधिपदभाजो विशेषेण तद्गौरवमभितः प्रकाशयन्ते। किं बहुना तेषामभावतो भारतवर्षमिदं सुदीनमिवाभाति। कदा पुनस्तादृशां महात्मनां सम्भवः स्यादिति समासः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

কেশরাশিকে কুঞ্চিত ও কোমল করিবার জন্যই

কে-শ-র-ঞ্জ-ন-তৈ-ল

এই আসমুদ্র ভারতের সর্ব্বত্রই কেশরঞ্জনের শতমুখে সুখ্যাতি। নিত্য স্নানকালে কেশরঞ্জন মাথায় মাখিলে সমস্ত দিনটী চিত্ত প্রফুল্ল থাকে; কেশরঞ্জন নিত্য মাথায় মাখিলে মাথা ধরা মাথা ঘোরা, অনিদ্রা, মন হু হু করা প্রভৃতি উপসর্গ বিদূরিত হয়। দেশের রাজা মহারাজা হইতে সামান্য গৃহস্থ-গৃহেও কেশরঞ্জনের সমাদর। আপনিও ব্যবহার করুন। মূল্য প্রতিশিশি একটাকা, ডাকব্যয় সাত আনা।

স্নায়বিক দুর্ব্বলতার আশু প্রতিকারক

সঞ্জীবন রসায়ন

বলবৰ্দ্ধক, মেধাবৰ্দ্ধক ও স্মৃতিবৰ্দ্ধক মহৌষধ

স্নায়বিক দুর্ব্বলতার জন্য যাঁহাদের উদ্যম, উৎসাহ-স্ফূর্ত্তি ও স্মৃতিশক্তি বিনষ্ট হইয়াছে' অজীর্ণ অগ্নিমান্দ্য প্রভৃতি গ্লানিকর উপদ্রব উপস্থিত হইয়াছে, তাঁহাদের পক্ষে "সঞ্জীবন রসায়ন" অমৃতের ন্যায় উপকারী। বিশেষতঃ ইহা দ্বারা বমন, উদ্গার, হিক্কা, আধ্মান (পেট ফাঁপা) ও পেট ভুটভাট করা প্রভৃতি পেটগরমের উপদ্রবসমূহ অচিরে নিবারিত হইয়া থাকে। এক কথায় বলিতে হইলে, অজীর্ণ, অগ্নিমান্দ্য, ও স্নায়বিক দুর্ব্বলতা নিবারণ জন্য এবং ছাত্রগণের মেধাবৃদ্ধি করিতে "সঞ্জীবন রসায়নের" ন্যায় অব্যর্থ ঔষধ অতি বিরল। এক শিশির মূল্য ১৲ টাকা। মাশুলাদি ৵০ আনা।

পরিবর্ত্তিত **সচিত্র কবিরাজি শিক্ষা** পরিবর্দ্ধিত

শ্রীযুক্ত নগেন্দ্রনাথ সেনগুপ্ত প্রণীত।

সমগ্র আয়ুর্ব্বেদ শাস্ত্রের সার সঙ্কলন। বড় বড় আটটী খণ্ডে সমগ্র পুস্তক বিভক্ত অতি সরল ভাষায় লিখিত হওয়ায়, কেবল চিকিৎসকের নয়—সাধারণ গৃহস্থের পক্ষেও ইহা একখানি নিত্য ব্যবহার্য্য গ্রন্থ। নাড়ীপরীক্ষা হইতে আরম্ভ করিয়া সমস্ত রোগের নিদান, চিকিৎসা-প্রণালী, আয়ুর্ব্বেদীয় ঔষধ, তৈল ও ঘৃতাদি-প্রস্তুত-বিধি, বিষচিকিৎসা, দীর্ঘজীবন-লাভের উপায়স্বরূপ স্বাস্থ্যকারক স্থানসমূহের পূর্ণবিবরণ, রোগীর পরিচর্য্যা এবং দ্বিতীয়খণ্ডে মহর্ষিদের গৌরবস্বরূপ—"সুশ্রুত-সংহিতা" এই সংস্করণে সন্নিবেশিত হইয়াছে। মূল্য ২॥০ টাকা। ডাকমাশুল ও প্যাকিং ৷৷০ বার আনা।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

কবিরাজ নগেন্দ্রনাথ সেন এণ্ড কোং লিমিটেড

Digitized by Arya Samaj Foundation Chennai and eGangotri

The Sanskrit Sahitya Parishad

A JOURNAL PUBLISHED IN SANSKRIT

DEVOTED TO THE STUDY

OF

History, Literature & Philosophy

OF

Ancient India

Annual subscription........ Rs. 3. Foreign......7s.

As the most popular and widely read Sanskrit Monthly this is the best medium for advertisement. Advertisements are published in all languages.

Monthly Rate of Advertisement :—

	Full page	Half page
For one year	Rs. 6	Rs. 3
For one issue	,, 8	,, 4

For further particulars apply to the Manager,

SANSKRIT SAHITYA PARISHAD,
Shambazar, Calcutta

प्रकाशको मुद्रापकश्च—श्रीदुर्गामोहनकाव्यसांख्यपुराणतीर्थ एम्. ए.
संस्कृतसाहित्यपरिषत्, श्यामबाजार, कलिकाता।
मुद्रापणस्थानम्—सिद्धेश्वरप्रेस, २८ नन्दकुमारचौधुरीसेकेण्डलेन,
कलिकाता।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

१८४७ शकीये
फाल्गुने
March, 1926

Reg. No. C. 1073.

…म वर्षस्य
११श संख्या
Vol. VIII. No. 11

संस्कृतसाहित्यपरिषत्

संस्कृतसाहित्यपरिषदो मासिकं मुखपत्रम्

भारते मातृभारती

भारत मातृ भारती

सम्पादकः—श्रीकालीपदतर्काचार्य्यः

सहसम्पादकः—श्रीदुर्गामोहनभट्टाचार्य्य एम्. ए.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

কে-শ-র-ঞ্জ-ন-তৈ-ল

এই আসমুদ্র ভারতের সর্ব্বত্রই কেশরঞ্জনের শতমুখে সুখ্যাতি। নিত্য স্নানকালে কেশরঞ্জন মাথায় মাখিলে সমস্ত দিনটী চিত্ত প্রফুল্ল থাকে; কেশরঞ্জন নিত্য মাথায় মাখিলে মাথা ধরা মাথা ঘোরা, অনিদ্রা, মন হু হু করা প্রভৃতি উপসর্গ বিদূরিত হয়। দেশের রাজা মহারাজা হইতে সামান্য গৃহস্থ-গৃহেও কেশরঞ্জনের সমাদর। আপনিও ব্যবহার করুন। মূল্য প্রতিশিশি একটাকা, ডাকব্যয় সাত আনা।

স্নায়বিক দুর্ব্বলতার আশু প্রতিকারক

সঞ্জীবন রসায়ন

বলবর্দ্ধক, মেধাবর্দ্ধক ও স্মৃতিবর্দ্ধক মহৌষধ

স্নায়বিক দুর্ব্বলতার জন্য যাঁহাদের উদ্যম, উৎসাহ-স্ফূর্ত্তি ও স্মৃতিশক্তি বিনষ্ট হইয়াছে' অজীর্ণ অগ্নিমান্দ্য প্রভৃতি গ্লানিকর উপদ্রব উপস্থিত হইয়াছে, তাঁহাদের পক্ষে "সঞ্জীবন রসায়ন" অমৃতের ন্যায় উপকারী। বিশেষতঃ ইহা দ্বারা বমন, উদ্গার, হিক্কা, আধ্মান (পেট ফাঁপা) ও পেট ভুটভাট করা প্রভৃতি পেটগরমের উপদ্রবসমূহ অচিরে নিবারিত হইয়া থাকে। এক কথায় বলিতে হইলে, অজীর্ণ, অগ্নিমান্দ্য, ও স্নায়বিক দুর্ব্বলতা নিবারণ জন্য এবং ছাত্রগণের মেধাবৃদ্ধি করিতে "সঞ্জীবন রসায়নের" ন্যায় অব্যর্থ ঔষধ অতি বিরল। এক শিশির মূল্য ১৲ টাকা। মাশুলাদি ৶০ আনা।

পরিবর্ত্তিত **সচিত্র কবিরাজি শিক্ষা** পরিবর্দ্ধিত

শ্রীযুক্ত নগেন্দ্রনাথ সেনগুপ্ত প্রণীত।

সমগ্র আয়ুর্ব্বেদ শাস্ত্রের সার সঙ্কলন। বড় বড় আটটী খণ্ডে সমগ্র পুস্তক বিভক্ত অতি সরল ভাষায় লিখিত হওয়ায়, কেবল চিকিৎসকের নয়—সাধারণ গৃহস্থের পক্ষেও ইহা একখানি নিত্য ব্যবহার্য্য গ্রন্থ। নাড়ীপরীক্ষা হইতে আরম্ভ করিয়া সমস্ত রোগের নিদান, চিকিৎসা-প্রণালী, আয়ুর্ব্বেদীয় ঔষধ, তৈল ও ঘৃতাদি প্রস্তুত-বিধি, বিষচিকিৎসা, দীর্ঘজীবন-লাভের উপায়স্বরূপ স্বাস্থ্যকারক স্থানসমূহের পূর্ণবিবরণ, রোগীর পরিচর্য্যা এবং দ্বিতীয়খণ্ডে মহর্ষিদের গৌরবস্বরূপ—"সুশ্রুত-সংহিতা" এই সংস্করণে সন্নিবেশিত হইয়াছে। মূল্য ২॥০ টাকা। ডাকমাশুল ও প্যাকিং ৸০ বার আনা।

কবিরাজ নগেন্দ্রনাথ সেন এণ্ড কোং লিমিটেড,

লোয়ার চিৎপুর রোড কলিকাতা।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृतसाहित्यपरिषद्ग्रन्थमाला

	मूल्यम् साधारणानाम्	सदस्यानाम्
कालीतन्त्रम्—सटीकानुवादम्	॥৵০	॥०
शङ्करीसङ्गीतम्—	।৵०	।०
मुक्तिवादः—गदाधरभट्टाचार्य्यविरचितः सटीकाद्वय-भाषानुवादसहितः	२)	१॥०
दुर्गोत्सवतत्त्वम्—रघुनन्दनभट्टाचार्य्यकृतम् शारदीयदुर्गोत्सवप्रमाणप्रयोगतत्त्वरूपम्	२৲	১॥०
पितृदयिता—अनिरुद्धभट्टकृता सामवेदीय-सन्ध्याश्राद्धादिपद्धतिरूपा	१।०	१)
दुर्गोत्सवनिबन्धकदम्बम्—दुर्गोत्सवविवेकादिग्रन्थ-पञ्चकात्मकम्	॥०	।৴०
कारकोल्लासः—भरतमल्लिककृतः सोदा-हरणकारकनिर्णयरूपः	৵०	৵०
ऋग्वेदभाष्योपक्रमणिका—सायणकृता आङ्गलभाषाटिप्पणसमेता	॥।०	॥৵०
ग्रहयागतत्त्वम्—रघुनन्दनभट्टाचार्य्यकृतम्	।৴०	৷০

मुद्राप्यमाणग्रन्थाः—

१। प्रशस्तपादभाष्यम्—जगदीशसूक्तिसहितम्, सूक्तिदीपिकया भाषाभाष्येण च समलङ्कृतम्।

२। प्रभाकरविजयः—नन्दीश्वरविरचितः प्रभाकरसम्प्रदायानुसारिमीमांसाग्रन्थः।

मुद्रापणार्थं गृहीता ग्रन्थाः—

१। यात्रातत्त्वम्—रघुनन्दनभट्टाचार्य्यविरचितम्।

२। तीर्थतत्त्वम्—रघुनन्दनभट्टाचार्य्यविरचितम्।

३। छान्दोग्यमन्त्रभाष्यम्—गुणविष्णुकृतम्।

४। आनन्दलतिका—सपत्नीक-कृष्णनाथविरचितं काव्यम्।

५। पवनदूतम्—धोयीकविकृतम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Calcutta Oriental Series

1. युक्तिकल्पतरुः—भोजराजप्रणीतः। अत्र राजनीतिः, नगरादिनिर्म्माणरूपा वास्तुविद्या, छत्रचामरलङ्कारादिनानाविधोपकरणलक्षणम्, रत्नपरीक्षा, अस्त्रयुक्तिः, गवाश्वगजादिपशुपरीक्षा, नावादिविविधयानलक्षणम् इत्येवमादयो विषया निर्णीताः Rs. 2-8

2. चाणक्यराजनीतिशास्त्रम्—(pp. xxxi+82) with a Foreword by Johan van Manen, Secretary, Asiatic Society of Bengal 0-14-0

4. **Inter-state Relations in Ancient India**, Part I by Dr. Narendra Nath Law, M. A., B. L., P. R. S., Ph. D. Rs. 2

5. मुक्ताफलम्—वोपदेवकृतम्, हेमाद्रिकृतटीकया समलङ्कृतम्, खण्डद्वयात्मकम्। अपूर्व्वोऽयं वैष्णवग्रन्थः। (With a Foreward by Dr. N. Law, M. A., Ph. D. (pp. xlvii+361) Rs. 6

6. चाणक्यकथा - रविनर्त्तकप्रणीता वङ्गानुवादसहिता Re. 1

9. वक्रोक्तिजीवितम्—राजानककुन्तलविरचितम् ग्रन्थकृत्प्रणीतटीकासहितमलङ्कारशास्त्रम् (Edited with Critical Notes Introduction by S. K. De, M. A., D. Lit.) Rs. 2

13. **Economic Life and Progress in Ancient India** by Narayan Chandra Banerjee, M. A., Lecturer, Calcutta University. (Demy 8 vo. 325+xvi pp.) Rs. 6

14. **Early History of the Spread of Buddhism and the Buddhist Schools** by Dr. Nalinaksha Dutt, M. A., B. L., P. R. S., Ph. D., Lecturer, Calcutta University. (Demy 8 vo. 314+xi pp.) Rs. 7-8

15. ব্রহ্মসূত্রম—'ভাগবতভাষ্য-সহিতম— শ্রীহরিদাসবিদ্যাবাগীশ-ভাগবতাচার্য্যসঙ্কলিতম্। প্রত্যেকটি সূত্রের সহিত শ্রীমদ্ভাগবতের শ্লোক উদ্ধৃত করিয়া দেখান হইয়াছে যে শ্রীমদ্ভাগবত ব্রহ্মসূত্রের ভাষ্য (277 pp.) Rs. 2-8

13. **Foundation of Indian Poetry** (being a survey of the origin and development of theories of Indian Poetics from the earliest period) by Dr. J. Nobel of Berlin (188 pp.) Rs. 5

17. **Padma Purana** by Prof. H. Sarma M. A. It shows that Kalidasa has drawn materials for his a Sakuntala and Raghuvamsa from the portion of the Padmapurana edited here. (Demy 8vo. lii+100 pp.) Rs. 2

18. **Studies in Indian History and Culture** by Dr. Narendra Nath Law M. A., B. L., Ph. D. (Demy 8vo. 430 pp.) Rs. 8

THE INDIAN HISTORICAL QUARTERLY
(A HIGH CLASS ORIENTAL JOURNAL)

Each issue 200 pp. Super-Royal Octavo. Edited by Dr. Narendra Nath Law, M. A., B. L., P. R. S., Ph. D. containing contributions from the foremost oriental scholars of India, England, France, Germany.

Annual Subscription Rs. 6 (exclusive of postage 0—12—0)

The Calcutta Oriental Press, 107, Mechuabazar Street, Calcutta.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृतसाहित्यपरिषत्

इयं संस्कृतसाहित्यपरिषत् प्रतिभा रवेः।
भावालोकैर्मनःपद्मं प्रकाशयतु धीमताम् ॥

१८४७ शकीये फाल्गुने ८म-वर्षस्य ११श-संख्या

मतिमञ्जरी

अ-भा-संस्कृतसाहित्यमहासम्मेलनम्—पाठकमहाभागाः! ऐषमः संस्कृतसाहित्यपरिषदा वङ्गप्रतिनिधिभूतया समाहूतम् अखिलभारतवर्षीयसंस्कृतसाहित्यमहासम्मेलनं निखिलसंस्कृतविद्याधिष्ठाने कलिकातामहानगरे दशमशुभाधिवेशनेन पदं करिष्यतीति श्रूयते, तदर्थं कापि स्वागतकारिसमितिः सुसन्नद्धा वर्त्तते, यत्र वङ्गालङ्कारभूताः पण्डितमहत्तमा भट्टपल्लीयश्रीयुक्तपञ्चाननतर्करत्नपादाः सभापतयः, कलिकातास्थराजकीयसंस्कृतमहाविद्यालयाध्यक्षाः श्रीमन्त आदित्यनाथमुखोपाध्यायाः कलिकाताविश्वविद्यालयाध्यापकाः श्रीमन्तः अनन्तकृष्णशास्त्रिवेदान्तविशारदाश्च मन्त्रिणः, परे च उपसभापतय उपसम्पादकाः कोषाध्यक्षाः साधारणसभ्याश्च समजायन्त। विविधसामयिकपत्रिकासु साम्प्रतमेव तद्वृत्तं प्रकाशितमुपलभ्यते। कार्य्यकारकाश्च सुयोग्याः सम्मेलनकृत्योपयोगिव्यापारेषु प्रतिस्वं प्रयतन्ते। सम्मेलनमूलसभापतिनिर्व्वाचनन्तु अद्यापि न जातं, सम्मेलनकार्य्यकारिसमितिसदस्यानां मत-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सुपादाय इतःपरं तन्निर्व्वाचनं करिष्यते। सम्मेलनाधिवेशननिर्व्वाहोपयोगिद्रव्याणि संग्रहीतुं स्वागतकारिसमितिरनुरूपप्रयत्नपरा सन्दृश्यते, समुपलभ्यते च प्रारम्भ एव तत्र तत्र साफल्यसूचनमन्यादृशम्। वङ्गेषु अद्यापि वर्त्तते संस्कृतशास्त्रेषु तथा गरिमविज्ञानं लोकानां येन नेदमायासविशेषमुत्पादयिष्यति प्रयत्नपराणाम्। एवं क्षितिष्वपि साफल्यहेतुषु अतीतवृत्तमनुस्मरतामस्माकं परिकम्पते हृदयम्। शान्तं पापं प्रतिहतममङ्गलं भूयादभिमतदेवताप्रसादात्।

अथेदानीं सम्मेलनकृत्यमधिकृत्य किञ्चिदिव ब्रूमहे—अखिलभारतवर्षीयसंस्कृतसाहित्यमहासम्मेलनमिदं गौरवस्थानं सर्व्वस्यास्य भारतवर्षस्य। अत्र सम्मिलितानां सकलप्रदेशीयसंस्कृतज्ञपण्डितानां किमपि देयमादेयञ्च वरीवर्त्ति। न केवलमितरसभाधिवेशनमिव अस्याधिवेशनं सफलमुपलक्षयामहे। अत्र सुयुक्तिसहानि शास्त्रीयतत्त्वानि समुद्घाटितानि भवेयुः, यैरुपस्थापितैरद्यतनानां नवीनविज्ञानसमुन्मेषः शास्त्रेषु पदमादध्यात्।

विषयविशेषाणां भेदमुरीकृत्य सभाधिवेशनविभागः कर्त्तव्यः, नह्येकत्र सर्व्वेषां समन्वयेन केवलमनर्थककोलाहलैः बहिरेव सभासार्थक्यमापादनीयम्। तथा कृते न्यायमीमांसास्मृतिवेदान्तादिविषयाणां केषामपि प्रत्येकमनुरागाद्यभावेन निबन्धादीनामानर्थक्यं नोपतिष्ठेत, परन्तु नैयायिकैः पण्डितैः सम्भूय नैयायिकनिबन्धानां मीमांसापारदर्शिभिर्मीमांसिकनिबन्धानाम् अन्यैश्च तत्तज्ज्ञैस्तत्तद्विषयनिबन्धानामाकर्णनेन परिशीलनेन समालोचनेन च तत्तद्गुणदोषाः तत्त्वतः प्रकाशेरन्। अतो विषयविशेषान् विभज्य खण्डसभाव्यवस्था प्रवर्त्तकैः प्रवर्त्तनीया। तत्र तत्र च शास्त्रीयावान्तरविषयानाश्रित्य प्रतिभाप्रसूतवादप्रतिवादैः तत्त्वनिर्द्धारणादिप्रयत्नः प्रवर्त्तयितव्यः।

नानाप्रदेशेभ्यः बहुभिः प्रयत्नैरपि शास्त्रविशेषज्ञाः समामन्त्रणीयाः, न केवलं कौशलेनात्मप्रतिष्ठामभितः प्रवर्त्तयन्तो मानवन्तः स्वल्पज्ञाः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तेषामेव सविवेकमेकैकशो विभिन्नसभासु आध्यक्ष्यमुपपादनीयम्। सत्यपि कर्म्मव्यापृतानामभिप्राये निबन्धार्थं पुरस्कृतिविशेषणमननुकूलमुपलभामहे। दृष्टं हि बहुशः पूर्वं पुरस्कृतिविशेषणमुपलभ्य पराभवशङ्कितया महान्तोपि निबन्धारः सुनिबन्धनिष्पादने न प्रयतन्त इति। एवं हि सम्मेलनेन तथा प्रकृष्टनिबन्धो नासाद्येत। परं प्राप्तानामुत्तमनिबन्धानां यथावसरं प्रचारविशेषणमेवास्माकमनुमतम्।

देशान्तरेभ्यः समापतितानां सुसत्कारप्रबन्धस्तथा स्वागतकारिसमित्या कर्त्तव्यः यथा वङ्गीयानामातिथेयताजनश्रुतिः केवलं श्रुतिस्थिता न प्रतीयेत।

सामयिकसन्देशपत्रद्वारा सत्यपि बहुलप्रचारे वैयक्तिकतया मन्त्रिभिः पत्रप्रेषणद्वारा शास्त्रनिष्णाता विज्ञापनीयाः, यथा तेषां सविशेषमत्र दृष्टिराकृष्टा स्यात्। वैयक्तिकविरोधपरिहारेण तेषां तेषां सुविश्रुतसंस्कृतविद्यापीठादीनां सहायतासम्पादनाय मन्त्रिभिरितस्ततः प्रयत्नशतमास्थेयम्। स्वीयख्यातिमात्रमनपत्रपं प्राप्तुकामानामपि तदिदमानुषङ्गिकं मत्वा कर्म्मसु प्रवर्त्तितव्यम्, यथा नाम तदीयपितृपितामहाद्यधिष्ठानस्य भारतवर्षस्य गौरवं देशान्तरीणैश्च स्वदेशवासिभिश्च अद्यापि निरवसादं सुबोधं स्यात्। व्याख्याने वा शास्त्रार्थे वा पुराणशास्त्रादितत्त्वव्याख्यानकृत्ये वा साहित्यचर्च्चायां वा भारतस्य किमपरन्यादृशं नैपुण्यं लोकेषु प्रतिपादयितव्यम्। अभिनयकलायां प्राचीनकालेऽपि भारतस्य कथं समृद्धिरासीदित्यपि प्राचीननाट्यप्रयोगेण प्रकाशयितव्यम्; अधुनापि प्राचीनरीत्या नाट्यनिर्म्माणादिकौशलमस्तीत्यपि साम्प्रतिकनाट्याभिनयेन बोधयितव्यम्। सर्व्वप्रदेशीयपण्डितानां सभाकालादर्वाक् परस्परं परिचयव्यवस्था कर्त्तव्या। इत्येतत् सर्व्वं सुविविक्तं सम्पादयितुं शक्यञ्चेत् सम्मेलनं सफलतां यायात्, अन्यथा तु प्रबन्धकारिणां परिश्रमस्य द्रव्य-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विनियोगस्येत्युभयमकाण्डे प्रयुक्तं फलपरिशून्यमनुशोच्यतामिव दधीत।

अन्ते तावदस्माभिः सम्मेलनमूलसभापतिविषये किञ्चिदुक्त्वा विरम्यते। यत्र प्रान्ते सम्मेलनाधिवेशनं यस्मिन् संवत्सरे सम्पद्यते तदा तदधिवेशने तत्प्रान्तीयः सभापतिः न स्यादिति स्थिते देशान्तरादेवं सभापतिः निर्द्दिष्टव्यः यस्य शास्त्रविशेषे प्रौढ़ं पाण्डित्यं साधारणशास्त्रीयविषयेषु च बहुषु अभिनिवेशः। अन्यथा सम्मेलने व्यवहर्त्तव्यानां नानाविषयाणां विज्ञानविरहे सर्वाध्यक्ष्यं तत्र नोपयुज्येत। नियमस्तावदयं सभाया यत् सर्व्वत्रैव विषये सभ्यैः सभापतिः प्रमाणीकर्त्तव्य इति। अतस्तत्तद्विषयविज्ञानराहित्ये कथमेवायं प्रमाणभूतस्तत्र तत्र सम्भवेत्। सभापतीनामभिभाषणनिबन्धे च तथास्माभिः निगूढ़तत्त्वमभिकाम्यते, यद्धि साधारणेषु दुर्लभतां धत्ते, अन्यथा को वा साधारणसभादौ आध्यक्ष्यमध्यासीनो वाक्प्रपञ्चं नोपादत्ते, किमस्माकं तत्र गौरवबुद्धिस्तथा प्रसृता भवति? अपि च सभानियन्त्रणशक्तिरपि तेषामावश्यकी यया प्रवृत्ते परस्परं कोलाहलादौ सद्विषयानुरागिणीं मतिमास्थाय कोलाहलप्रशमनं तैः सुशक्यं भवेत्, गौरवबुद्धया च तेषु स्वत एव लोकानाम् आस्रवभावः समुदियात्।

तदेवं स्वागतकारिसमितिरस्माभिरर्थ्यते यथा सम्मेलनमिदं सर्व्वथा सफलं विधातुं प्राणैः पणैः सुविविच्य कृत्यं क्रियताम्, अतीतवैफल्यं यथा लोकानां स्मृतिपथे पान्थायमानमतःपरमपि न तत्र पान्थायेत तथैव प्रतिपदमापन्मुक्तिकामनया दैवञ्च पुरुषकारस्येत्युभयमवलम्ब्यतामिति शतं पल्लवितेन।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भारतवधूविषादः

लेखकः—मो. वि. सुब्रह्मण्यार्य्यः

हन्तेदानीं गहनजड़िमाऽऽक्रामतीवाऽन्तरं मे
मेधा तीक्ष्णाऽप्यहह ! विजहातीव मां मन्दभाग्याम् ।
आर्यावर्तान्मम चिरगृहादरनिष्कास्यमाना
कालेयोपप्लवगुरुतया मोहिताऽहं भ्रमामि ॥ १

आर्यावर्तः क्रिमयमुत नेत्यद्य शङ्के यमीशः
कारुण्याब्धिः प्रकृतिसुभगं शैलनद्यादिरम्यम् ।
प्रादान्मोदादविरतकृतश्रेयसां सत्फलं मे
निष्प्रत्यूहं बहुतिथमहं यत्र कालं व्यनैषम् ॥ २

नैवेयं स्याद् भरतवसुधा नाऽपि जम्बून्तरीपं
काव्येषु प्राङ्मधुरमधुरं यत्परं गीयते स्म ।
मर्त्यामर्त्यप्रभुभिरसकृत् संगतैर्यत्र मित्रैः
श्रेयःप्राप्त्यै सकलजगतां संविधानं व्यधायि ॥ ३

ईक्षे नूनं चिरपरिचितानम्बरस्पर्शिनोऽद्रीन्
हिमापीड़ान् विपिनवसनान् सिन्धुमालान् समृद्धान् ।
रत्नैर्धात्वौषधिमधुफलैर्भूरिसत्त्वैश्च धात्रा
शश्वापातादिव समवितुं भारतं स्थापितांस्तान् ॥ ४

सत्क्षेत्रेषु क्व नु बत गतास्साधवो ये दरीस्था
यद्वा तद्वा स्वयमुपनतं प्राश्य तृप्ताः प्रशान्ताः ।
ब्रह्मात्मैक्याधिगमविभवास्स्वात्रकान् स्वानशासुः
मार्गं धर्माचरणमनु तैः श्रेयसे सेवितव्यम् ॥ ५

प्रेक्षे सिन्धूर्वनजवदना दीर्घशैवालकेशीः
फेनस्मेरा मुकुलसकुचाः सुन्दरावर्तनाभीः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अब्धिं हंसामलसुवसनाः कामिनीवत् स्वनाथं
यान्तीर्वेगात् घनवनपटाच्छादिताश्चारुरूपाः ॥ ६
सन्ध्येवेताः—क्व नु मुनिजनोच्छोषिता वल्कला वा
वन्यद्रव्यावहृतरणयो वेदघोषास्तटे वा ।
घट्टे घट्टेऽपुरपजनपदं नित्यकर्मानुषक्ताः
स्नाता जपप्रासुकुलितदृशः श्रोत्रियाः क्वाऽद्य याताः ॥ ७
प्रेक्षे हा ! प्रत्युत जलतटे धीवरान् जालहस्तान्
निष्ठीवैर्वाऽमलमधुपयोदूषकान् ब्रह्मबन्धून् ।
पानाद्यर्हे पयसि महिषचालनासक्तगोपान्
जीर्णं चीरं मलिनममलं कुर्वतो धावकान् वा ॥ ८
प्रेक्षे नूनं घनवनभुवः श्रीयुता (१) नीरदाभाः
सूर्याचन्द्रौ चकितचकितं यत्र यातः श्रमेण ।
नानाशाखि(२)प्रथितविभवा मन्मथोत्पादिका याः
व्रातानन्ता(३)र्जुनखगशिवाः(४) श्रीप्रतीयन्ति साम्यम् ॥ ९
सन्ध्ये तास्तु,—क्व नु वनचराः केवलश्वापदघ्ना
वानप्रस्थाः क्व नु तदुटजाः क्वाऽऽज्यधूमस्तपः क्व ।
तत्कन्याभिः करधृततृणैर्वर्धिता वा मृगाः क्व
स्वेच्छारोहाः क्व नु वनभुवोऽकृष्टपच्या यवाः क्व ॥ १०
प्रेक्षे सम्प्रत्यहह ! मृगयाजीवनारण्यकान् वा
क्षुण्णान् टी(५)रोपणकृतिपरान् लावकान् वा द्रुमाणाम् ।
साशङ्कं वाऽपरहितजनतो धावतः कृष्णसारान्
प्रान्तेऽरण्येऽप्यतितुमुलदान् तैल(६)यानान् रथान् वा ॥ ११

---

(१) शोभा, लक्ष्मीश्च । (२) वृक्षा वेदाश्च । (३) वनपक्षे वृक्षविशेषाः । (४) वनपक्षे शृगालाः ।

(५) Tea plantations. (६) Petrol-driven motor cars.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रेक्षे ग्रामानुपवनवृतानुर्वरक्षेत्रमध्ये
स्वस्थान् दूरान्नगरतुमुलात् शैलमूले च नद्याः।
तीरे नीड़ान्तरविहगवत् सुस्थितान् सस्यवृद्ध्यै
सृष्टान् धर्मानुसरणहितान् प्रेक्षणीयान् प्रशान्तान् ॥ १२

इष्टापूर्तं क्व नु बत गते धर्म्यवृत्तिः क्व वा क्व
क्षेत्रेऽमोघं कृषिकयतनं शाद्वलं क्व क्व गावः।
वृद्धानां क्व प्रथितपरिषत्(७) क्वोद्यमा (८) वायमुख्याः
विद्याशाला क्व नु हितकलाबोधिनी क्व प्रशान्तिः ॥ १३

हा धिक्! प्रेक्षे विजननिलयान् गाश्च कङ्कालशेषाः
क्षेत्रं कृष्टं शिशु जरठकैः भ्रातरक्तांश्च यूनः।
न्यायस्थानव्ययितविभवान् ग्रामिणश्चाऽऽङ्गवाणी-
भूषावेषभ्रमितधिषणान् बालकान् किं करोमि ॥ १४

(अवशिष्यते)

अभिनवप्रत्नतत्त्वाविष्करणम्

आविष्कारकः—श्रीघगघूतिशर्म्मा *

अधुना वङ्गेषु प्रत्नतत्त्वविदामशेषसम्मानदर्शनात् तल्लिप्सुनानेन जनेन लोकचरित्रगिरिकन्दराण्यतिदुर्गमाण्यन्विष्य कतिचिद् धर्म-समाजादिविषयकाण्यभिनवतत्त्वानि (१) प्रागाविष्कृत्य 'विद्योदय'-नामके स्वाधिकारभुक्ते पत्रे प्रकाशितानि। सकृत्तदाविष्करणेन यद्यपास्य प्रत्नतत्त्वनैपुण्यं न तथा सर्व्वसमादरार्हं स्यादिति पुनस्तदा-

---

(7) Village Panchayats. (8) Weaving.

* आविष्कर्त्तुरीदृशप्राग्भावज्ञापनाय तथौष्ठ्यवर्णान् प्रति कृताविचारदोषचालनायात्र ईषद्दनव्यादानकृदूकारमात्ररक्षणम्।

(१) येषु पत्रेष्वेतानि तत्त्वान्यधिगतानि तेषु सर्व्वत्रैव कश्चिदेवनामाङ्कमवलोक्य मन्यते कश्चिच्छासनप्रारम्भ एवैतान्यनुशासनानि निबध्य तत्र तत्र स्थानेषु रचितानीति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विष्करणप्रयासिनानेन तेषु तेषु गिरिकन्दरेषु साम्प्रतं कृताभियानेन बहुधान्विष्य कतिचिदतिरिक्तानि तत्त्वान्याविष्कृतानि। किन्तु नूतनाप्रसिद्धात्मसम्पादकयुगलस्य बहुलौष्ठ्यवर्णाभिधेयस्य तत्परिचय-जिज्ञासुभ्यः साधारणेभ्योऽसकृद्विज्ञापनप्रसङ्गेन पुनः पुनरौष्ठ्यवर्णो-च्चारणप्रयत्नकृतवदनव्यादानव्यापारविकृतयन्त्रे वार्द्धक्यक्षीणवपुषि 'विद्योदये' सहसा भवलीलां विहाय नाकं गते, नवाविष्कृतानि तानि तत्त्वानि कुत्र वा प्रकाशयिष्यन्त इति चिन्तोद्वेलितहृदयो वङ्गेषु वर्त्तमानसंस्कृतमुखपत्रभूतायाः 'संस्कृतसाहित्यपरिषत्'पत्रिकाया गैर्वाण-विद्योत्साहित्वगुणकथाभिः कर्णमागत्य तत्सकाशप्रेषण चापलाय प्रणोदितोऽयं जनः। यद्यपि 'विद्योदय'दुष्परिणामकारिणो-रन्यतरस्यैतस्य तत्त्वाविष्कर्तुर्नामान्तर्भुक्तमौष्ठ्यवर्णप्राचुर्य्यं तारुण्या-च्छक्तिशालिन्यास्तस्याः न कामपि मर्म्मपीड़ां जनयिष्यति, तथापीरत-न्नामहेतुकविद्योदयविनाशदर्शनात्तस्या मनसि कोऽपि नामातङ्को भवेदित्याशङ्कयानेन स्वनामनिहिता औष्ठ्यवर्णाः कण्ठ्यवर्णैः परि-वर्त्त्यन्ते *। अत इदानीमेतेषामाविष्कृततत्त्वानामनुपादेयत्वमन्तरेण नान्यत् किमपि प्रकाशयोग्यत्वं विद्यत इति विचिन्त्य सानुनयं तत्र प्रार्थ्यते तत्रभवत्याः कृपाकटाक्षपातः।

१। समाजविषयकतत्त्वानि—

(क) निपुणो हि समाजसंस्कारकः समाजग्रहणव्यपदेशेन म्लेच्छ-संसर्गादिदोषदूषितसमाजभ्रष्टजनेभ्यो विपुलवित्तान्यादाय तेषामत्य-ल्पांशमात्रेणैवाशङ्कितविरोधानां सतीर्थानां वदनानि निरुध्याधिकांशं चात्मपोषणार्थं नियोज्य समाजसमक्षं ढक्कानिनादैरात्मन औदार्य्यनीतिं प्रचारयेत्।

* यद्येतदौष्ठ्यवर्णच्छेदनाविष्कर्त्तुं "छिन्नौष्ठ" परिचयो भवेत् तस्याप्येतत्तत्त्वप्रचारकर्म्मणि परमोपयोगित्वं वर्त्तेत इति कोपि न हृदयनिर्वेदः। अपि च स्वनामप्रसिद्धस्य कवेः "श्रीकण्ठा" भिधेयत्वाद् यदि कोऽपि कण्ठयुक्तोपाधिरेतद्दुर्लभाविष्करणपुरस्काररूपेणास्मै प्रदीयत इत्या-शयेव कण्ठ्यवर्णा योज्यन्ते।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(ख) शास्त्रतत्त्वज्ञो हि जनः कुत्रापि विषये किमपरात्मनः स्थिरमतमपोषयन् स्वल्पदक्षिणाग्रहणेनैव सर्वत्र स्वाभिमतं यच्छेत्। अत्र खलु मतचाञ्चल्यजनितं लोकगर्हणमुन्मत्तप्रलापवदुपेक्षणीयम्।

(ग) उदारनीतिविप्रो वित्तादिगर्वदृप्तेभ्यो नीचकुलसम्भूतेभ्यो जनेभ्यः परमचातुर्य्येण वर्णोत्कर्षमरीचिकां प्रदर्श्य तदनुकूलशास्त्रवचनैर्दुर्व्याख्यातैरपि वहिस्तेषां वर्णोन्नतिं सम्पाद्य सामाजिकाचरणादिषु तेषां पूर्वभावं संरक्षन् स्वौदार्य्यप्रकाशस्वरूपेण दुर्लभनागरवासजनकं प्रभूतं धनं तेभ्यो गृह्णीयात्।

(घ) समाजतत्त्वज्ञो हि जनो भोजनसंसर्गाद्याचारेषु शास्त्रोपदिष्टेषु तद्रक्षणमूलकं स्वकौलीन्यं सदैव विस्मृत्य प्रभूतपणार्जननिमित्ते परिणयकर्म्मण्येव तत्कौलीन्यरक्षणाय सर्वथा यतेत। उद्वाहे च शुल्कादानप्रदानपर्य्यन्तं तं कौलीन्यं सर्वथा संरक्ष्य तदनन्तरसम्पाद्ये अङ्गभूते भोजनविधौ तु जातिवर्णविशेषनिराकरणेन तत्कौलीन्यस्य "सपिण्डीकरणं" कुर्य्यात्।

(ङ) समाजसंसत्सु गगनविदारिणीभिर्वचनपरम्पराभिरस्पृश्यत्ववर्जनादिकं समुदारमतं करचरणसञ्चालमुद्घोष्य कार्य्यकाले तु स्थाणुरिव तिष्ठेत्।

२। धर्म्मविषयकतत्त्वानि—

(क) त्यागस्य धर्म्मत्वात् धर्म्मविषयत्यागे कथं धर्म्महानिः? तद् गृहीतम्लेच्छाचाराणां कृतम्लेच्छसंसर्गाणां परिवर्जितात्मधर्म्माचाराणां त्यक्तस्वधर्म्माणामपि जनानां न कथञ्चित् स्वधर्म्मभङ्गप्रसङ्गः। एवं च यदि कोऽपि धर्म्माचारभ्रष्टो जनः समाजे धर्म्मराज्याधिष्ठितो भवेत्, तत्र किमप्यसामञ्जस्यं न सम्भवति।

(ख) आचाररक्षणचिन्ताविरहितानां मुख्यीभूतेश्वरतत्त्वानां यवनादिधर्म्मविशेषाणां तत्तच्छास्त्रोक्ता वहिराचारा धर्म्मनियामका भवन्तु, तत्र न क्षतिः आचारमूलकस्य तु सनातनधर्म्मस्य आचारो

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नाम कोऽपि धर्म्मसङ्कोचहेतुर्न वर्त्तेत। तथात्वे धर्म्मस्य लघुत्वं स्यात्।

(ग) आलोकस्फुटनार्थं यथा तिमिरेण प्रयोजनं तथा धर्म्मरक्षणार्थमावश्यकोऽधर्म्मसञ्चयः। एवं सञ्चितेष्वधर्म्मेषु यदि धर्म्मोऽपि निमज्जेत् तदा न हानिः।

(घ) प्रतिमानवगतात्मनः परमात्मनो ह्यंशभूतत्वात् परमात्मतत्त्वनिर्देशको धर्म्मो न आत्मचिन्ताविहीनो भवेत्। अत एव कालवशादधःपतितस्य धर्म्मस्योत्कर्षार्थं यदि कोऽपि चेष्टेत, तत्रात्मनः कीदृगभ्यर्च्चनं भवेदित्यादि विचिन्तयेत्। अपि च यदि धर्म्मप्रतिष्ठापने आत्मप्रतिष्ठापनं न स्यात्, तदा धर्म्मप्रतिष्ठापनं मृषैव।

(ङ) ब्रह्मणाहूय धर्म्मराज्येऽभिषिक्तैः स्वामि * गुरुभिरात्मीयजातीयानपरगुरूनर्द्धचन्द्रं दत्त्वा निःसार्य्य विषयिसिंहासनासुपरि प्रभुत्वं स्थापनीयम्। अर्थवलाभावादुत्तमर्णादिभिस्तीक्ष्णदंष्ट्राग्रैर्दष्टा इतस्ततो धावन्तो ये केचन किञ्चिच्चातुर्य्यगुणोपेता रजोबहुले कुत्रचिद् धर्म्माधिष्ठाने प्रविष्टास्तत्रत्ये गैरिकरसपूर्णे महाभाण्डे पतिता गैरिकवर्णानुरञ्जितवसना एतां देवदुर्लभां स्वामिपदवीं प्राप्तुमर्हन्ति।

२। गार्हस्थ्यविषयकतत्त्वानि—

(क) लोकवशकरसत्कर्म्मकरणापेक्षया परेषां विशेषतः स्वप्रतिपक्षाणां वास्तवस्य कल्पितस्य वा दोषसमुच्चयस्य वदनशतेन परिकीर्त्तनं गृहस्थानां साधुत्वपरिचायकं भवति।

(ख) प्रात्मोन्नत्यै परप्रतारणं न दोषत्वेन गणनीयम्। तत्र विवेकभ्रूक्षेपस्तृणाय मन्तव्यः। तत्कृते यदि लोकविगर्हणं भवेत्, तत् केनापि धर्म्मव्यपदेशेन प्रशमनीयम्। तत्राप्यशक्तौ गुप्ताचरणविधिरवलम्बनीयः।

* "स्वामिजी" इति भाषा।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(ग) व्यापकत्वं हि प्राधान्यकारणं भवति। अतो ब्राह्मण-क्षत्रियवैश्यशूद्रधर्म्मव्यापको ब्राह्मणादिवर्णचतुष्टयस्य यः कोऽपि वर्णो भवेत्, स इतरेषां श्रेष्ठो भवति। तथाहि शूद्रो यदि शास्त्रज्ञो राजोपाधिको विपुलशस्यशाली समुच्चराजपदाधिष्ठितो भवति, स ब्राह्मणेऽपि प्रभवति। एवं ब्राह्मणादीनां प्रत्येकं स्वस्ववर्णे कर्म्मव्यापकत्वात् श्रेष्ठम् भवति। तथाहि यदि कोऽपि ब्राह्मणो यजनाद्यतिरिक्तानि गुरुत्व-* दासत्व-वाणिज्य-घटकत्व-दैवज्ञत्व-कुसीदजीवित्व-व्यवहारजीवित्वादीनि कर्म्माणि समाचरति, स केवलयजनादि-रताद् ब्राह्मणाच्छ्रेयान् भवति। एवमन्यत्र मन्तव्यम्।

(घ) आत्म-नामप्रतिष्ठायै पितृपुरुषाणां नामानि सर्वथा विस्मर्त्तव्यानि। यद्यपि कोऽपि पितृपुरुषनामरक्षणाय यतेत, आत्मनामरक्षणं तत्र परमलक्ष्यं भवेत्। एवं मातापितरौ प्रति वस्तुतः कदाचरणं विधाय सभासमक्षं गलदश्रुनयनं तयोर्महिमानं घोषयेत्, अथवा स्वविरचितेषु ग्रन्थेषु तावुद्दिश्य परमभक्तिसूचकमुत्सर्गपत्रं सन्निवेशयेत्। अपि च पितृविषयस्वत्वाधिकारे पितरौ बहुमानेन स्मर्त्तव्याः। पितृश्राद्धादिषु च पितृतृप्त्यर्थं न तथा यतेत, यथात्मतृप्त्यर्थम्।

(ङ) परकर्म्मणां सम्यग्विचारणमन्तरेण तत्र जुगुप्साव्यञ्जकं नासिकाकुञ्चनं गृहस्थानां परमविज्ञत्वप्रतिपादकं भवति। तथाहि ये यावदपरपाण्डित्ये नासिकां कुञ्चन्ति, ते तावद् विज्ञपण्डिता भवन्ति, ये यावदपररचनासु नासिकां कुञ्चन्ति, ते तावद् विज्ञसम्पादका भवन्ति। एवमन्यत्र।

(च) आत्मनोऽन्यत्वेन प्रतिभासनं गृहस्थानामपरविधं विज्ञत्वं भवति। तथाहि विज्ञो धनी अलीकदारिद्र्यं प्रदर्श्यात्मानं याचकादिभ्यो रक्षति, विज्ञो दरिद्रश्चालीकधनवत्त्वख्यापनेन नियतलोक-

* गुरुत्वपदेन दीक्षागुरुत्वं घटकत्वेन च विवाहघटकत्वं बोद्धव्यम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

निर्य्यातनादात्मानं रक्षति। अधार्म्मिकश्चात्मानं धार्म्मिकत्वेन विज्ञाप्य समाजे महाविघ्न इव परिचीयते।

(छ) आत्मनो विभववत्त्वेऽपि निर्धनस्यापि भ्रात्रादिज्ञातिप्रवरोः कृते पैतृककणांशमात्रापरिहारो गृहस्थानामपरविधं विज्ञत्वं सूचयति। यतस्तत्परिहारे दायाधिकारासामञ्जस्यहेतुको धर्म्मभ्रंशः स्यादपि च शक्तिहीनत्वमल्पाधिकारनिमित्तकं प्रकश्येत। एवं यदि कोऽपि तथाविधज्ञातिवैरिणाधिकृतस्य पैतृककणांशमात्रस्य कृते सर्वस्वपणो धर्म्माधिकरणं गच्छति स सामाजिकैर्विज्ञतमत्वेन परिगण्यते।

(ज) परिशोधरहितमृणं हि संसारविषवृक्षस्य मधुमयं फलम्। अतो विज्ञमात्रेणैव तद्ग्रहणाय यतनीयम्। एतत्फलाधिकारिणं गृहस्थं न कदापि लक्ष्मीर्मुञ्चति।

(झ) साधारणकार्य्येषु स्वयमौदासीन्यमवलम्ब्य तत्कर्म्मानुष्ठानदत्तजीवितानामपरेषां छिद्राण्यन्विष्यात्मनः कर्त्तृत्वपरिचयं दद्यात्।

एतद्व्यतिरिक्तानि कतिचिन्नीतिविषयकतत्त्वानि प्राप्तानि। अङ्गीकृतराजकर्म्मणाविष्कारकेण स्वाधिकारवहिर्भूतानि तान्यभिनवान्यपि पूर्ववत् हेलया परित्यक्तानि। इति

वार्त्ताचतुष्टये

भवभूतिपरिचयः

(पूर्व्वानुवृत्तः)

लेखकः—श्रीउपेन्द्रनाथसेनगुप्तकाव्यतीर्थः

भवतु साम्प्रतं वयं कथं भगवन्तं शङ्करं भवभूतेरर्वाचीनं न मन्यामहे, तदेव दर्शयामः। मालतीमाधवे भवभूतिः "पदवाक्यप्रमाणज्ञः", इति आत्मानं विशेषितवान्। चतुःसूत्रीसमनन्तरमेव ब्रह्मसूत्रस्य

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ईक्षत्यधिकरणस्य—"ईक्षतेर्नाशब्दम्" इतिसूत्रस्य भाष्योपोद्घाते भगवता शङ्कराचार्य्येण लिखितम्—

"तत्र पदवाक्यप्रमाणज्ञेनाचार्य्येण वेदान्तवाक्यानां ब्रह्मावगतिपरत्वदर्शनाय वाक्याभासयुक्त्याभासविप्रतिपत्तयः पूर्वपक्षीकृत्य निराक्रियन्ते।" वयन्तु मन्यामहे यत् भवभूतिः शङ्करप्रयुक्तं पदवाक्यप्रमाणज्ञशब्दं स्वकृतौ व्यवहृतवान्। उन्मत्तप्रलपितमिदं मत्वा मामुपहसिष्यन्ति, नासीत् किं महाकवेः तादृशमपि रचनापाटवं येन स तादृशवाक्यांशं स्वयमेव विरचयितुं शक्नोति स्म, अथवा शङ्कराचार्य्य एव भवभूतिव्यवहृतं वाक्यांशं स्वग्रन्थे न व्यवहृतवान् अत्रापि किं प्रमाणमस्ति इति। सत्यं महाकवे रचनापाटवस्य अनेन लघुत्वं नापाद्यते, न चापि शङ्करे भवभूतिग्रन्थात् शब्दसङ्कलनं किमपि आश्चर्य्यम्। परमत्र सर्वमन्यथैव। असकृदधीतशास्त्राणामध्येतृषु कदाचित् दुर्णिवारः प्रभावः परिलक्ष्यते, येन महान्तोऽपि, स्वयमसामान्यरचणाचतुरा अपि अधीतग्रन्थानामंशविशेषान् स्वकृतौ समुल्लिखन्ति, अभ्यास एवात्र बलवान्। अभ्यासपारवश्येन भवभूतिरपि स्वकृतौ परकृतवाक्यांशान् अन्तरान्तरा निवेशयामास। अधस्तात् तस्य प्रमाणमुपस्थाप्यते।

महाकविकालिदासेन एकस्मिन् स्थाने सकृत् परकृतवाक्यं अपरिवर्त्त्य उद्धृतं यथा विक्रमोर्वश्यां राज्ञो मुखेन, राजा—"कालस्य कारणमिति" महाभारतीयशान्तिपर्वस्थितं वाक्यम्। भवभूतिरपि वात्स्यायनकृतकामसूत्रस्य कन्यासाम्प्रयोगिकाध्यायात् सकृत् कानिचिद्वाक्यानि समुद्धृतवान् यथा—"कुसुमधर्म्माणो हि योषितः सुकुमारोपक्रमाः। तास्वनधिगतविश्वासैः प्रसभमुपक्रममाणाः सम्प्रयोग'विद्वेषिण्यो भवन्ति।' एवं किल कामसूत्रकारा मन्यन्ते" इति मालतीमाधवे सप्तमाङ्के बुद्धरक्षितामुखेन। परं बहुत्र भवभूतिना परकृतवाक्यानि पदानि वा—अपरिवर्त्त्य ईषत्परिवर्त्त्य वा प्रयु-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

क्तानि, तानि तु केवलं निपुणैरेवोन्नेयानि। तेषां केषाञ्चिद् वाक्यानां पदानाञ्चात्र उदाहरणं दीयते।

१। "साक्षात्कृतधर्म्माणो महर्षयः तेषाममृतसाराणि भगवतां परोरजांसि प्रज्ञानानि न क्वचित् व्याहन्यन्ते।" (उत्तरचरिते सप्तमाङ्के।)	१। "साक्षात्कृतधर्म्माण ऋषयो बभूवुः।" (निरुक्ते १।२०।२) "आप्तः खलु साक्षात्कृतधर्म्मा यथा दृष्टस्यार्थस्य चिख्यापयिषया प्रयोक्ता उपदेष्टा।" (न्यायदर्शनस्य आप्तोपदेशः शब्दः इति प्रथमाध्यायगतप्रथमाह्निकस्य सप्तसूत्रस्य वात्स्यायनभाष्ये।)
२। "नहि असाम्प्रदायिकानि अस्त्राणीति पूर्वेषामपि अनुशुश्रुम। (उत्तरचरिते षष्ठाङ्के।)	२। "इति शुश्रुम पूर्वेषां येनस्तद् व्याचचक्षिरे।" (केनोपनिषदि १।३)
३। अङ्गादङ्गात् सुत इव निजो देहजः स्नेहसारः। (उत्तरचरिते षष्ठाङ्के।)	३। अङ्गादङ्गात् सम्भवसि हृदयादधिजायसे। आत्मा वै पुत्रनामासि त्वं जीव शरदां शतम्॥ (वेदमन्त्रः)
४। पुण्ये मतङ्गयज्ञाग्नौ सख्यं निर्वृत्तमावयोः। ममैव हृदयं तेऽस्तु- तवैव हृदयञ्च मे। (महावीरचरिते पञ्चमाङ्के।)	४। ॐ यदेतद्धृदयं तव तदस्तु हृदयं मम। यदिदं हृदयं मम तदस्तु हृदयं तव॥ (वेदमन्त्रः)
५। अन्धतामिस्रा ह्यसूर्य्या नाम ते लोकाः तेभ्यः प्रतिविधीयन्ते, ये आत्मघातिन इत्येवम्	५। असूर्य्या नाम ते लोकाः अन्धेन तमसावृताः। तांस्ते प्रेत्याभिगच्छन्ति

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ऋषयो मन्यन्ते। (उत्तरचरिते चतुर्थाङ्के।)

ये के चात्महनो जनाः॥ (वाजसनेयसंहितोपनिषत्)

६। अपूर्वपापखण्ड! काण्डीर! काण्डपृष्ठ! कथमस्यामपि दिशि प्रगल्भसे? (वीरचरिते तृतीयाङ्के)

६। काण्डपृष्ठाः श्रोत्रियाश्च निष्क्रियामि हवींष्यथ। एकपङ्क्त्यामशिष्यन्ति युगान्ते जनमेजय॥ (हरिवंशभविष्यपर्वणि २।७)

७। प्रचिनु चित्तप्रसादनोयतस्तो मैत्र्यादिभावनाः। प्रसीदतु ते विशोका ज्योतिष्मती नाम चित्तवृत्तिः। तत्प्रसादजं ऋतम्भराभिधानम्……इत्यादि। (वीरचरिते तृतीयाङ्के)

७। मैत्रीकरुणामुदितोपेक्षाणां सुखदुःखपुण्यापुण्यविषयाणां भावनातः चित्तप्रसादनम्। (पातञ्जलदर्शने स,प, ३४)। विशोका वा ज्योतिष्मती (तत्र स,पा,३७)। ऋतम्भरा तत्र प्रज्ञा (तत्र स, पा' ४८)

क्वचित्तु भवभूतिना परकृतवाक्यं किञ्चित् परिवर्त्य गृहीतम्। तद्यथा।

१। गुणाः पूजास्थानं गुणिषु नच लिङ्गं न च वयः। (उत्तर ४)

१। पदं हि सर्वत्र गुणैर्निधीयते। (रघुवंश ३)

२। कलाशेषा मूर्त्तिः शशिन इव नेत्रोत्सवकरो। (मालती २)

२। पर्य्यायपीतस्य सुरैर्हिमांशोः कलाक्षयः श्लाघ्यतरो हि वृद्धेः॥ (रघवंश ५)

३। कटाक्षैर्नारीणां कुवलयितवातायनमिव। (मालती २)

३। कुवलयितगवाक्षं लोचनैरङ्गनानाम् (रघु ११)

४। तस्याः सखे नियतमिन्दुसुधा-मृणाल-ज्योत्स्नादि कारणमभून्मदनश्च वेधाः। (मालती १)

४। अस्याः सर्गविधौ प्रजापतिरभूत् इत्यादि। (विक्रमोर्वशी)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

५। शरीरनिर्म्माणसदृशः ननु अस्य अनुभावः। (वीर १)

६। दुःखसंवेदनायैव रामे चैतन्यमर्पितम्।

६। नह्याकृतिः सुसदृशं विजहाति वृत्तम्। (मृच्छकटिक ९)

६। मोहादभूत् कष्टतरः प्रबोधः (रघु)

एवं शतशः उदाहरणानि सन्ति वाहुल्यभयात् सर्वेषां तेषामुल्लेखात् विरम्यते।

अधुना भवभूति रूपकत्रयस्याङ्गसादृश्यमन्यकविग्रन्थांशैः दर्श्यते। यद्‌यथा—

१। वीरचरिते सप्तमाङ्के विमानविहरणम्।	१। रघुवंशे त्रयोदशसर्गे विमानविहरणम्। भट्टिकाव्यस्य द्वाविंशसर्गस्य २४—२८ श्लोकाश्च।
२। उत्तरचरिते पञ्चमाङ्के चन्द्रकेतुविक्रमः।	२। पद्मपुराणस्य पातालखण्डे वर्णितः चन्द्रकेतुविक्रमः।
३। उत्तरचरिते षष्ठाङ्के आग्नेयादीनामस्त्राणां प्रयोगः।	३। किरातार्जुनीयस्य षोड़शसर्गे आग्नेयादीनामस्त्राणां प्रयुक्तयः।
४। मालतीमाधवे द्वितीयाङ्के।	४। वासवदत्तायाः उपाख्यानं वृहत्कथातः संगृहीतम्।
५। मालतीमाधवे व्याघ्रयुद्धम्।	५। मृच्छकटिके हस्तिविद्रावणम्।
६। मालतीमाधवे पञ्चमाङ्के कन्यारत्नोपहारप्रदानम् वधसाधनञ्च।	६। दशकुमारचरितस्य समाख्यायिका।
७। मालतीमाधवयोः समागमः।	७। दुष्मन्तशकुन्तलयोः समागमः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

८। मालतीमाधवस्य नवमाङ्कः।	८। विक्रमोर्वश्याः चतुर्थाङ्कः।
९। उत्तरचरिते छायासीता।	९। भासकृतस्वप्नवासवदत्ते स्वप्नदृष्टा वासवदत्ता।
१०। उत्तरचरिते अध्ययनविघ्नात् आत्रेय्या अगस्त्याश्रमगमनम्।	१०। स्वप्नवासवदत्ते अध्ययनविघ्नात् ब्रह्मचारिणः लावाणकं परित्यज्य मगधगमनम्।

एवं बहुशः परं तत् सर्वं वाहुल्यभिया परित्यज्यते।

भवभूतिः परवाक्यग्रहणनैपुण्यं यद्दर्शितं तदेव प्रमाणयति यद् तेन प्रयुक्तः पदवाक्यप्रमाणज्ञः इति वाक्यांशोऽपि शाङ्करभाष्यादेव गृहीतः। उम्बेकाचार्य्यापरनामा मण्डनमिश्रः शास्त्रवादे शङ्करेण पराजितो भूत्वा तच्छिष्यत्वं स्वीचकार एतदपि शङ्करदिग्विजयादवगम्यते। अतोऽस्माकं सिद्धान्तः यत् शङ्करोऽपि भवभूतिसमकालीन एव। वामनकृतध्वन्यालोकलोचने उत्तरचरितस्य श्लोकः समुद्धृतः दृश्यते। वामनस्तु खीष्टीयसप्तमशताब्द्याः शेषभागे प्रादुरभूत्। अतः शङ्करेण भवभूतिगुरुणा, यशोवर्म्मणा च भवभूतिप्रतिपालकेन खीष्टीयषष्ठशताब्द्या वा प्रथमार्द्धे प्रादुरभावि। भवभूतिस्तु पद्मपुरे विदर्भान्तःपातिनि जातः मालवविषये पद्मावत्यां च शिक्षां प्राप्तः। ततस्तेन कुमारिलभट्टात् सम्यग् वेदान् अधीत्य यशोवर्म्मपरिषदलङ्कृता। उपरते च यशोवर्म्मणि तेन विद्वज्जनबहुला उज्जयिनी समाश्रिता। तस्योज्जयिनीवासकाले एव शङ्करस्य भाष्यादिकं प्रचारितमभूत्, सोऽपि तत्सर्वमधीतवान् परं वेदान्तस्य प्राचीनव्याख्यां मानयन् अपि तदायं शङ्करमतं सम्यक् अवबुधे न वेति महान् संशय इति। यतो दृश्यते हि मालतीमाधवे श्लोकः—

वहिः सर्व्वाकारप्रवररमणीयं व्यवहरन्
पराभ्यूहस्थानान्यपि तनुतराणि स्थगयति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

जनं विद्वानेकः सकलमभितिमन्थाय कपटै-
स्तटस्थः स्वानर्थान् घटयति च मौनं च भजते ।

अस्य मन्ये प्रसङ्गसङ्गतार्थमन्तरेणापि गुणीभूतमर्थान्तरमस्ति, तेन तु विद्वान् इति पदेन शङ्कर एव आक्रान्तः। भवतु अनुमानमेवैतत्। उज्जयिनीस्थ एव भवभूतिः मण्डनापरनामा वीरचरितादिरूपकत्रयं प्रणिनाय। तेषु च वीरचरितमादौ ततश्च मालतीमाधवं ततश्चोत्तरचरितं प्रणीतम्।

कुमारिलात् पाठग्रहणात् प्रागेव स तस्य स्वसारमुपयेमे। इयमेव भारत्यभिधाना लीलापरनाम्नी भूतलावतीर्णा भारतीति सर्व्वविद्यानिष्णातासीत्। प्रणीते तेन रूपकत्रये तस्य प्रौढ़ावस्थायां स सकलवादिवादं खण्डयता भगवता शङ्करेण स्वयमागत्य जितः, शिष्यीकृतश्च। अस्मिन्नेव प्रसिद्धे वादे भारती मध्यस्था बभूव। शङ्करेण पराजितः स गार्हस्थ्याश्रमं परित्यज्य सुरेश्वर इति नाम जग्राह विविधवेदान्तनिबन्धांश्च प्रणिनाय। अस्य रूपकत्रये महाकवेः अश्वमेधादिविधानपरिज्ञानवशात् पूर्व्वमीमांसायां वीरचरिते जामदग्न्योपदेशे सांख्ययोगयोः, आन्वीक्षिकाम् अत्यादरदर्शनात् न्यायदर्शने वैशेषिके च, यत्र तत्र वैदिकवाक्यकलापानामुद्धारदर्शनात् वेदेषु, तथा कामशास्त्रादिषु च परमप्रावीण्यमवलोक्यते। अनेन विवर्त्तवादो वेदान्तप्रसिद्धः परिगृहीतः। अधुना स्वर्लोकप्राघुणिकमहामहोपाध्याय-सतीशचन्द्रविद्याभूषणपादानां मते शङ्करात् प्रागपि विवर्त्तवादोऽवर्त्तत। यतः तेनैव तत्प्रणीत—"भवभूतिः तस्य काव्यञ्च"ति शीर्षकवङ्गभाषामयग्रन्थे वौधायनकृतवेदान्तभाष्ये परमप्राचीने विवर्त्तवादः समर्थित इति कथितम्। ये केचन विद्वांसः वौधायनकृतवेदान्तभाष्यमधीतवन्तस्तैस्तु एतदेव द्रष्टव्यं यत् भवभूतिव्यवहृतदर्शनशास्त्रप्रसिद्धपारिभाषिकशब्दाः तस्मिन् वर्त्तन्ते

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

न वा। तत्र प्रधानत इमे दर्शनशास्त्रप्रसिद्धाः पारिभाषिकशब्दाः भवभूतिप्रणीतरूपकेषु दृश्यन्ते। तद्यथा—

अभ्यूहस्थानं, तटस्थः—(मा, मा १।१७ श्लोके)

प्रत्यभिज्ञा, उपाधिः—(मा, मा १।२७, १।२८ श्लोकयोः)

परिच्छेदातीतः, अविषयः—(मा, मा १।३२)

परिच्छेदव्यक्तिः, निष्ठाशून्यं—(मा, मा १।३४)

अनवग्रहः, वैकृतविवर्त्तदारुणः—(मा, मा १।४२)

विवर्त्तमानाम् (मा, मा १।४५)

प्रत्ययोत्पत्तिसन्तानं, वृत्तिसारूप्यम्—(मा, मा ५म)

व्याघ्राघ्रातमृगीन्यायः—(मा, मा ५।२९)

परां कोटिं—(मा, मा ६।२)

निरवग्रहः—(मा, मा ९म)

सन्तानवाहिनी—(उ, च ४।८)

ये शब्दा मालतीमाधवे प्रयुक्ताः कविना ते वीरोत्तरचरितयोः विशेषेण उत्तरचरिते भूयसा प्रयुक्ताः। अधुना वेदान्तिनः भवभूतेः कश्चित् परिचयं दत्त्वा विरंस्यतेऽस्माभिः। अनेन खलु वीरचरितोपक्रमे—

> अथ स्वस्थाय देवाय नित्याय हतपाप्मने।
> त्यक्तक्रमविभागाय चैतन्यज्योतिषे नमः॥

इत्युक्त्वा अभीष्टदेवः नमस्कृतः। अपि चायं अरुन्धत्या जनकं "परं ज्योतिस्ते प्रकाशताम् अयं त्वां पुनातु देवः परोरजा य एष तपति" इत्याशीर्भिः योजयति। वीरचरितस्य सप्तमाङ्के तु ज्योतिःशब्दस्य भूयान् व्यवहारः परिलक्ष्यते।

> एको रसः करुण एव निमित्तभेदाद्-
> भिन्नः पृथक् पृथगिवाश्रयते विवर्त्तान्।
> आवर्त्तबुद्बुदतरङ्गमयान् विकारान्
> अम्भो यथा सलिलमेव तु तत्समग्रम्॥ (उ,च,३।४७)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तथा—विद्याकल्पेन मरुता मेघानां भूयसामपि।
ब्रह्मणीव विवर्त्तानां क्वापि विप्रलयः कृतः॥ (उ,च,६।६)

एषा श्लोकद्वयी अत्युत्कटं वेदान्तगन्धं विकिरति। परमतोऽपि उत्कटतरमस्ति। तद् यथा मालतीमाधवे—

"यत् सत्यमधुना सन्दर्शनं नेति स्वल्पोऽपि विशेषः। मम हि सम्प्रति सातिशयप्राक्तनोपलम्भसम्भावितात्मनः संस्कारस्यानवरत-प्रबोधात् प्रतायमानस्तद्विसदृशैः प्रत्ययान्तरैरतिरस्कृतप्रवाहः प्रिय-तमास्मृतिप्रत्ययोत्पत्तिसन्तानस्तन्मयमिव करोति वृत्तिसारूप्यत-श्चैतन्यम्।" भामत्यादिष्वपि इतोऽपि दार्शनिकशब्दाड़म्बरप्रघटित-निविड़तरबन्धबद्धं वाक्यकदम्बकमस्ति वा न वेति मनांसि अस्मद्वि-धानां सुतरां संशेरते। अतः परमपि किञ्चिद् वक्तव्यमस्ति, यदि भवभूतिमण्डनमिश्रयोरभिन्नत्वं प्रतिपादितं भवेत्, तदा वश्यवाचः कवेः भवभूतेः—

"यं ब्रह्माणमियं देवी वाग्वश्येवानुवर्त्तते।"

इति श्लोकार्द्धस्य सद्व्याख्या भवितुमर्हति। मण्डनपत्नी स्वय-मवतीर्णा सरस्वतीति विद्यावत्तया लोके प्रसिद्धाभूत्। यदि इयं वाग्देवी इत्यस्य इयं प्रसिद्धा लोके सरस्वत्या अवतारत्वेन वाग्देवी भारती पत्नीत्वेन वश्येवानुवर्त्तते इति व्याख्या स्यात्, तर्हि कवे-र्वाक्यानां पूर्व्वपरसङ्गतिर्भवेत्। अन्यथा पूर्व्वश्लोके "वाचममृता-मात्मनः कला"मित्यभिधाय परश्लोके एव तस्या वश्यरमणीत्वेन कल्प-यितुमन्याय्यत्वात्। यातु पण्डितैरुपेक्षितस्य मतस्य समाधाने प्राप्तं मया विश्वकोषात् महामहोपाध्यायसतीशचन्द्रविद्याभूषणस्य च भवभूति-शीर्षकग्रन्थात् पर्य्याप्तमुपकरणम्, अतः धन्यवादार्हौ मे विश्वकोष-संग्रहकारः स्वर्गत-विद्याभूषणमहोदयश्च। अधुना यद्यनेन निबन्धेन पण्डिताः परितोषं प्राप्नुवन्ति, तदैव चरितार्थो भविष्यति मे प्रयत्न इति

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वसन्तबान्धवम्

लेखकः—श्रीसातकड़िकाव्यस्मृतितीर्थः

कान्तकान्तविरहेऽतिदुःसहे काचिदिन्दुवदना नवाङ्गना ।
वामहस्तनिहितानना चिरं चित्रितेव रहसि स्थिता बभौ ॥१
सा समीक्ष्य मधुमासमागतं जातु मोहवशगा क्षितिं गता ।
तत्क्षणे च वरदुःखदायिनीं चेतनां गतवती शनैः शनैः ॥२
किन्तु नापदमलां स्वभावजां चित्तवृत्तिमबला पुरातनीम् ।
का हि कामकवलं समागता कामिनी न चलति स्वभावतः ॥३
इत्यचेतनमपि प्रचेतनं स्निग्धबन्धुमिव तं त्वरान्विता ।
प्रष्टुमीशकुशलात्मिकां कथां सादरं समुपचक्रमे तदा ॥४
यत्नतः प्रथमतस्तपस्विनी संनिरुध्य मनसोऽतिधावनम् ।
स्वागतादिवचनं निवेद्य तं पृच्छति स्म कुशलं सबान्धवम् ॥५
सर्व्वमत्रभवतो निरामयं वर्त्ततेऽपि सहबान्धवेन सन् ।
किं नु तेऽद्य गमनं निरत्ययं जातमेव मम नाथ सन्निधौ ॥६
चन्दनाद्रिपवनोऽपि सर्वतो भ्राम्यतीह भवता समं पुनः ।
पश्यति स्म मम जीवितेश्वरं कुत्रचित् किमिति कामिनं कदा ॥७
कीदृशोऽस्ति मम मानसेश्वरो वेत्सि तद् यदि तु सत्वरं वद ।
त्वां समीक्ष्य किमयं स्मरत्यदः स्वान्तराज्यमसमाप्तशासनम् ॥८
नो गतोऽसि यदि मत्प्रियान्तिकं गच्छ तत्र कृपया तदाशु तम् ।
ज्ञापयामि च वियोगिनीमिमां योगिनीमिव निमीलितेक्षणाम् ॥९
साधवो हि विनयेन याचिता जीवितेऽपि विगतस्पृहा इति ।
संवदन्ति विबुधास्तदद्य ते सन्निधौ मम पतिप्रयाचनम् ॥१०
त्वां प्रदीप्तमृतुराजमिष्टदं कीर्त्तयन्ति कवयः कथाविदः ।
राज्ञ एव सविधे प्रयाचनं सुप्रसिद्धमिति याच्यसे मया ॥११

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तद्भवन्तमुषसि प्रतिच्चणं काकपुष्टकुलमुत्सवाकुलम् ।
कूजितेन मधुरेण सादरं स्तौति वन्दिपुरुषो यथा नृपम् ॥ २
संनिपीय कुसुमासवं मुदा गुञ्जनेन मृदुनालिपङ्क्तयः ।
वेदयन्ति सदयं सदागतं त्वामलं समभिनन्दनं मुहुः ॥१३
जीर्णपर्णनिचयं परित्यजन् सज्जितोऽद्य नवपल्लवैस्तरुः ।
त्यक्तजीर्णवसनः प्रसाधनं नेच्छतीह वद कः सदागमे ॥१४
केऽपि पुष्पनिकरेण भूषिता व्यञ्जयन्ति भवदागमे मुदम् ।
तोषयन्ति च भवन्तमप्यलं पुष्पवृष्टिभिरिव प्रजा नृपम् ॥१५
पुष्पिताः सुललिता लताः सुखं मत्तभृङ्गनिवहेन चुम्बिताः ।
स्मारयन्ति सुतरां पतीनहो पान्थकान्तकुलकामिनीकुलम् ॥१६
पश्य मित्रमधुना रतीश्वरस्त्वां सभाजयितुमागतः स्वयम् ।
कोऽथवात्र निजबान्धवागमे नाभ्युपैति तरसा गतिं बुधः ॥१७
सत्कृतिश्च भवतो विधानतः संविधातुमयमिष्टबान्धवः ।
पौष्पमप्यनलजालवर्षुकं स्फालयन्निह चापमुद्यतम् ॥१८
संनिविश्य हृदयाटविं सुखं नाथहीनमबलाकुलस्य किम् ।
प्राणपक्षिपटलं समाकुलं सत्वरो मृगयितुं समिच्छति ॥१९
[युग्मकम् ।]
काननेऽत्र मृगयां यदीच्छसि पञ्चबाण ! शृणु मामकं वचः ।
अग्रतोऽस्य गहनस्य नायकं वेदयस्व सहसा समागतिम् ॥२०
अन्यथा त्वमबलावधेनसि दारुणे विनिपतिष्यसि ध्रुवम् ।
नायकेऽत्र समुपागमिष्यति वेत्स्यते तु भवतः कियद्बलम् ॥२१
दारुणो हि भवतः शिताशुगो दुर्बलस्य मम जीवखञ्जनः ।
दुर्बले हि मृगया विगीयते कुत्सितस्य नृपतेरिव क्रिया ॥२२
मानिनीहृदयकानने घने तुङ्गदुर्गकुचशैलदुर्गमे ।
सन्ति मानसमृगाः समुद्धताः हन्त कान्तकरुणातृणाशनाः ॥२३
तान् निहत्य मृगयाकृतार्थतामात्मनः सुमहतीं सुसाधयेः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मानिनीशपरितोषनात्तदा पुण्यमेव सुतरां भविष्यति ॥२४
विक्रमोऽपि बलिना विशोभते हे रतीश ! बलिनस्ततः सुखम् ।
शक्तिरत्र कियती परीक्ष्यते चान्यथानुतपनं भवेद् ध्रुवम् ॥२५
मामनङ्ग ! कृपणाङ्गनां प्रति हन्त शून्यहृदयामनागसम् ।
युज्यते न धनुषः समुद्यमः कः करोति ननु पिष्टपेषणम् ॥२६
त्वां समीक्ष्य सहसा समागतं दूरगञ्च परिचिन्त्य वल्लभम् ।
मानसं विगतधैर्य्यमद्य मे प्राप्तमेव शरणं तदन्तिकम् ॥२७
किं करोमि शरणं श्रयामि कं क्व प्रयामि दहनं विशामि किम् ।
चिन्तयेत्यमधुना समाकुला माधवाङ्ग नितरां ज्वलाम्यहम् ॥२८
हे वसन्त ! विपदीह यद्भवान् स्वागतः सपदि तत् त्वया समम् ।
मित्रभावमियमिच्छति त्विमां मात्र मित्र ! रमणीत्यपेक्षताम् ॥२९
बान्धवो हि विपदागमे स्वयं नित्यमेत्य शरणं भवेद्बुधः ।
इत्यमस्ति चिरवाद इत्यतो बन्धुकृत्यमिदमद्य साधयेः ॥३०

किमहं हतभाग्यः ।

लेखकः—श्रीसिद्धगोपालकाव्यतीर्थः ।

शिरीषवृक्षस्य कस्यचिच्छाखासु संलीना कोकिला कलं चुकूज, मध्याह्नकालिकप्रचण्डातपसंतप्ता च काचिद्धरिणी तरुमूलमाश्रित्य स्तनन्धयं स्वशिशुं स्तन्यं धाययति स्म ।

पक्षिणीं वीक्ष्य हरिणी प्रोवाच—"सुभगे, धन्यासि त्वं पीयूषमिव वर्षति तव मधुरगानं श्रोत्रेषु, तच्छ्रावं श्रावं म्लानमपि चेतो विकसति । वायोरपि तीव्रतरा ते गतिः । यथेच्छं नभसि विहरसि वा, भूतलेऽवतीर्य्य सुमधुरं जनमनोमोहकं गायसि वा । मेघैरुड्डयन-स्पर्द्धां कुर्वाणा गिरीन् महासागरांश्चातीत्य देशदेशान्तरेषु द्वीपद्वीपा-न्तरेषु चाटाट्यसे । अहं तु भूतल एवावरुद्धा सर्वमपि जीवनमत्रैव यापयिष्यामि ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तच्छ्रुत्वा परभृता बभाषे—नानादेशेषु विचित्राणां वस्तूनामवलोकनं महदानन्दसन्दोहविषयो नूनम्। परं यदाहमत्र स्थिता त्वदीयशिशुं स्वमातरं वत्सालिङ्ग्य रक्ताभेन मनोहरेणोष्ठकयुगलेन तव स्तन्यं धयन्तमवेक्षे तदा विचारयामि पश्चतो म द्रुम उत्पाद्य सदैवं भूतलं एवावस्थिताहं ब्रह्मानन्दसहोदरं दिव्यं रसमिमं सकृदप्यास्वादयेयं सकलमपि जीवितफलमवाप्नुयाम्।

वातपूरितशाखान्तरालजेन स्वनेन वनस्पतिर्जगाद—हरिणी कथमधन्या। शिरीषहतक एव दुर्भगतमः। प्राणिषु जवनतया खलु त्वम्, प्रातरेकत्र सुप्तोत्थिता यदा वेगेन धावसि तदा पृथिवी तव चरणयोरधस्तादुत्पततीव, सायञ्च त्वं योजनानां शतेन विप्रकृष्टे देशे दृश्यसे। शिरीषस्तु वर्षाणां शतेति यत्र तदीय-बीजमङ्कुरितम् तत्रैव वार्धक्यं यापयति। प्रभञ्जनो मम शाखाः कम्पयति, मामात्मना सह नेतुं यतते ननम् परं समान्तत्रैव त्यक्त्वाग्रे गच्छति, कलं रुवन्तो विहगा मामतिक्रम्योत्पतन्ति, प्रातः सायश्चान्वहं पशवः पानीयं पातुं मम समीपतः सुन्दरं सरोवरमभिगच्छन्ति। वसन्तमनु ग्रीष्मो, ग्रीष्ममनु वर्षाः, तासानु शरच्छरदमनु हेमन्तो, हेमन्तमनु शिशिरश्च, शिशिरमनु पुनर्वसन्त इति ऋतवः क्रमेण यान्ति पुनः पुनश्च तामेवं परम्परामनुसरन्ति। एवं शतकृत्वस्ते व्यतीयुः परमहं रेखामात्रमपि न व्यत्येमि, मम जन्मशय्यैवानन्तसमाधिस्थले परिणंस्यति।

ततो वृक्षमूलाद्विनिरुदियाय—तत्र स्थितायां पाषाणशिलायां बद्धेन बालुकाकणेन स्व-पाषाणमयकारातोऽवोचि—कथं खलु शोच्याः श्रीमन्तः। सर्वेऽपि चेतना यूयम्। मनोहर अनोकह, वर्षे वर्षे चेतोहराणि सुन्दरामोदयुक्तानि सुकुमाराणि कुसुमानि जनयसि, मधुकरास्तवोपरि कलं कूजन्ति मलयानिलेन रभसे, कलरवा विहगा अनुदिनं त्वामाश्रयन्ते। एवं स्थिते कथं खलु दुर्भाग्यस्त्वम्, अहमेव वराको हतभाग्यतमः।

ततो वनस्पतिरुपसंहरन् प्रतिबभाषे—त्वमचेतनोऽहञ्चेतनः, त्वन्न जीवसीति सत्यम्। परं जीवनस्य छाया मृत्युरपि मामेव कवलीकरोति। ममापत्यानि मनोहराणि कुसुमानि प्रतिवत्सरं म्लातुमेव जायन्ते। यत्र तानि गतानि, अहमपि सद्य एव तत्र गन्ता। त्वन्तु प्रलयकालिकान्त्यरवे रश्मिभिर्विद्योतिष्यसे।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नलदमयन्तीयम्

(पूर्व्वतोऽनुवृत्तम्)

नलः—अहो न्यायदर्शिता किरातराजस्य! अहो दौर्भाग्यञ्च दुष्टवृत्तस्य किरातद्वयस्य ?

विदू—मा तावदनयोरनुशोच्यतां दौर्भाग्यम् ।

नलः—कथमिव ?

विदू—यतः खलु अयं समादिष्टः प्राणान्तको दण्डस्ताभ्यामतिक्रान्तः ।

नलः—किं पलायनेन आत्मा रक्षितः ?

विदू—कथमेवं प्रभाविणः किरातराजस्याधिकारे सम्भवेत् ।

नलः—तत् कथमन्यथा ?

विदू—ममैव प्रियसख्या कृपया तयोः कातरवाक्यविमनायितया सम्प्रार्थितस्य किरातराजस्य प्राणान्तकदण्डप्रत्याहारेण ?

नलः—अहो दयालुता देव्याः !

आत्मत्राणं याचमाना यदन्ते जाता देवी निष्फलप्रार्थनादौ ।

तत्त्राणार्थं प्रार्थितो यत् किरातः सत्यं तस्या मार्दवं तत्र हेतुः ।

ततस्ततः ?

विदू—ततः कियत्कालानन्तरमेव बहुभिः किरातैरनुसृतेन तेन किरातपतिना प्रियसखी मे विदर्भान् प्रापिता इति ।

नलः—प्रिये ! दिष्ट्या वर्द्धसे, यदेष जात्या किरातोऽपि तथा साधुवृत्तं दधानो देव्या अनुकूलतया लब्धः ।

दम—सर्वमेवेदं प्रभावविलसितं त्वदेकचरणसेवायाः !

इन्द्र—तात, किरात इति भीमा जातिरियं, तत्रापि एवं माहात्म्यम् ?

नलः—वत्स, न जानीषे, गुणप्रकर्षे जातिरिति नोपयुज्यते, पश्य,

न केवलं जातिकृता महात्मता

यन्नीचजातेरपि तस्य साधुता ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सनातनो गोपकुले समुद्गतो
ददाह लोकस्य दुरन्तदुर्गतिम् ॥

अथ वयस्य, क्व साम्प्रतमसौ मे अकारणबान्धवः किरातराजः ?

विदू—स हि महात्मा तत्रभवता विदर्भाधीश्वरेण याचितः सुतरां राजपरिजनैः सत्क्रियमाणोऽद्यापि अस्यामेव नगर्य्यां प्रतिवसति ।

नलः—अहो सुसमीच्यकारी तत्रभवान् भीमः, येन महोपकारमनुष्ठितवतः किरातस्य नीचजातिमभिसन्धाय तं वाङ्मात्रसत्कारेण न विसर्जितवान् इति ।

दम—आर्य्यपुत्र, को वा विस्मयस्तावन्मात्रेण, पित्रा तत्र परं प्रियसुहृद्वृत्तिरनुगृहीता ।

नलः—युक्तमेव समीहितं महाराजस्य ।

इन्द्र—तात, स मे द्वितीयो वृद्धमातामहः । मयि तस्य स्वस्मिन् इव दौहित्रे परमः स्नेहः

नलः—देवि, दमयन्ति, वयस्य मन्दारक, नूनं ममाप्येष महाराजो भीम इव मान्यं लम्भयितव्यः ।

दम—अनुगृहीतास्मि ।

विदू—एवमेव युज्यते, यतः तेन प्रियसखी मे धर्म्मपुत्रीति व्यपदिष्टा तयाप्येष धर्म्मतात इति ।

प्रविश्य कञ्चुकी—महाभाग, महाराजो भीमः समाज्ञापयति यथा सकलराजन्ययक्षगन्धर्व्वादिसमक्षं सभायां सपुत्रकलत्रमित्रस्य भवतो दर्शनमिच्छामीति, तत्रभवता अयोध्याधिपतिना ऋतुपर्णेनापि भवान् एवं सन्दिष्टः ।

नलः—वयस्य, किमिदम् ?

विदू—नासमीच्यकारी तत्रभवान् भीमः । तद्यथादिष्टमनुष्ठीयताम् ।

नलः—जयन्धर, विज्ञापय एषोऽहमनुपदमादेशं पालयामीति ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कञ्चुकी—यथाज्ञापयति महाभागः। [निष्क्रान्तः]

नलः—देवि, महाराजस्य सभायामस्मदुपस्थापने कीदृशं निमित्तं सम्भावयसि ?

दम—राजवृत्तं राजान एव कल्पयितुमर्हन्ति। तदिदं विदर्भाधिपतेर्वृत्तं निषधाधीश्वराणामिव कल्पनाविषयः।

नलः—(दीर्घं निश्वस्य) देवि, अतीतं विस्मरसि, अद्य पुष्करो राजेश्वरो निषधेषु।

दम—(दीर्घं निश्वस्य) आं एवं,

नलः—अथ वयस्य, त्वं तत्र कीदृशं निमित्तं सम्भावयसि ?

विदू— अहं ? (विचिन्त्य) अहं पुनः सम्भावयामि, यथा समुपस्थिता भोजनवेलेति महोत्सवानुभवार्थं सर्वैः सम्भूय अत्र भोक्तव्यम् इति।

सर्वे—(हसन्ति)।

नलः—भवतु यथा तथा वा, "आज्ञा गुरूणां ह्यविचारणीया" इति। तदेहि तत्रैव गच्छामः। [परिक्रम्य] अये इयमसौ विदर्भसभा, यत्र हि—

एते राजन्यवर्गाः सुरसमितिरियं नागलोकस्तथायं
गन्धर्वाः किन्नराश्च प्रविततरुचयः सिद्धसाध्यादिकाश्च।
सर्वे योग्यासनस्थाः स्थिरमतिगहनाः शोभमानाः पुरस्तात्
अन्योन्यस्पर्द्धिरूपद्रविणपरिकराद् विस्मयं संश्रयन्ते॥

अपि च सिंहासनं परिजहद् गुरुरेष भीम
आयोध्यिकश्चितिभृतानुसृतः सभायाम्।
सम्मानपूर्णवचनैरनुनीय सर्व्वान्
गर्व्वं विहाय निजगौरवमातनोति॥

भवतु यावदत्र प्रविशामि। [परिक्रामन्ति]

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(ततः प्रविशन्ति विदर्भसभायां भीमः ऋतुपर्णः
अन्ये च विदेशागता राजादयः)

भीमः—नानादिग्देशागता राजानो देवप्रभृतयश्च ! कृतकृत्याः किल विदर्भा यदेवमत्रभवन्तः सम्मिलिताः, तत् किमपरं कृतज्ञता-मन्तरेण विदर्भप्रतिनिधिरद्य विज्ञापयतु, कुतः ?

येषां दर्शनमुत्तमेन तपसा लभ्यं सुराणां जनैः
गन्धर्व्वाः स्वरसप्तयस्थितिविदो ये स्वर्गसिद्धाश्चिरं
ये यत्ता धननायकस्य विषये ये चापरेऽनुत्तमाः
ते सर्व्वे परमेण पुण्यमहसा भीमेन लब्धाः पुरः ॥

सर्व्वे—अलमलमत्यादरेण, धन्यः खलु महाराजो भीमः ।

भीमः—अयि भोः पारिषदाः ! भवतां प्रीतिरेव तथा मां प्रत्याययति। यद्भवतु तद्भवतु, अहमत्र किञ्चित् प्रवक्तुमिच्छामि ।

सर्वे—निराबाधं प्रस्तूयताम् ।

भीमः—अस्त्येव विदितो भवद्भिः सुविश्रुतयशा निषधेश्वरो मदीय-जामाता ?

सर्व्वे—अथ किम्, को वा तं महात्मानं न जानाति ?

भीमः—अस्त्येतदपि विदितं महाभागानां यदेष प्रतिकूलदैववशात् राज्यपरिभ्रष्टः कानने प्रस्थितः स्वीयां धर्म्मपत्नीं निःसहायां विसर्ज्य क्वापि गत इति ?

सर्व्वे—सर्वं जानीमः, तदपि जानीमो यथेयं पुनर्विदर्भान् परिप्राप्तेति ।

भीमः—सेयं मे दुहिता दमयन्ती कुतोऽपि प्रच्छन्नस्वरूपं पतिं पुनः प्राप्तुकामा व्याजेन पुनः स्वयंवरणमुद्घोषितवती ।

राजानः—(परस्परं मुखमवलोकयन्ति) अये किमिदम् ?

ऋतुपर्णः—सत्कुलप्रसूताः, प्रभूतबलवाहना राजानः ! भाग्यवशात् अयोध्याजानपदानां तावत्कालं सार्व्वभौमो नलः पुण्यबहु-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

लायामयोध्यायां स्थित्वा मयैव साकमत्र प्राप्तः, तदिदानीं अनुमन्यतामस्य धर्म्मदारसमागमः !

सर्वे—अये सार्वभौमो नलः पुनः प्राप्तः, प्रियं नः प्रियं नः ।

ऋतुपर्णः—तदेष तत्रभवान् उत्तीर्णकलिप्रभावः पुनरधिगतभूरितेजाः सार्वभौमो नलः स्वपुत्रकलत्रमित्रसहित इत एव अभिवर्त्तते, य एष—

संस्मृत्य धर्म्मवनितापरिहारदोषं
लज्जाभरेण मलिनाननमितोत्तमाङ्गः ।
धृत्वा करेण निजमात्मजमिन्द्रसेनं
प्राप्तो महाव्यसनमुक्त इवांशुमाली ॥

सर्वे—अये एष सार्वभौमो नलः प्राप्तः, प्रियं नः प्रियं नः ।

(ततः प्रविशति यथानिर्दिष्टो नलः)

ऋतुपर्णः—(दमयन्तीं दृष्ट्वा) अहो पतिव्रताया वत्साया दमयन्त्याः समवस्था ! इयं हि—

उत्कण्ठाविवशा वियोगवशतो दीनां दशामास्थिता
भूषाच्छेदविनीतमूर्त्तिरनघा मन्दक्रमा लज्जया ।
एकामेव विलम्बितामनुपदं वेणीं दधाना सती
धारासिक्तविशीर्णपुष्पवल्लया वल्लीव संलक्ष्यते ॥

नलः—[स्वगतम्] लज्जितोऽस्मि विदितनिजापराधो यथापूर्वं निःसङ्कोचमुपगन्तुम्, अथवा का गतिः ? [परिक्रामति] किं वा मन्यते परिषत् ?

सर्वे—विजयतां विजयतां कलिप्रभावमुक्तः सार्वभौमो नलः ।

नलः—अहो प्रत्युज्जीवितोऽस्मि, यत् सर्व्वैरेव दैवदोषो विज्ञातः, तत् पुरुषदोषान्मुक्तोऽस्मि ।

सर्व्वे—अहो पतिव्रतायाः प्रभावः ! अहो नलस्य धर्म्ममहिमा !

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नलः—(उपसृत्य) तात, अभिवादये, (ऋतुपर्णमुपसृत्य) महाराज, अभिवादये, वत्सनाकृतम् अपराधं मे क्षन्तुमर्हति महाराजः।

ऋतुपर्णः—महाराज, नल, अलमभ्यर्थनया। गुरवः स्निग्धेषु गुणमात्रदर्शिनो भवन्ति, अपि च विज्ञातमिदमस्माभिः,—यत्

कलेरेव प्रभावेण सर्व्वमाचरितं त्वया।
प्रदोषे पद्मसङ्कोचः किं पद्मस्यापराधतः ?

अत्र भवानेव क्षमापणीय ऋतुपर्णेन।

नलः—कथमिव ?

ऋतुपर्णः—वत्स, नल, अत्रापि वक्तव्यमेव ? तथाहि—

सामन्तलक्षमुकुटानि पदोपकण्ठे
यस्य प्रसादलवलाभकृते नमन्ति।
तस्यैव सूतपदवीप्रतिपादनेन
प्राप्तापराधमधुना स्वमनुस्मरामि॥

नलः—महाराज, किमेवं मामपराधिनं करोषि, त्वमेव मे समाश्रयस्तदानीं निरालम्बस्य !

इन्द्र—तर्हि एतावत्कालं वृद्धमातामह एव पितुर्मे प्रच्छादकः।

नलः—वत्स, न केवलं प्रच्छादकः, परं जीविकाप्रदानेन जीवनदातापि

दम—आं अन्यथैव भिग्योरिन्द्रसेनस्य वचनं गृहीतमार्य्यपुत्रेण !

इन्द्र—आम् एवम् ?

ऋतुपर्णः—वत्से, दमयन्ति, वत्सनलेन परवृद्धरा महती कृतज्ञता प्रस्तूयते, त्वमपीदानीं तथा कुरुष्व, मन्ये इतःपरं तव परिपालनेन प्रियसुहृद् भीमोऽपि युवाभ्यामभिनन्दनीयः ?

दम—(सलज्जम्) काहमबला शुभाशुभनिर्णये।

नलः—अहो विशेषेण अधिक्षिप्तोऽस्मि। (प्रकाशम्) महाराज,

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(अश्रोक्ते) तात, पुत्रचापलं चन्तुमर्हसि, न तावत् किञ्चि-दभिसन्धाय मया उक्तम् ।

ऋतुपर्णः—तदेहि गाढ़परिष्वङ्गेन दण्डन्ते धारयामि । (परिष्वजते)

भीमः—भोः भोः पारिषदाः ! एष सार्व्वभौमो नलः पुनरपि सौभाग्यवशात् परिप्राप्तो वसुन्धरया, तदत्रैव विदर्भराज-सिंहासने वैदर्भीसहितस्य तस्य साम्राज्याभिषेकं कर्त्तु-मिच्छामि, तदिदमनुमन्यताम् ।

सर्व्वे—विजयतां विजयतां सार्व्वभौमो नलः । प्रियं नः प्रियम् ।

विदूषकः—(प्रहर्षं नाटयति) ।

भीमः—वयस्य, ऋतुपर्ण, अत्र न कोऽपि प्रतिपक्षः, तदनुभूयता-मस्माभिरिदानीमभिषेकमहोत्सवः ?

विदू—भन्दारक, अपि सुधासागरे पतितोऽसि, यदेवं मुहुरपरिमितं सुधाप्रवाहं पिबन् अवशतामात्मनः प्रतिपद्यसे, मूर्ख, एष ते नृत्यगीतयोरवसरः, उत्तिष्ठ, उत्तिष्ठ । (हर्षं नाटयति)

नलः—तात,—

भीम ऋतुपर्णंस्य—वत्स, कथ्यतां किमिव विवक्षणीयम्, अलं शङ्कया ।

नलः—तात, अत्र अहमिव प्रतिपक्षः—

दम—अयि, सुष्ठु हृदयमार्य्यपुत्रस्य ।

सर्वे—(सविस्मयाः शृण्वन्ति) । कथमिव ? कथमिव ?

भीमः ऋतुपर्णस्य—वत्स, किमभिसन्धत्से ?

नलः—आर्य्याः, साम्राज्यमिदं द्यूतविनिर्जितं पुष्करस्य मम भ्रातुः, तदत्र स एव प्रभुः प्रदाने, कथमहमात्मना परस्वमपहरेयम्, अत एवाहं प्रतिपक्षः ।

सर्वे—नहि नहि सार्वभौमो नल एवास्मासु प्रभवति, न वयं पुष्करस्य अधिकारम् अनुमन्यामहे ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विदू—वयस्य, किमेवं प्रलपसि ? द्यूतच्छलेन पुष्करो राज्यं परिगृहीतवान्, अस्यापि ग्रहणे दोषं शङ्कसे ?

नलः—वयस्य, सूक्ष्मपर्य्यायं धर्मं न जानासि, एवं कृते राजधर्म्मो विपन्नः स्यात् !

विदू—राजधर्म्मं भवद्विधा राजान एव जानन्ति, कोऽहम् म्लाग्नून-ब्राह्मणस्तस्य निश्चये ? [सासूयमिव परावर्त्तते]

सर्वे—[विस्मयं रूपयित्वा] अहो धर्म्मनिष्ठता नलस्य ! अन्यथा को वा सति सामर्थ्ये स्वकीयसाम्राज्यग्रहणे प्रतिपन्थतामाचरेत् ?

इन्द्र—तात, अथ यदि साम्राज्यमिदं पितृव्यस्य, तर्हि अस्माकमेव !

नलः—वत्स एवमिदम् ।

भीमः—ऋतुपर्णस्य—अहो शैशवौदार्य्यम् !

प्रविश्य पुरुषः—महाराअ, एसो को बि अणादिप्पकिट्ट-पलिच्छअ-पलिहिदो भद्दपुलिसो पलिहालभूमिए उपट्ठिदो, ता दाणिं महालाओ प्पमाणं ।

नलः—अथ केनैतेन भवितव्यम् ? अथवा नूनमयं विमुक्तमोहतिमिरो भ्राता मे पुष्करो भविष्यति ! तात, नूनमयं भ्राता मे पुष्करः प्राप्तो भवेत्, तदादिश्यतामस्य सभाप्रवेशः ।

भीमः—तथा—(वक्तुमुपक्रमते) ।

विदू—महाराज, मा तावदस्मिन् उत्सवसमये दुर्जना द्रष्टव्याः ।

नलः—वयस्य, नहि पुष्करं मे लेशतोऽपि दूषयितुमर्हसि, यतः सर्वमिदमतीतं वस्तु कलिप्रभावपराभूतेनैव विहितमिति । अद्य तु तमन्यथैव द्रक्ष्यसि ।

विदू—द्रक्ष्यामीति यत् सत्यं, किन्तु न तस्य भावान्तरं, परं तवैव दौर्भाग्यात् दुरन्तमवस्थान्तरम् । [कोपं नाटयति]

नलः—वयस्य, मा शङ्किष्ठाः ।

विदू—किमयमपि गूढो राजधर्म्म एव, यदत्रापि न वयं किञ्चन जानीम इति ?

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वल्लीविलासम्

(पूर्वतोऽनुवृत्तम्)

लेखकः—स्वर्गतः रामसत्यकाव्यव्याकरणवेदान्तदर्शनतीर्थः ।

सृष्टा वल्ली सरसिजभुवा प्राणिनां प्रीतयेऽस्मिन्
अस्यां सर्व्वः प्रभवति परं न त्वदीयोऽधिकारः ।
यस्या गन्धं मनुजनिवहो देववृन्दं प्रसूनं
भुङ्क्ते नित्यं मधु च सधुपः कोमलाङ्गञ्च वृचः ॥२४॥
हेयं लोके विपदि सततं निर्म्ममत्वं सुधांशुः
एनामार्त्तां सुखकरकरैः सेवमानोऽत्र मानम् ।
हे शीतांशो सुभग भगवन् विश्वशान्त्याकराय
तुभ्यं देव प्रणतशिरसो मे त्रिसन्ध्यं नमोऽस्तु ॥२५॥
योऽस्या गन्धो द्रुम ! कुसुमजः शोविकाशैकमूलं
तं सर्व्वस्वं हरति पवने त्वं कथं मौनमासीः ।
धिक् ते रम्यं विटपनिवहं हन्त वाह्यमानम्
एवं येन व्यसनसमयेऽप्याश्रितो धीरभावः ॥२६॥
किं भोः खैरं कथयसि वल्ली गन्धवाहोतिमात्तं
मद्विध्वंसत्तममिममहं केन रुन्ध्यामयोग्यः ।
मैवं मंस्था भुवनपितरं दीनबन्धुं दयालुं
शश्वत् क्लेशप्रशमनविधौ तं सहायं न वेत्सि ॥२७॥
तत्कारुण्यं यदि नहि भवेत् साधनानां प्रधानं
किं शक्तः स्यादमृतकिरणः सागराकर्षणादौ ।
यस्याम्भोधेरमलसलिलेऽनन्तशीतांशुबिम्बा-
न्यालोक्यन्ते तरुवर मिथः स्पर्शहीनानि नूनम् ॥२८॥
क्वासौ ज्योत्स्ना विबुधसुलभा क्वापि पत्नो तथापि
यन्माहात्म्याज्जनितमनयोः पेयपायित्वमेव ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

त्वं विश्वेशं सकृदपि समासृत्य भक्त्या जगत्यां
किं स्वं कार्य्यं धरणिरुह नो लीलया साधयेयुः ॥२९॥
इत्थं भृङ्गे निगदितवति श्रीरसालाधिराजः
स्मृत्वात्मीयं चरितमसकृद् व्रीड़याभूद्विनम्रः ।
नैतच्चित्रं खलु सुमनसो रीतिरेषा स्वकार्य्यं
दृष्ट्वा शिष्टानभिमतमहो यत् स सन्तापमेति ॥३०॥
अत्रान्तरे विधुमरीचिनिराकृतार्त्तिः
क्षौणीरजोमलिनदेहलता लतासौ ।
मूर्च्छावसानमवलोक्य गतं विकाशं
वायूपमर्दजनितासुखमाप भूयः ॥३१॥
भृङ्गोऽयतां हृदयमन्दिरचन्द्रलेखाम्
उद्वीक्ष्य मोहतमसा रहितां प्रहृष्टः ।
चूतप्रमाणितवचःप्रचयस्तदानीं
कर्णामृतं विशदवर्णमुवाच किञ्चित् ॥३२॥
हे शोभनाङ्गि सति विस्मर विस्मरत्वं
निर्य्यातनार्त्तिमखिलां नयनाभिरामे ।
दासे त्वदीयकरुणालवमाप्तुकामे
नास्मिन् कदापि भविता विफलो निदेशः ॥३३॥
त्वं वल्लि मे सरलतामयि ! शान्तिवल्ली
मन्मानसस्य सुभगे ! नलिनी त्वमेव ।
यद्गुञ्जनं कविगणा मुहुराद्रियन्ते
प्राणप्रिये ! तदपि मे तव कीर्त्तिगीतम् ॥३४॥
बद्धोऽस्मि ते गुणगणैरमलैः सदाहम्
एतां शुभे मलिनतां ननु मुञ्च मुञ्च ।
मन्दस्मितेन ललितेन विलोकितेन
स्वाभाषितेन च लते चरितार्थयैनम् ॥३५॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सा सुन्दरी मधुकरी रसिकापि कान्ते
त्वत्प्रेमपूर्णहृदयस्य न मे सुखाय ।
छायां समाश्रितवतो हरिचन्दनीयां
प्रीतिप्रदा भवति किं कदली कदापि ॥३६॥

धन्योऽहमद्य मधुरप्रतिमे त्वदीया-
माज्ञामवाप्य लतिकाकुलरत्नभूते ! ।
प्रत्यागतं सपदि मां पवनोपकण्ठात्
जानीहि हन्त कृतकृत्यमनन्तकान्ते ॥३७॥

बन्धो ! रसाल ! किल ते विनिवेदनं मे
बाला लतेयमबला भवतावनीया ।
एषोऽञ्जलिः सविनयः सविधे तवाद्य
विस्रम्भपूर्णहृदयस्खलितोऽहमेषः ॥३८॥

तत् क्षम्यतां लतिकया विहितं यदागः
कोपो न ते समुचितो रसिक ! प्रियायाम् ।
देवो जगत्पतिरनारतमेव वल्ली-
सङ्गं त्वदीयमविनाशिनमातनोतु ॥३९॥

भव भव लतिके त्वं प्रेमरम्या रसाले
परममुकुलमाला लोभनीया विशाला ।
उरसि शिरसि च त्वामावहन्तं नितान्तं
कुरु कुरु निजकार्य्यैरार्य्यमेनं प्रशान्तम् ॥४०॥

भ्रमरवचनमित्थं श्रोत्रपेयं निपीय
प्रमुदितहृदयौ तौ वल्लरीचूतराजौ
मधुकरवरमग्रे गाढमालिङ्ग्य गन्धा-
हरणकृतदृढाशं प्रेषयामासतुस्तम् ॥४१॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इदानीं कविरुपसंहरति—

जयति जयति चित्तं प्रेमिकाणां विचित्रं
जयति जयति पुण्यं प्रेमपूरप्रसारः ।
जयति च मधुरत्वं तस्य सर्व्वावगाहि
जड़गणमपि शक्त्या यद्विलोलं करोति ॥४२॥

शिवसन्तोष-स्तोत्रम्

(पूर्वतोऽनुवृत्तम्)

लेखकः—कविराज-श्रीश्यामादासवाचस्पतिः

विश्वं विसृज्य विषमं विषमात्मभोगं
पृथ्वीजलानलमरुत्परमाणुकानाम् ।
संयोजनेन कुशलिन् ! प्रभवस्यनाद्य !
त्वं कार्य्यकारणविधौ जगतो निदानम् ॥ ५ ॥

विप्रतिपन्नमतं निरस्य ईश्वरस्यारम्भवादरीत्या जगत्कर्त्तृत्वमुपपादयितुमाह—विश्वमिति। हे कुशलिन् ! याथार्थ्येन जगन्निर्म्मितिनिपुण ! जगन्निर्म्मित्यभिसन्धातः इति यावत्। पृथ्वीजलानलमरुतां क्षित्यप्तेजोऽनिलानां ये परमाणुकाः परमाणवः अतिसूक्ष्माः चरमशेषांशा इति यावत्, "अणुर्व्रीहिविशेषे स्यात् पुंसि सूक्ष्मेऽभिधेयवत्।" इति मेदिनी। तेषां संयोजनेन विचित्रसम्बन्धकरणेन, विषमं विसदृशं, विषमात्मभोगं विषमाः विभिन्नाः अतुल्या इति यावत्, आत्मनो भोगाः सुखादिसाक्षात्काराः यत्र तादृशम्, एतेनास्यादृष्टहेतुकत्वं "प्रत्यात्मनियमाद्भुक्तेः" इत्यादिकया दिशा प्रतिपादितम्, प्रतिपादितञ्च जगत्स्रष्टावदृष्टस्य सहकारित्वम्। विश्वं विसृज्य निर्माय, जगतः विचित्ररूपेण सृष्टस्यास्य विश्वस्य, कार्य्यकारणविधौ कार्य्यं कारणजन्यमिति नियमे त्वं निदानं जगदुपकरणसंग्राहकरूपेण आदिकारणं, प्रभवसि। अचेतनघटादिकार्य्यं प्रति अचेतनदण्डसूत्रादीनां कारणत्वेऽपि "अचेतनानां घटकः सचेतनः" इत्युक्तेरिति भावः। विभुत्वेनेश्वरस्य कार्य्यत्वाभावं दर्श-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यितुं सम्बोधनान्तरमाह—अनाद्येति। एतेन अनवस्थादोषाशङ्का परिहृता इति दिक् ॥ ५ ॥

सत्त्वं रजस्तम इति प्रकृतिर्यथार्था
निर्माति विश्वमखिलं तव सन्निधानात्।
दुग्धं यथा दधि घटं मृदलं सुवर्णं
तां चेन्न पश्यति भवान् न हि सा प्रसूते ॥ ६ ॥

इदानीं परिणामवादीयप्रधानप्राधान्यवादे ईश्वरस्य जगन्निदानत्वं दुर्घटमिति शङ्कामपनेतुमाह,—सत्त्वमिति। सत्त्वं रजः तमः इति गुणत्रयरूपा, यथार्था प्रकारवतीत्येवंरूपेण अर्थवती, न तु साम्यावस्थोपपलक्षिता तस्याः निर्म्माणकरणे योग्यताविरहात्; प्रकृतिः, तव सन्निधानात् पुरुषरूपस्य तव सम्बन्धात्, जवाकुसुमसान्निध्यात् स्फटिकोपरञ्जनवत् बुद्धौ चिद्रूपस्य प्रतिबिम्बनादित्यर्थः। अखिलं कृत्स्नं, स्थूलसूक्ष्मोभयविधमिति यावत्; विश्वं जगत्, निर्म्माति सृजति, विचित्रविविधजगद्रूपेण परिणमतीत्यर्थः, तथा च "प्रकृतिप्रभवं विश्वम्" इति श्रुतिः, तेन च साङ्ख्यमतमनुसरता भगवता भगवद्गीतायामुक्तम्—"प्रकृतिं पुरुषञ्चापि विद्ध्यनादी उभावपि। विकारांश्च गुणांश्चैव विद्धि प्रकृतिसम्भवान् ॥" इति (१३अ० १९श्लो०)। "कार्य्यकारणहेतुत्वे हेतुः प्रकृतिरुच्यते।" इति च (१३अ० २०श्लो०) प्रकृतिपरिणामस्वमस्योपपादयितुं सादृश्यमुपन्यस्यति, दुग्धमिति। यथा दुग्धं दधि मृत् घटं सुवर्णं अलं निर्माति तथा प्रकृतिरिति शेषः। यथा दुग्धं दधिरूपेण, मृत् घटरूपेण, सुवर्णञ्च अलङ्काररूपेण, परिणमति, तथैव प्रकृतिः कार्य्यरूपेण परिणमतीत्यर्थः। एवञ्चेत् प्रकृतेरेव जगन्निदानत्वे कथं भगवतस्तत्कारणत्वमुक्तमित्यत आह—तामिति। तां प्रकृतिं प्रधानं, भवान् पुरुषरूपी विश्वकर्त्ता, न पश्यति चेत्, नेक्षते यदि, अभिप्रेतसृष्ट्यर्थं न विक्षोभयतीत्यर्थः। "ईक्षतेर्नाशब्दम्" इति सूत्रोद्धृतया "अहं बहुस्यां प्रजायेय" इति श्रुत्या पश्यतीत्यस्य ईक्षापूर्वक-जगत्सृष्ट्यवबोधनेन तथार्थाङ्गीकारादिति भावः। तदा सा जड़ा प्रकृतिरित्यर्थः, न हि प्रसूते यथायथभावेन परिणन्तुं नार्हति, जड़स्वभावत्वादिति भावः। भगवत्कारणत्वे साङ्ख्यमतसंवादिभगवद्वाक्यम्—"अहं कृत्स्नस्य जगतः प्रभव" इत्यादि। तथा "सर्वभूतानि कौन्तेय प्रकृतिं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यान्ति मामिकाम्। कल्पक्षये पुनस्तानि कल्पादौ विसृजाम्यहम्।" इति (९अ० श्लो०) "मयाध्यक्षेण प्रकृतिः सूयते सचराचरम् ।" इति च (९अ० १०श्लो०)।

प्राप्तपत्रम्

कलिकाता-ब्राह्मणायुर्व्वेदसभासन्देशीयम्

[लेखकः—श्रीकालिदासचौधुरीकाव्यतीर्थ एम्, ए]

अतीतसौरपौषस्य तृतीयदिवसे कलिकाता-ब्राह्मणायुर्वेद-सभायाः साधारणं मासिकाधिवेशनम् अभवत्। तत्र तत्रभवता कविराजप्रवरेण कविरत्नोपाधिकेन श्रीयुक्त-शीतलचन्द्रचट्टोपाध्याय-महोदयेन सभापतेरासनं समलङ्कृतम्।

सभायां काशीधाम्नः स्वर्गतस्य प्रसिद्धभिषज उमाचरणभट्टा-चार्य्यमहाशयस्य—स्वर्गतस्य विद्यासागरकलेजाध्यक्षस्य सारदा-रञ्जनरायमहाशयस्य च पारलौकिकमङ्गलकामना कृता। तदन-न्तरं आयुर्वेदशास्त्राध्यापनाम्ना श्रीयुक्तनगेन्द्रनाथचट्टोपाध्यायमहा-शयेन आयुर्वेदशास्त्रोक्त-घृततैलादीनां मूर्च्छापाकविधेः गन्धपाक-विधेश्च प्रतिवादमूलकः स्वकृतः प्रबन्धः पठितः। प्रबन्धः लेखकस्य रचनाचातुर्य्यात् अतिरमणीय एव सञ्जातः। अयं खलु लेखकस्य तत्त्वानुसन्धित्साप्रवणतां वाहुल्येन सूचयति।

स्नेहानां मूर्च्छापाकविधिः चरकसुश्रुतवाग्भटादिषु प्राचीनायु-र्वेदग्रन्थेषु अनुक्त इति अशास्त्रीयोऽयं मूर्च्छापाकविधिः अनेन एव स्नेहानां शास्त्रोक्तफलानि न सम्पद्यन्ते इति आशङ्कमानः प्रबन्ध-लेखकः मूर्च्छापाकं प्रतिवदति। सभायां पण्डितवरकविराज-श्रीयुक्त-माधवचन्द्रतर्कतीर्थेन मूर्च्छापाकविधिप्रतिवादस्य प्रतिवादः कृतः। अभिहितश्च तेन विदुषा यत् विचारसभा काचित् आहूयतां, यत्र एतादृशः जटिलविषयस्य मीमांसा प्राचीनविचारपद्धत्या भवितुमर्हति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वद्यशास्त्रपीठाध्यापक-लब्धप्रतिष्ठकविराज-श्रीयुक्तयचीन्द्रनाथविद्याभूषणमहाशयस्य प्रदेशान्तरादागताः कतिपये आयुर्वेदाध्यायिनश्छात्राः स्वकीयदेशेषु अयं मूर्च्छापाकविधिः न प्रचलति इति व्यज्ञापयन्। सभापतिस्तु सहसा एतद्देशेषु चिरं प्रचलितस्य मूर्च्छापाकविधेः अशास्त्रीयत्वम् अनावश्यकत्वं च न वक्तुमुचितं, परं शास्त्रानुसन्धानेन भिन्नदेशीयानां भिषजां मतसंग्रहणेन च विचारणया एतादृशः विषयस्य मीमांसा विधेयेत्युक्तवान्। परं तेन एतदपि उपदिष्टं यत् मूर्च्छापाकेन स्नेहादीनां गुणाकर्षणशक्तिर्वर्द्धते, न तु हीयते। एतत्तु पाश्चात्त्यरसायनशास्त्रविदा केनचित् विदुषा मूर्च्छितस्नेहपरीक्षणेन उक्तमिति विज्ञाप्य तेन सभाभङ्ग आदिष्टः।

एतत्पत्रिकामुखेनैव वङ्गदेशीयानां वङ्गेतरदेशीयानाञ्च भारतीयभिषग्वराणां मूर्च्छापाकविधौ अभिमतं जिज्ञासमाना वयम् प्रार्थयामहे, यत् सर्वे भिषज औदासीन्यं विहाय सयुक्तिकं स्वाभिमतं विज्ञापयन्तः अस्माकं कौतूहलं चरितार्थतामापादयन्त्विति।

सन्देशाः

परिषदधिवेशनम्—विदितमस्तु श्रीमतां पाठकमहाभागानां यथा फाल्गुनस्य पञ्चदशदिवसे शनिवासरे सायं सार्द्धषष्ठघटिकायां परिषदो माघमासीयमधिवेशनं सुसम्पन्नमिति। तच्च पद्यालोचनाप्राधान्येन साधारणाधिवेशनेभ्यो वैलक्षण्यमुपागमत्। तत्र चाधिवेशने श्रीमन्तः सीतानाथसिद्धान्तवागीशमहाशयाः सभापतिपदमलमकुर्वन्। श्रीकालीपदतर्काचार्य्यस्य नैयायिकेश्वरसिद्धिशीर्षकं पद्यमयन्यायनिबन्धमवाचयत्। मान्याः सभापतयः सम्यक्तया पद्यमयवचसा एव निबन्धसमालोचनां कृतवन्तः। परिषदो मन्त्रिणः श्रीपशुपतिनाथशास्त्रिणः पद्यमयतार्किकनिबन्धस्य शिक्षार्थिनां पक्षे धारणाद्युपकारकतया भूयसी प्रशंसा कृता। परं तस्मिन् दिवसे दोलयात्रोत्सवव्यासक्ततया बहूनां सभ्यानां तत्रानुपस्थानं सभाधिवेशनार्थं तद्दिननिर्देशकं प्रत्यस्मान्

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मुखरयति। आशास्महे यथा अतःपरं तथा दिवसादिनिर्द्धारणे मन्त्रिणो माध्यस्थ्यं नावलम्बेरन्। विज्ञापितं निबन्धलेखकेन यथा अतःपरमन्येऽपि विषयाः कठिनकठिना अनया रीत्या व्याचिख्यासिताः सन्तीति।

अ-भा-संस्कृतमहासम्मेलनम्—प्रियपाठकाः! अस्माभिरस्यामेव पत्रिकास्वस्विकायां मतिमञ्जर्य्यां प्रकाशितवृत्तस्य अखिलभारतवर्षीयसंस्कृतमहासम्मेलनस्य दशममधिवेशनं कलिकातामहानगर्य्यां सौरचैत्रस्यान्तिमदिवसे तथा सौरवैशाखस्य प्रथमद्वितीयदिवसयोः सम्भविष्यतीति तदीयस्वागतकारिसमित्या निर्दिष्टमभूत्; सम्प्रति च तदवसरे निखिलभारतीयायुर्वेदमहासम्मेलनाधिवेशनं निर्दिष्टपूर्वमिति बहुभिरेव देशान्तरीणैः एतद्देशीयैश्च संस्कृतसाहित्यसम्मेलनसपक्षैः संस्कृतसाहित्यमहासम्मेलनाधिवेशनस्य निर्दिष्टसमयपरिवृत्तिं कामयमानैरावेदनपत्रस्य सम्प्रेषणात् अन्तरावतिष्ठमानेन स्वल्पेन समयेन महासम्मेलनप्रबन्धानां सम्यक्तया निर्वर्त्तनस्याशक्यतया च स्वागतकारिसमित्या सम्भूय सुविचारपुरःसरं सौरश्रावणस्य प्रथमसप्ताह एव तत्कालो निरदेशि। अनन्तरं यथाकालं अविलम्बितमेव निबन्धसूचीप्रभृतयः प्रकाश्येरन्, येन निबन्धारः सुविचार्य्य तत्त्वनिर्द्धारणपूर्वकं गभीरनिबन्धान् निबन्धुमलं भवेयुः। सम्मेलनसम्बन्धिविषयं जिज्ञासवः स्वागतकारिसमिति-मन्त्रिनाम्ना कलिकाता-राजकीयसंस्कृतमहाविद्यालयस्थानसङ्केतानुसारेण पत्रं प्रेष्य स्वाभिलषितं जानीयुः। प्रतिप्रान्तञ्च समवस्थितानां विद्यापीठानां विशेषतः संस्कृतशास्त्रनिष्णातानां विदुषाञ्च यथासम्भवं नामधामादिविज्ञापनेन सम्मेलनस्वागतकारिसमितिमुपकुर्य्युरित्याशंसामहे।

अयि भोः! सद्‌ग्रकर्म्माणः! पत्रिकासम्पादकमहाभागाः! युष्माभिरप्यस्य कृत्यस्य गौरवविशेषमनुभूय स्वस्वपत्रिकासु सम्मेलनसम्बन्धिवृत्तप्रकाशनाय सुसन्नद्धैरवस्थातव्यं, स्वीयदेशगौरवबुद्ध्या वा संस्कृतसाहित्यम्प्रति परमेणानुरागेण वा दीनातिदीनां सुरसरस्वतीं प्रति सानुक्रोशमनस्कतया वा सम्मेलनीयं वृत्तजातं सुप्रचार्य्य सफलं कुर्वन्तु श्रीमन्तो वङ्गेषु दशममधिवेशनं संस्कृतसाहित्यसम्मेलनस्येति सोत्साहं सानुरागं सप्रणयं सोपपत्तिकञ्च वयमभ्यर्थयामहे।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पण्डिताग्रणी-वैयाकरणशिरोमणि-

श्रीयुक्तहरलालस्मृतिरत्नमहोदयविरचितटीकयान्वितम्

सारस्वत-व्याकरणम्।

वङ्ग-विहार-वाराणसी-पञ्चनदादिप्रदेशप्रवर्त्तितराजकीयसंस्कृतपरीक्षायाः पाठ्यरूपेण निर्दिष्टम्

बालानामाशुबोधकतया परमुपयुक्तेऽस्मिन् व्याकरणे विभिन्न-प्रदेशप्रचलितपाठान्तराणां समन्वयेन प्रसादगुणालङ्कृता संयोजिता बालसरला नाम टीका। सरलसंस्कृतभाषया व्याख्या, पद-साधनम्, पारिभाषिकलक्षणनिर्म्माणादिकम्, विचारवितर्कादिना गूढ़सन्देहमीमांसा, असंख्यानां परिकल्पितपूर्वपक्षाणां विभिन्नदिशा प्रदर्शितान्युत्तराणि—इत्येवमादिकं व्याकरणाध्यायिनामपेक्षितं सर्वं-मेवात्र सन्निवेशितम्। सम्पादकस्य 'निवेदने' च व्याकरणविषयकं विविधगवेषणामयमालोचनं विद्यते।

मूल्यम्—पूर्व्वार्द्धम् ३) रूपकत्रयमात्रम्। उत्तरार्द्धम् ३) रूपक-त्रयम्। ये तु पूर्वोत्तरार्द्धे एकदा ग्रहीष्यन्ति, तेषां कृते ५) रूपक-पञ्चकमात्रम्।

प्राप्तिस्थानम्—श्रीकृष्णदासमिश्रव्याकरणतीर्थः
चट्‌ला सारस्वतचतुष्पाठी, पोः मिरगोदा, मेदिनीपुर।
तथा—संस्कृतबुकडिपो, २८।१ कर्णओयालिसष्ट्रीट, कलिकाता।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

The Sanskrit Sahitya Parishad

A JOURNAL PUBLISHED IN SANSKRIT

DEVOTED TO THE STUDY

OF

History, Literature & Philosophy

OF

Ancient India

Annual subscription........ Rs. 3. Foreign......7s.

As the most popular and widely read Sanskrit Monthly this is th best medium for advertisement. Advertisements are published in al languages.

Monthly Rate of Advertisement :—

	Full page	Half page
For one year	Rs. 6	Rs. 3
For one issue	,, 8	,, 4

For further particulars apply to the Manager,

SANSKRIT SAHITYA PARISHAD,

Shambazar, Calcutt

प्रकाशको मुद्रापकश्च—श्रीदुर्गामोहनकाव्यसांख्यपुराणतीर्थ एम्. ए.
संस्कृतसाहित्यपरिषत्, श्यामबाजार, कलिकाता।
मुद्रापणस्थानम्—सिद्धेश्वरप्रेस, २८ नन्दकुमारचौधुरीसेकेण्डलेन,
कलिकाता।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri